नं० ४९४३

नाम — मार्कण्डेय पुराणे देवी माहात्म्य व्या-
ख्यानम्

कर्ता- नागेशभट्ट० कालोपनामकः शिवभ-
ट्टसुत०

पत्र संख्या - ३३ पत्राणि - सं० — १८४७

. विषय० — पुराण माहात्म्यादि

19

सप्तशती व्याख्यानम् मार्कण्डेय पुराणे

धल धर्

4943

#18 double.

F. = 34

नागं लिङ्गं च योनिं च बिभ्रती नृपमूर्द्धनि नप्रकाश्य नवमिभानव्रकाश्यम्भूर्वतेति दीक्षारम्भणादावस्मौदुपात्रे चापि श्रुतिः ५

श्री
मा॰
१

ॐ श्रीगणेशाय नमः ॥ ॐ मार्कण्डेयेन प्रोक्तं किं भागुरिं प्रश्नमं लोकं नैमित्तिकं विनिद्रितिरूपं च निलिङ्गवैकृतं मार्कण्डेयपुराणेन ह्याज्ञामातिः
आवश्यमेव तत्रादौ व्याख्यास्यमानस्तोत्रे स्तूयमानदेवतास्वरूपं प्राधानिकरहस्याविशेषयुक्तविशेषेण कैश्चिद्विज्ञाप्यते तत्रादौ राजा तत्र
भगवन्नवतारा मे चण्डिकायास्त्वयोदिताः एतेषां प्रकृतिं ब्रह्मन्प्रधानं वक्तुमर्हसीति ऋषेस्तेषां मूलिनिमित्तं रहस्यप्रश्नो प्रकृतिः स्थूलका
रणं तत्रोक्तं सर्वस्याद्या महालक्ष्मीस्त्रिगुणा सकलेश्वरी लक्ष्यालक्ष्यस्वरूपा सा व्याप्य कृत्स्नं व्यवस्थिता तस्याः स्वरूपमाह मातुलु
ङ्गं गदां खेटं पानपात्रं च बिभ्रती नागं लिङ्गं च योनिं च बिभ्रती नृपमूर्द्धनि इति रुद्रयामले अस्याः स्वरूपमाह अत्रान्तरे लिङ्गेन रूपा
मासनेनमसेति लिङ्गयोनिं च बिभ्रती मनेनास्याः स्वरूपं दर्शयति एवं च प्रधानेति एतदेव प्रश्नोत्तरे सदाशिवोऽयाकः देवता वा आदेवैः
ति शाक्ता महालक्ष्मीति लिङ्गयोनिं बिभ्रती नरनारीसदिति शिवो मध्यः देवाण्णमिति रुद्रयामलस्वरसात् अतएव इयं महालक्ष्मी
कटस्थापि प्रथममध्यमोत्तरचरितत्रयदेवतासमष्टिरूपा सकलदेवमाला त्रयदेवतेति बोध्यम् एषा शिवीकर्मबीजं महाशिवाकमा
तुहाशक्तिरिच्छाशिवाङ्कया महालक्ष्मीरिति व्याख्यातादेवीसर्वशक्तिरिति निश्चिन्तयामात् लक्ष्मीतन्त्रे विश्वशक्तिरूपवालक्ष्मीश
क्तिः प्रतिकाल्यादीनाञ्च तासां भेदो नोक्तः एतस्याः सर्वमयत्वमिति माया विश्वं मूर्तदेवसर्वप्रधानत्वमस्याः तत्तोऽपि च यावि
भागेनाह शून्यं तदखिलं लोकं विलोक्य परमेश्वरी बभार रूपमपरं तमसा केवलेनहि प्रथमं तमसः प्राधान्यमाश्रित्य केवलेनेत्यु
क्तिः तद्रूपमाह सा भिन्नाञ्जनसङ्काशा दंष्ट्राङ्कितवरानना विशाललोचना नारी बभूव तनुमध्यमा खड्गपात्रशिरः खेटैरलङ्कृ
तचतुर्भुजा कबन्धहारं शिरसा बिभ्राणा हि शिरः स्रजम् सर्वमयीति तरः स्वनामित्वयोः शुभ्रिशु पैसरस्यागाह नैवेद्यं दर्शनं देवि
यामलोक्तेः अस्याः स्वरूपाणां नामसीव प्रकाशन देवमोहन कालोपपत्येत्याह कालात्मप्रदर्शनेनैव द्रष्टव्यमिति सा प्रोवाच महालक्ष्मी
तामसी प्रमदोत्तमा नाम कर्म च मे मातर्देहि तुभ्यं नमो नमः इति महालक्ष्मीपरं रूपं प्रभावेण नेत्यमूलशाकेरस्याः मतोमद्यते ता
तो महालक्ष्मीराह महामायां महाकालीं महामारीं क्षुधां तृषाम् निद्रां तृष्णां चैकवीरां कालरात्रिं दुरत्ययाम् इमानि तव नामानि प्रतिपा
द्यानि कर्मभिरिति इमा कृष्णे अन्ये चवदन्ति ततः सा प्रतिरूपा महालक्ष्मीः स्वरूपमपरं नृप सत्त्वाख्येनाति शुद्धेन गुणेनेन्दुप्रभं दधौ
चतर्थेनाक्षमालां च पवित्रवासहिता अक्षमालाङ्कुशधरा वीणापुस्तकधारिणी सा बभूव वरा नारी नामान्यस्यै च सा ददौ अस्याः
सत्त्वप्रधानत्वदर्शी यतिंकल्पानुकलानि शिवायां भवानामादिप्रथा भावेन दर्शितं महाविद्या महावाणी भारती वाक्सरस्वती आ
र्या ब्राह्मी कामधेनुर्वेदगर्भा च धीश्वरी इमानि तिस्रोऽपि तत्वे धर्मतत्त्वनामपि विहिताः स्मरणात् प्रथमं सत्तयाः प्रविभागमाह

२

महा[illegible]त्रिवर्णरजः प्रधानमेव स्थितेभ्यः कं भवति इत्यत्र श्लोकमेव अलक्ष्यरूपं च सर्वं वृत्तं च तत्त्वं वेदितव्यं प्रांशं च स्थूलकाय महाली
[illegible] पारमार्थिकतदभिन्नाभिन्नस्वतदभिन्नत्वमिति सायेन बोध्यः सकलरूपा शेषनामानज्ञानमवादासां तद्भेदज्ञानमपि च ता
[illegible]एवं नत्समानकत्वरूपं प्राणताउक्तेः सर्वासां स्त्रीणु रूपाभ यत्रपराणु अथोवाच महालक्ष्मीर्महाकालीं सरस्वतीं च ग्र
वोत्तनयमाह योमिथुने स्वानुरूपतः इदमाज्ञादाने सममतिरूपं बोद्धव्यं इत्यत्र कृतेन महालक्ष्मीः ससर्ज मिथुनं स्वयं हिरण्यगर्भौ रुचिरौ
स्त्रीपुंसौ कमलासनौ ब्रह्मन् विधि विरिञ्चेति धातेत्याह स्वेतरे श्रीः पद्मे कमले लक्ष्मीत्याह माता च तां स्त्रियम् इमौ रजःप्रधानौ प्रा
मात्तत्वतः प्रादुर्भावमात्रेण महाकाली भारती च मिथुने सृजतः स्म नीलकण्ठं रक्तबाहुं श्वेताङ्गं चन्द्रशेखरम् जनयामास पुरुषं
महाकाली सितां स्त्रियम् स रुद्रः शंकरः स्थाणुः कपर्दी च त्रिलोचनः त्रयी विद्या कामधेनुः सा स्त्री भाषाक्षरा स्वरा इमौ सत्त्वप्रधान
मोघतौ सरस्वती स्त्रियं गौरीं कृष्णं च पुरुषं नृप जनयामास नामानि तयोरपि वदामि ते विष्णुः कृष्णो हृषीकेशो वासुदेवो जनार्दनः उ
मा गौरी सती चण्डी सुन्दरी सुभगा शुभा एवं युवतयः सद्यः पुरुषत्वं प्रपेदिरे [illegible]रूपत्वमपीत्यर्थः इमौ तमोऽधिक[illegible]
रीति नाममात्रे शिवशक्तिरूपामलंकृतात् एतावतैव सर्वं वेद्यं तत्क्रियाच्च न सर्वं वेद्यमाह चक्षुष्मन्तो नुपश्यन्ति नेतरे तद्विदो जनाः
ति ज्ञानचक्षुष्मन्तः पश्यन्ति नेतरे तद्विदुषः इति पाठान्तरम् ततः ब्रह्मणे प्रददौ पत्नीं महालक्ष्मीर्नृप त्रयीम् वरदां [illegible]द्राय गौरीं वा
वासुदेवाय च श्रियम् तत्र स्वरूपतया सरित्[illegible]क्रमेण ब्रह्मा स्रष्टृत्वाधिकारं विष्णुः पालनाधिकारं रुद्रः संहाराधिकारं कृतवानित्यर्थः उक्तं च एतत्प्रथ
म[illegible]दयः तत्रैव कथ्यते विष्णुर्लक्ष्मीः कालीं सरस्वतीं सरस्वत्याः सकाशाद् विष्णुः [illegible]कालाः सकाशाद् रुद्रः [illegible] ब्रह्म
[illegible] [illegible] कादिवशात् इति नानाप्रकारपुराणादिष्वस्य सृष्टिक्रमकथने विरोधः एतेन सर्वेऽपि सर्वे तत्त्वादिस
कलशक्तिमत्तः तत्तदधिकारभेदमात्रं किंचित्त्वादि अवदातोऽपि [illegible] तत्त्वादिनियमता च सर्वेषां तत्त्वादि [illegible] समस्तानि च
तत्तदधिकारस्य एवं ये जीवा उपासना[illegible]मात्रेण [illegible]लोके [illegible] ब्रह्मलोकादिषु [illegible] देवादिभिः समाना [illegible]
दिसंज्ञाभाजो जीवा एव एषामपि कर्मानुरूपतत्तदधिकारभाक्त्वं एषां सर्वेषां मूलाभेदेऽपि [illegible] प्रावरणादीनां तथात्वे [illegible]
सार्वात्म्येन [illegible] विरुद्धा अतएव देवीपुराणे [illegible] वैदिकादिभिः [illegible] इत्यादि [illegible]
ति त्रिगुणापरविकृति द्वैतात् अहं सर्वमिदं भूतं [illegible] तथा मया [illegible]
वचनाच्च अतएव श्रुत्यमहालक्ष्म्यादिजन्यब्रह्मादीनामेवाण्ड[illegible]

श्रुग्रेउक्तावीतिवोध्यप सुरयासस्संस्ययविरिंयोंउमजीजनत् विभेदभगवान्त्रहहस्तद्वौर्योसस्वीयेवाविति आरसमयोवमकलं
शालिज्ञानसमूत्तमः मल्लवेपालयामासलद्भासहजेनाहेनः संजदारजनालवेमस्तगोयोसद्देसुरः एवंवमालवरसवेमसालेहस्यात्र
२ भूस्तुत्या अग्रहंवेवमनुत्यज्ञावल्लादेवाघ्रसर्वतस्तियामसे एवंचपथिवीनस्मापिणात्तस्हेरयोगानिसमृकाहिकाय्याआपिमस्याकाला
मूलशाक्तभेदादेवमघाविस्त्सतेसर्वसाविद्यापरमाक्षकेरित्यादिनाक्रियपाणासर्वीलेनज्ञातिनिविकृत्रा एवंनसर्वात्मिकापाः
प्रकृतेश्चेलनद्रूपायाधिक्षकेरव्याधिष्ठाशपिवयसमारम्भेदंमत्वायोगनिश्रुजरायनेः सेवाप्रसन्नाभरदेत्यादिनाग्रतनसमाडश्चितेः पा
मानाधिकरण्य प्रसूलभूमनस्वस्त्येसमामायाकंरलिनीत्यादिश्लेषैवक्रियमाणाधिकानौविषक्रिरपिनरमेदात्मसत्ताकात्ति
संज्ञाभावः नयायवेमामयायाकं नमनारायणाद्देदावित्वनेहिविचारतः नजयादेपरंब्रह्मलालनिबन्धःपरमेश्वरइति एवंममोप
योकालीसंज्ञाशक्तिरपिनिद्रामोराहिभिः उक्तद्गतालावरकृतान्मायामहामायेत्युच्यते मलमहामहेशनमावेयं शक्तिः शक्तिमत्ताविधि
2 नैवोपास्या नचग्रहमस्य शक्तिप्रत्याश्रयलेपिकार्यौमयोशक्तेरेवप्राधान्यमतः शक्तिरूपासेवतिब्रह्महारस्परात्तपपत्तिः एवंशक्तिवृत्तवा
सर्वोग्रयगमादित्यवशरापिसमेअसः उपास्यतेचमहाकाल्यादिरूपारामूलशाक्तेवेतिसर्वसमंजसं मध्यत्रमयमयवहनाः अस्याःशा
पेहस्मां कीलनेत्रयोदशाध्यायपविलाप्रथमंपठेमेताहादशहितीयो ननपकाराशनतीयोहतिकमेनापठेत्स्वममेहिविशिशापोद्धारः
प्रथमंमध्यमचरितंपविज्ञातनः प्रथमसमीयेपठेदिसकीलनमितिकचिहसम्भूकेरलसंप्रदायवाजालनसमूलेमस्त्रवम अग्रपमस्सतमा
वपाठविधिः नवत्रारात्रीनेचे आधारेस्यापयिवालसलकंवावयेत्ततः हस्तसंस्थापनाद्देविभवेद्धफलंयतः यावेन्नस्त्रतेध्यायस्ता
वन्नविरमेन्मध्ये यदिप्रमादात्ध्यायेविरामोभवतिप्रिये पुनरध्यायमारभ्य पठेत्सर्वं मुहुर्मुहुः अध्यायसमाप्तौहेविशिरः वेपादिकंत्यजेत
तथासत्र प्रणवंस्वरंवशब्दाश्लोकवासहितापठेत् अंतेचप्रणवंदद्यादित्युवाचादिस्वरूपः नमानसंपठेत्स्तोत्रंवाचिकंतुप्रशस्यते य
त्कीलकेनभिस्सतमामेविस्तोत्रंसंपुनिरुद्धंकैरितिनरन्सेः पाठविधयकंवाचिकंपक्षेच श्लोकेवाचनशंसनसहस्तादधिकंयत्
हि ननोमसततमनवेहावनमुलकेचिना विनापीत्यर्थः स्वपिसंदांगविस्मयपवनामसमाहितः स्तोत्रमहस्रपेनपच्चप्रणवत्रासमा
वरन श्रीरायवेलिकामीनसायशमाकलोश्वरो विश्वाः सहस्रनामाख्यलोकसंग्रेणापपलाशशनम गणेशमात्तलवेवनयाक्ति
पकसलनः नारसिंहेनयायोभीषंगलोकलाग्रसीतामसंज्ञकम् हेमंतःसयज्ञावीणोरेनपानामसहस्रकम् स्ताकंतकनेलकंवंशो
वनामसहस्रकम विशुगायाःप्रसादात्मरपंसहस्रनामकम् पेज्ञाहविल्लवोयसइद्रातलीलेयमेवच वेदवेदमसदानलस्ती २

अस्याः श्रीमध्यमचरितमालामंत्रस्य श्रीमार्कण्डेय ऋषिः श्रीमहालक्ष्मीर्देवता अनुष्टुप्त्रिष्टुब्जगत्यश्छन्दांसि ऐं ह्रीं क्लीं चामुण्डायै शक्तिः धर्मार्थकाममोक्षार्थे पाठे विनियोगः
या चण्डी मधुकैटभादिदैत्यदलनी या माहिषोन्मूलनी या धूम्रेक्षणचण्डमुण्डमथनी या रक्तबीजाशनी शक्तिः शुम्भनिशुम्भदैत्यदलनी या सिद्धलक्ष्मीः परा सा देवी नवकोटिमूर्ति
सहिता मां पातु विश्वेश्वरी ॥ १ ॥ अथ मध्यचरितस्य ब्रह्मा ऋषिः महाकाली देवता गायत्री छन्दः नन्दा शक्तिः रक्तदन्तिका बीजं अग्निस्तत्त्वं ऋग्वे

अमिंद्रेणाभ्यर्चितम् भार्गवाख्येन रामेण शातातपाभिकारणात् अनेन गीतास्तवशतादीनां शापाभावएवलभ्यते शुद्धेनाच
लचित्तेनपवित्रेणप्रयुक्ततः नसर्वत्रलिखितंस्तोत्रंनाब्राह्मणेलिपिमुद्रेत् नचचयेकृतेस्तोत्रंतथान्येनचयत्कृतम् यतःकलौ
प्रशंसंतिऋषयश्चिभिभाषितंतथा कीलनंयेन अष्टम्यांवाचतुर्दश्यांकृष्णायांवासमाहितः ददातिप्रतिगृह्णातिनान्यथैषाप्रसी
दति इत्थंरूपेणकीलेनमहादेवेनकीलितमिति सप्तशतीस्तोत्रंशिवशापतउत्कीलकोवेदमितिकेरलदेशे ततःकृतांजलिर्भूत्वा
स्तुवीतचरितैरिमैः एकेनवामध्यमेनैकेनेतरयोरिह चरितार्द्धंतुनजपेज्जपन्छिद्रमवाप्नुयात् स्तोत्रमंत्रैःस्तुवीतेमांयदिवाज
गदंबिकामिति अर्गलंकीलकंचादौपठित्वापश्चात्कवचेन जपेत्सप्तशतींचंडीक्रमएषशिवोदितइतिकश्चिदिदंश्लोकंपठित्वापिमूललेख
नम् इतिस्तोत्रपठनविधिः ॐनमश्चंडिकायै मार्कंडेयउवाच सावर्णिरिति सवर्णायाश्छायायाअपत्यंसावर्णिःबह्वादित्वादि
ञ् विस्तराद्गदतोममेति अपादानत्वस्याशेषत्वविवक्षायांषष्ठी निशामयजानीहि चुरादेरूपं तस्यनात्यंमितोदेनाविनिमितनिषे

ॐ नमश्चण्डिकायै मार्कण्डेय उवाच सावर्णिः सूर्यतनयो यो मनुः कथ्यतेऽष्टमः निशामय तदुत्पत्तिं विस्तराद्गदतो मम ॥ १ ॥

धः सूर्यतनयइति इदंसावर्णपदनिरासार्थंयद्वा ॥ योयकारादष्टमोमनुरईकारस्तस्यविशेषणंसूर्यतनयइति सचाग्निस्त
त्वस्तवनत्वेदिष्टत्वात्तेनतद्बीजरेफोपलभ्यते नद्वंद्वंचहकारस्यलक्षणघोच्यते तस्यैवविशेषणांतरंसावर्णिरिति सवर्णोलो
हितशुक्लकृष्णवर्णसरितापकृतिः तस्याअपत्यंतत्संबंधीतद्वाचकईकारः तद्धलंलक्षणया अणिमादिसिद्धस्तस्मोकेस्वरूपतएव
निवेशितइतिह्रीमितिबीजंलब्धंतदुत्पत्तिंतन्मंत्रप्रतिपाद्यदेवतायाउत्पत्तिंनिशामयेतिसम्बन्धः केचित्तु यदेक्षमितिस्वरूपे
णपठितम् इकारांतरेचतत्राग्निसेतेनह्रमितिलब्धंअग्रेपरेतामुद्धृत्यकथांश्रीजद्बीजंलज्जाबीजमनेकशःवाक्येडापदसहमेधायै
ओमित्यादेरस्यादौ येइतितत्वसारेस्वत्रस्वाहाशब्दः एवंच क्लीं ऐं ह्रीं चामुंडायैस्वाहेतिदशाक्षरोमंत्रःकलौ सोवे किंच विधामात्र
त्वादिनाप्रणवः वाग्बीजंलज्जाबीजंनेकशःमहामोहेनमनेनमोहजनकत्वात्कामबीजम् तथैवथायैतेसर्वमितनेनएषाह्रीबीजं
लकारःतमस्तस्येरमेनेनाग्निरूपत्वात्तत्सहीजरेफः तथैतत्स्वज्वलेराजसतयालक्ष्मीबोधकईकारः बिंदुःस्वरूपेणेतिह्रीमितिलब्धं

अस्य श्रीसप्तशतीस्तोत्रस्य मेधा ऋषिः गायत्र्युष्णिगनुष्टुब्बृहतीपंक्तित्रिष्टुब्जगत्यश्छन्दांसि महाकालीमहालक्ष्मीमहासरस्वत्यो देवताः नन्दाशाकम्भरीभीमाः शक्तयः रक्तदन्तिकादुर्गाभ्रामर्यो बीजानि ऐं ह्रीं क्लीं बीजानि सौः शक्तिः इष्टसिद्ध्यर्थे जपे विनियोगः
ह्रीं हृदयाय नमः ... मेधा ऋषये नमः शिरसि गायत्र्युष्णिगनुष्टुब्बृहतीपंक्तित्रिष्टुब्जगतीछन्दोभ्यो नमः मुखे महाकालीमहालक्ष्मीमहासरस्वतीदेवताभ्यो नमो हृदि ऐं ह्रीं क्लीं बीजेभ्यो नमो गुह्ये सौः शक्तये
नमः पादयोः ... विनियोगः सर्वाङ्गे ॥ इति ऋष्यादिन्यासः अथ करषडङ्गन्यासः ह्रां अङ्गुष्ठाभ्यां नमः ... ह्रौं करतलकरपृष्ठाभ्यां नमः ... स्वाहा

कुटवंद्य

दमध्यमहाकाली प्रीत्यर्थे सप्तशतीमध्यचरित्र जपे विनियोगः खड्गंचक्रगदेषुचापपरिघाञ्छूलंभुशुण्डींशिरः शंखंसंदधतींकरैस्त्रिनयनांसर्वाङ्गभूषावृताम् नीलाश्मद्युतिमास्यपाददशकांसेवे महाकालिकां यामस्तौत्स्वपितेहरौकमलजो हन्तुंमधुंकैटभम्

नमइतिपंचमे मायाकामयोर्बुद्धिः प्राणेनेकशक्तद्वयं तेनह्रीं ऐं ह्रीं क्लीं क्लीं क्लीं ह्रीं नमइतिनवार्णो मंत्रः किंच ऐं ह्रीं क्लीं चामु
ण्डायैइतिसर्वेवर्णविविच्यमित्यत्रविविचिति भूयसेव्याम्यहंइत्यत्रेइतिनवविच्चेइतिलखे तेनदासरोकनवार्णोत्रेत्याहुः पूर्वमन्वन्त
पहे ध्यायपि पूर्वद्वयक्रमेणस्थैर्यम् इतिकालेमनयेष्वभविष्यंतिमहात्मने ममवक्ष्यामिआवक्ष्यतेश्रेष्ठादूरस्यधैर्यइत्येवाक्रंतथापि
सावर्णिकालात्मकथनात्तरमार्कंडेयपुराणेसावर्णिकामिदं समाख्यातंमन्वंतरंतव तथैवदेवीमाहात्म्यंएषमेनन्तवादितमित्य
पसंहारेणतद्विषयकोपूर्वकिंप्रश्नस्यानुवृत्यात् उपक्रमप्रश्नानिवृत्यस्यफलतात्पर्यमितिबोध्यं उपक्रमेप्रश्नसोकेभइइतिबोध्यम् १
महामायेति विसृष्टाप्रतीतिसाधनं सर्वविषयत्वमितिमहामायेश्वरशक्तिः तस्यानुभावः इदमस्मभवत्विंक्षा नौ

महामायानुभावेनयथामन्वंतराधिपः सबभूवमहाभागःसावर्णिस्तनयोरवेः २ ॥
स्वारोचिषेन्तरेसर्वेचैत्रवंशसमुद्भवः सुरथोनामराजाभूत्समस्तेक्षितिमण्डले ३ ॥
तस्यपालयतःसम्यक्प्रजाःपुत्रानिवौरसान् बभूवुःशत्रवोभूपाःकोलाविध्वंसिनस्तदा ४
तस्यतैरभवद्युद्धमतिप्रबलदण्डिनः न्यूनैरपिसतैर्युद्धेकोलाविध्वंसिभिर्जितः ५ ॥

मन्वंतरंकिंचिदधिकैकसप्ततियुगात्मकःकालः यथेत्यनेनतथातेप्रकारंनिष्पाद्यमयेत्यनुषंगोदर्शितः भागंमगसमूहः येस्य
यशसमग्रस्यवीर्यस्ययशसःश्रियः ज्ञानवैराग्ययोश्चैवषण्णांभगइतीरणा इतिविष्णुपुराणात् २ स्वारोचिषइति स्वारो
चिषमन्वंतरेस्वारोचिषाधिकारोपलक्षितेद्वितीयमन्वंतरे पूर्वमिति कथाकालापेक्षयाचैत्रस्यैवमनोःसुतःनामेतिप्रसिद्धौना
मनामिनोरभेदाद्वानामराजेतिसमानाधिकरण्यं ३ तस्येति सम्यक्नीतिशास्त्रानुसारेणकोलास्वप्यसैवराजधानीतरेन
धाप्रतिशयेनकोलाविध्वंसिनइत्यर्थः ४ तस्यतैरिति अतिप्रबलदण्डकर्त्तुः बाहुत्वात्कर्मधारयाद्धिति इदंप्रासजया
निमित्तं न्यूनैरल्पसाधनैः ५ २ २ २ २ २ २ २ २ ३

ततइति ततः भंगानंतरं तैः प्रबलैः शत्रुभिराक्रांतो महाभागः स्वपुरमायातः निजदेशाधिपएवाभवत् न सार्वभौम इत्यर्थः भा
वोत्तजन्मभवजन्मांतरीणमहाराज्यपुण्यशेषत्वमहाभाग इत्युक्तं ६ अमात्यैरिति ततः तस्य सार्वविभक्तिकस्तसिः तत्र स्वपु
रेपि कोशोर्थसंचयः बलं सैन्यं चापहृतम् आत्मसात्कृतं दुष्टत्वं राजविषयद्वेषवत्त्वं दुरात्मत्वं राज्यलोभाक्रांतत्वं दुर्बलत्वं हीनब(
लत्वं रिपुकृताभिभवात् ७ ततइति हृतस्वाम्यः हृताधिपत्यः एकाकी असहायः ८ सतत्रेति मेधा इति ऋषिनाम वस्तुतो वा(
सिष्ठस्य नामांतरमिदं अस्य च यः सावर्णतायां महालक्ष्म्या ममानेन जन्मानि चरितैः सार्द्धं स्तोत्रैर्वेदवादिना कथितानि शृ(
शक्रवसिष्ठेन महात्मना स्वायंभुवेंतरे राज्ञे सुरथाय महात्मने समाधये च वैश्याय प्रशान्ता यावसीदत इति तन्त्रोक्तेः श्रीशा(

ततः स्वपुरमायातो निजदेशाधिपोभवत् आक्रांतः स महाभागस्तैस्तदा प्रबलारिभिः ६ अमात्यैर्बलिभिर्दुष्टै
र्दुर्बलस्य दुरात्मभिः कोशो बलं चापहृतं तत्रापि स्वपुरे ततः ७ ततो मृगयाव्याजेन हृतस्वाम्यः स भूपतिः एकाकी
हयमारुह्य जगाम गहनं वनम् ८ स तत्राश्रममद्राक्षीद्द्विजवर्यस्य मेधसः प्रशान्तश्वापदाकीर्णं मुनिशिष्योपशो
भितम् ९ तस्थौ कंचित्स कालं च मुनिना तेन सत्कृतः इतस्ततश्च विचरंस्तस्मिन्मुनिवराश्रमे १० सोचिंतय
त्तदा तत्र ममत्वाकृष्टचेतनः मत्पूर्वैः पालितं पूर्वं मया हीनं पुरं हि तत् ११ मद्भृत्यैस्तैरसद्वृत्तैर्धर्मतः पाल्यते न वा न जा
ने स प्रधानो मे शूरहस्ती सदामदः १२ मम वैरिवशं यातः कान्भोगानुपलप्स्यते ये ममानुगता नित्यं प्रसादधन
भोजनैः १३ अनुवृत्तिं ध्रुवं तेद्य कुर्वंत्यन्यमहीभृताम् १४ ॥ ॥ ॥ मामाय स नतं नमः ॥ ॥

स्वपुरमायात इत्यादि प्रश्नमेधसः समाधिं सापयामास सुरथाय समाधय इत्यध्याहारः प्रशांतत्वं परहिंसाविरतत्वं मुनिशिष्यैरुप
शोभितमित्यर्थः तस्थाविति केंचित्कालमिति कालाध्वनोरत्यन्तसंयोगे द्वितीया इतस्ततश्च अनियतदेशे मुनिवरेति मुनिश्रेष्ठैः साधनमा
श्रमविशेषणं वा १० सोचिंतयदिति ममेति मुख्यमेतच्छब्दप्रकृतिकमव्ययम् तस्य भावो ममत्वं ममेदमिति अभिमानः तेनाकृष्टा निरुद्धा
गोदपकृष्टा चेतना बुद्धिर्यस्य सः मत्पूर्वैः पूर्वजैरित्यर्थः हीनं पादपूरणे तु अन्यश्लोकेनान्वयः ११ मद्भृत्यैरिति तथा पालनहेतुरसद्वृत्तै
रिति प्रधानो मे सामात्यैः सहितः स प्रधानः शूरहस्तीति कर्मधारयः किमवस्थ इति न जाने इत्यन्वयः १२ ममेति वैरिणां वशंगतः का(
न्कियतः कीदृशान्वा न जाने इत्यस्यानुषंगः १३ अनुगताः सेवकाः सेवकत्वे हेतुः प्रसादेत्यादि प्रसादस्तुष्टिदानं धनं हिरण्यादि भोजनं

दु॰ टी॰
५

असम्यगिति आयव्ययसीयोऽशाधिकोव्ययोऽसमस्तद्व्ययः सततमित्यसमसंक्रोशो धनम्ले अल्पदत्तमपि १५ तत्रेति आश्रमाभ्य-
शाद् इतिः विप्रेति माध्रुतिसंबोधनं मेधोर्ष्यकृतया आश्रमविशेषणं वा आश्रमाभ्याशे निकटे स वैश्यः भो इत्यामंत्रणे यद्यपि भो इत्यामंत्रणं
ब्राह्मणविषयमेवोचितं तथाप्याश्रमे ब्राह्मणान्नामेव संभवमालोच्य तद्धर्मेणैतदुक्तिः अत्र आश्रमे १६ सशोक इति इत्थं वियो-
गादु चिंतनं शोकः दुःखानिर्वेधनं चित्तव्याप्तिः दौर्मनस्यं तथा कइव दुःखपदं तनुशरीरं तात् दुर्मनाः इव कियास्यास्य योगे इत्याक-
र्ण्येति श्लोकः स्पष्टार्थः प्रणयो विश्रंभः प्रश्रयो विनयः १७ मार्कंडेयेन पृष्टस्तमवृत्तान्तं कि वैश्य उवाच
ति जिज्ञासामालक्ष्य मार्कंडेयः प्राह वैश्य उवाच समाधिरिति असाधुभिः पुत्रदारैर्धनलोभान्निरस्तः अधिक्षिप्तोऽभवमिति शेषः इत्यावत्र

असम्यग्व्ययशीलैस्तैः कुर्वद्भिः सततं व्ययम् संचितः सोतिदुःखेन क्षयं कोशो गमिष्यति एतच्चान्यच्च सततं चिंतयामास
स पार्थिवः १५ तत्र विप्राश्रमाभ्याशे वैश्यमेकं ददर्श सः स पृष्टस्तेन कस्त्वं भो हेतुश्चागमनेऽत्र कः १६ सशोक इव कस्मा-
त्वं दुर्मना इव लक्ष्यसे इत्याकर्ण्य वचस्तस्य भूपतेः प्रणयोदितम् प्रत्युवाच स तं वैश्यः प्रश्रयावनतो नृपम् १७ वैश्य उवाच
समाधिर्नाम वैश्योऽहमुत्पन्नो धनिनां कुले पुत्रदारैर्निरस्तश्च धनलोभादसाधुभिः १८ विहीनश्च धनैर्दारैः पुत्रैरादाय मे धन-
म् वनमभ्यागतो दुःखी निरस्तश्चाप्तबंधुभिः १९ सोहं न वेद्मि पुत्राणां कुशलाकुशलात्मिकाम् प्रवृत्तिं स्वजनानां च दारा-
णां चात्र संस्थितः २० किं नु तेषां गृहे क्षेमम् अक्षेमं किं नु सांप्रतम् कथं ते किं नु सद्वृत्ता दुर्वृत्ताः किं नु मे सुताः २१ राजोवाच
यैर्निरस्तो भवान् लुब्धैः पुत्रदारादिभिर्धनैः तेषु किं भवतः स्नेहमनुबध्नाति मानसम् २२ वैश्य उवाच एवमेतद्यथा प्रा-
ह भवानस्मद्गतं वचः किं करोमि न बध्नाति मम निष्ठुरतां मनः २३ यैः संत्यज्य पितृस्नेहं धनलुब्धैर्निराकृतः पतिस्वज-
नहार्दं च हार्दि तेष्वेव मे मनः २४

चात्यैरपीत्यर्थः १८ विहीनश्चेति सार्धः पुत्रैर्मे धनमादाय गृहीत्वा धनैर्विहीनश्च आप्तशब्दा-
दाप्ता सुहृदितः कृतोऽहम् धनहीनत्वादेवाप्तैः सुहृद्भिर्बन्धुभिः च निरस्तस्त्यक्तोऽहं वनमभ्यागतः इत्यन्वयः १९ सोहमि-
ति अत्र वने स्थितो २० तामेव विवृणोति किं न्विति किं न्विति हर्षे वितर्के तेषां पुत्रदारस्वजनानां गृहे क्षेमम् आरोग्यादौ कथं ते किं-
विधास्ते दुर्वृत्ता दुराचाराः सदाचारसंपन्नता २१ राजोवाच यैरिति धनैरिति भर्त्सनरूपनिरासहेतुः किमिति प्रश्ने २२
वैश्य उवाच एवमित्यस्मद्गतम् अस्मदीयविषयकम् २३ यैरिति यैः पुत्रदारस्वजनैः पतिहार्दं स्वजनहार्दं स्नेहं तेष्वपि तयाविधेषु
पि॰ स्वजनहार्दं

पतिस्वजनहार्दं च

फि॰

५

किमेतदिति तेषां दोषं जानन्नपि यन्न विगुणेष्वपि बंधुष्वेवं प्रेमप्रवणं चित्तं करोमि तत्किमिति कस्माद्धेतोरेतन्न जानामीत्यन्वयः २५
तेषामिति तन्निमित्तं यन्मे निःश्वासादिकं जायते अप्रीतिषु प्रीतिरहितेष्वपि यन्मे मनो निष्ठुरं न तत्किं करोमीत्यन्वयः २६ मार्कं
डेय उवाच तत इति सहितौ मिलितौ तेन संगतौ समुपस्थितौ समुपसन्नौ २७ कृत्वेति यथान्यायं यथाशास्त्रं यथार्हं योग्यं संविदं सं
भाषां उपविष्टौ अनंतरं भाविन्यर्थे त्वेनोपवेशितावित्यर्थः तेनेति कर्त्तरि तृतीया काश्चित्स्वप्रस्तावविषयाः २८ राजोवाच भगव
न्निति वदस्वेति यत्तदर्थे आत्मनेपदं यत्तेन वदेत्यर्थः एकं रहस्यं तदाह येन मनसः संकल्पविकल्पात्मकस्यांतःकरणस्य स्व
चित्ते निश्चयात्मके स्वस्वरूपे आयत्ततां निरोधं विना दुःखाय घटते इत्यन्वयः संकल्पविकल्पात्मकमेव मनोन्तःकरणं न निश्चयात्मक

किमेतन्नाभिजानामि जानन्नपि महामते। यत्प्रेमप्रवणं चित्तं विगुणेष्वपि बंधुषु २५ तेषां कृते मे निःश्वासो दौ
र्मनस्यं च जायते। करोमि किं यन्न मनस्तेष्वप्रीतिषु निष्ठुरम् २६ मार्कंडेय उवाच। ततस्तौ सहितौ विप्र तं मुनिं समु
पस्थितौ समाधिर्नाम वैश्योसौ स च पार्थिवसत्तमः २७ कृत्वा तु तौ यथान्यायं यथार्हं तेन संविदम्। उपविष्टौ कथाः
काश्चिच्चक्रतुर्वैश्यपार्थिवौ २८ राजोवाच। भगवंस्त्वामहं प्रष्टुमिच्छाम्येकं वदस्व तत्। दुःखाय यन्मे मनसः स्व
चित्तायत्ततां विना २९ ममत्वं मम राज्यस्य राज्यांगेष्वखिलेष्वपि। जानतोपि यथाज्ञस्य किमेतन्मुनिसत्तम ३० अ
यं च निकृतः पुत्रैर्दारैर्भृत्यैस्तथोज्झितः। स्वजनेन च संत्यक्तस्तेषु हार्दी तथाप्यति ३१ एवमेष तथाहं च द्वावप्यत्य
न्तदुःखितौ। दृष्टदोषेपि विषये ममत्वाकृष्टमानसौ ३२ तत्केनैतन्महाभाग यन्मोहो ज्ञानिनोरपि। ममास्य च भवत्येषा वि

मतो न मे तन्निर्णये अधिकार इति भावः २९ दुःखहेतुमाह ममत्वमिति राज्येति सम्बन्धसामान्ये अवयवविवक्षया षष्ठी राज्यस्यार्थः
तेषु मदीयत्वं जानतोपि मम यथाज्ञस्य अज्ञस्येव राज्यादिषु ममत्वं एतत्किं किंनिबंधनमित्यर्थः स्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्ग
बलानि च राज्यांगानि प्रकृतयः पौराणां श्रेणयोपि च एषु ममत्वं प्रधानम् ३० नाहमेव तथायमपीत्याह अयं चेति निकृतः
तिरस्कृतः उज्झितस्त्यक्तः नीतमुपसर्गं संत्यक्तः तेष्वितिसप्तमी ३१ एवमिति विषये राज्यपुत्रादौ ममत्वेनाकृष्टं विषया
धीनं कृतं मानसमंतःकरणं ययोस्तौ ३२ तत्केनेति ज्ञानिनोर्विषये दोषवत्त्वज्ञानवतोरपि ममास्य चैतन्मोहो उभयत्र
दृष्टमोहस्य हेतुमाह यतस्त्वाज्ञानाविवेकात् अविवेकतो भवति न तु ज्ञानवतां विवेकवतामिति भावः।
साधूक्तेति भावः ३३

दु. टी.
ना.
५

अथोत्तरमाह ऋषिरुवाच ज्ञानमिति न तु ज्ञानमात्रस्य मोहवैयधिकरण्यं तु वाधिमते ज्ञानविशेषस्य वा माहः सर्वस्यैव निर्मोह(
त्वप्रसंगादित्याह ज्ञानमिति अयमर्थः नत्वयापीत्यनेन सर्वं दुःखिप्राणे विषिणोति तत्र प्राणीति विषयो वंधकः तद्रूपे गोचरे विषये ज्ञानं
सर्वस्य जन्तोरस्ति न च मोहाभाव इत्याह विषयश्चेति एवं च स्वमूलाण्हत्य कृपपृथक् भिन्नभिन्नप्रकारेण ज्ञानविशुष्ठं यातीत्यर्थः २४
तदेवाह दिवांधा इति केचिदुलूकादयो दिवा ज्ञानाभाववंतः केचित्काकादयो रात्रौ केचित् किं तु लूकादयो मार्जारादयश्च दिवा रात्रौ च तु(
ल्यदृष्टयः अंधा अनंधाश्चेत्यर्थः एवं च ज्ञानमात्रस्य मोहवैयधिकरण्ये दिवादौ उलूकादीनां मोहो न स्यादिति भावः किं च सहसादी
नां दिवारात्रौ च विषयज्ञानवतां न कदाचिदपि मोहः स्यात् किं तूलूकादीनां सर्वदैव मोहप्रसंग इति तेषामपि किंचिद्विषये मोहदर्शना(

ऋषिरुवाच ज्ञानमस्ति समस्तस्य जंतोर्विषयगोचरे विषयश्च महाभाग याति चैवं पृथक् पृथक् २४ दि(
वान्धाः प्राणिनः केचिद्रात्रावंधास्तथापरे केचिद्दिवा तथा रात्रौ प्राणिनस्तुल्यदृष्टयः २५ ज्ञानिनो मनुजाः स
त्यं किं तु ते न हि केवलं यतो हि ज्ञानिनः सर्वे पशुपक्षिमृगादयः २६ ज्ञानं च तन्मनुष्याणां यत्तेषां मृगपक्षि
णाम् मनुष्याणां च यत्तेषां तुल्यमन्यत्तथोभयोः २७ ज्ञानेपि सति पश्यैतान् पतंगाञ्छावचंचुषु कणमो
क्षादृतान्मोहात्पीड्यमानानपि क्षुधा २८ मानुषा मनुजव्याघ्र साभिलाषाः सुतान्प्रति लोभात्प्रत्युपकाराय
नन्वेतान्किं न पश्यसि २९

त् एवं ज्ञानमात्रस्य मोहवैयधिकरण्ये सापि ज्ञा ज्ञानाभावस्य मोहसामानाधिकरण्यमित्युक्तं भवति २५ ।
ननु मनुष्या एव मे ज्ञानित्वेनाभिमता इति चेत्तत्राह ज्ञानिन इति मनुजा ज्ञानिन इति मतं सत्यं एकं तु ते केवलं ज्ञानिन एव किं तु स
यमेव तिर्यक्त्वात् नरस्यापि न हि किं तु ज्ञानशबलित ज्ञानिन इत्यर्थः एवं ज्ञानेन ज्ञानित्वाभिमानस्तत्र उक्तः यतः सर्वे पश्वादयोपि एव
सति ज्ञानिन एव तुः हिरेवार्थो भिन्नक्रमः सर्वपशुत्वेनैव सिद्धे मृगग्रहणं तद्विशेषप्रतिपत्त्यर्थं २६ न मे वाच्यं मनुष्याणां पश्वादिभिस्तुल्यत्वप्र
२४ तिपादने हेतुमाह ज्ञानं चेति यत्तु आहारनिद्रादि मनुष्याणां च यत्तेषां मृगादीनामित्यर्थः अन्यदाहारभयमैथुननिद्रारूपमपि उभयो
स्तुल्यं साधारणमित्यर्थः २७ अथ क्रियासाम्यमपि मनयोरस्तीत्याह ज्ञानेपीति तद्योजनेन नास्माकं त्वमिरिति ज्ञाने सत्यपि पतंगानिति
निरन्नशावस्वशरीरापेक्षया बहिरंगेष्वपि प्रतिप्रीतिरिति २८ तेषु मोहज्ञानयोः सामानाधिकरण्यमुपपाद्य मनुष्येष्वप्याह मानुषा इति या
व्याघ्रः श्रेष्ठवाची मानुषा लोभात्प्रत्युपकारलोभात् सुतान्प्रति साभिलाषाः एतेन सुताभ्युदये निश्चयेन प्रत्युपकाराय न भवति इदं किं न पश्यसी
त्यर्थः एवं च व्यवहारं पश्यतोपि ग्रंथः ग्रंथतः सुतान्प्रति साभिलाषाः इति मोहज्ञानयोः सामानाधिकरण्यं मनुष्येष्वपीति भावः २९ ।

मा

नन्वेवंविधव्यवहारदर्शिनां संसाराद्विरतिः कुतो नेत्यत आह तथापीति एवंविधलोकव्यवहारसाक्षात्कारेऽपि तथापीत्यर्थः
महामायाप्रभावेण कथं मुममतामेव मे इति बुद्धिरेव भ्रामकत्वादावर्त इवावर्तः संसारे पुनः पुनः भ्रावर्तकत्वात् मोहगर्ते निपाति
ताः मानवाः संसारस्थितिमेव कुर्वन्ति न तु ततो विरज्यन्त इत्यर्थः आवर्त्तोऽम्भसां भ्रमः ५० ननु मायायाः आत्मशक्तिरत आह त
दिति योगनिद्रा तमःप्रधाना शक्तिः एतज्जगत्तया संमोह्यत इत्यन्वयः जगत्पतिरिति तेन तस्या मोहकत्वे हरिरूपभावः सूचितः ५१ अवा
न्तरज्ञानां संसारिणां का वार्ता अपक्वकषायाणां योगिनामपि सा मोहिकेत्याह ज्ञानिनामपीति आकृष्येत्यस्य विवेकादिति शेषः मो
हाय प्रयच्छति मोहवशिकरोतीत्यर्थः ५२ तत्कुत इत्यत आह तयेति तयाखिलप्रकृत्येत्यर्थः एवं च सकलत्वस्याविहितदयैव सभा

तथापि ममतावर्ते मोहगर्ते निपातिताः । महामायाप्रभावेण संसारस्थितिकारिणः ५० तन्नात्र विस्मयः
कार्यो योगनिद्रा जगत्पतेः । महामाया हरेश्चैषा तया संमोह्यते जगत् ५१ ज्ञानिनामपि चेतांसि देवी भगवती
हि सा । बलादाकृष्य मोहाय महामाया प्रयच्छति । तया विसृज्यते विश्वं जगदेतच्चराचरम् । सैषा प्रसन्ना वरदा ।
नृणां भवति मुक्तये ५३ सा विद्या परमा मुक्तेर्हेतुभूता सनातनी । संसारबन्धहेतुश्च सैव सर्वेश्वरेश्वरी ५४
राजोवाच । भगवन्का हि सा देवी महामायेति यां भवान् । ब्रवीति कथमुत्पन्ना सा कर्मास्याश्च किं द्विज ५५ ॥

त्यर्थः विश्वं समस्तं नन्वेवं मुक्तिर्दुर्लभैवास्यादत आह सैषेति मोहकारणमपि सा उपासनादिभिः स्वार्पितनित्यकर्मादिभि
प्रसन्नामोक्षायवरदा भवति ५३ ननु केवलं बन्धमोक्षौ भवत इत्युपपन्नमत आह साविद्येति सर्वेश्वरस्येश्वरी ईश्वरत्व
संपादिका अनेन काचिदसंभावनानास्तीत्यर्थः किंच विद्याविद्युभयरूपत्वादपि न तदसंगतिरित्याह परमेति मुक्तेर्हेतुः साध
नीभूता विद्या ब्रह्मज्ञानरूपा सैव सनातनी आदिरहिता च संसारबन्धहेतुरविद्या च सैवेत्यर्थः एवं चाचिन्त्यरूपत्वमयात्मकत्वा
भयरूपत्वोपपत्तिरिति भावः तथा च कौर्मे प्रथमेऽध्याये समुद्धृतलक्ष्म्याने इयं सा परमा शक्तिर्मन्मयी ब्रह्मरूपिणी मायाममप्रियानन्ता
ययेदं मोहितं जगत् अनयैव जगत्सर्वं सदेवासुरमानुषम् मोहयामि द्विजश्रेष्ठ ग्रसामि विसृजामि च विद्यया वीतमव्यात्मानं तरंति विद्वा
सामिमाः सैषा सर्वजगन्मूर्तिः प्रकृतिस्त्रिगुणात्मिकेति ५४ विशेषजिज्ञासया पुनः पृच्छति राजोवाच भगवन्निति का किंजातीया को।
कथं०

गु

दु॰ टी॰ ना॰ ६ यत्स्वभावेत्यादिना स्वभावेस्यैव निर्गुणत्वं निर्विकारत्वं प्रश्नत्रयं च पूर्वत्र विदांवरेत्यनेन तच्छ्रोतुमिच्छामि सर्वप्रकरणस्य श्रुतिशिरोगुणात्वेत्वं स्फोरितम् ४६ उत्तरयति ऋषिरुवाच नित्यैवसेति जगन्मूर्त्तिरित्यनेन नतु व्यक्तशरीराभावो बोधितः जगदाश्रयभूताशक्तिरित्यर्थः केन जातिप्र
श्नोत्तरं च स्वरूपप्रश्नोत्तरं च ॥ तयासर्वमिदं ततमित्यनेन स्वभावोत्तरम् स्वस्वभावेत्यर्थः ततं विस्तारितमित्यर्थः व्याप्तमित्यर्थकत्वे चि
त्स्वभावेत्यर्थः नित्यत्वेनेव मुत्पत्त्यभावात् कारणस्य सुतराम भावेन गौणी कारणत्वमेवेति दर्शितम् तेनोत्पत्तिकारणप्रश्नोत्त
रं सप्तशतिः गौणीत्वा यमेत्यपादानस्य शेषत्वविवक्षया षष्ठी मन्तव्यं ४७ देवानां कार्यसिद्ध्यर्थमिति कर्मप्रश्नोत्तरं अनेनैव द
वशक्तिनया ग्राविर्भावस्य धननात् कथमुत्पन्ने सत्यमिति किंच जगन्मूर्त्तिरित्यनेन विराड्रूपत्व मुक्तं विराट्च सर्वावताराणां मूलं नवरूपो
दरूपं भगवान्महदादिभिः संभूतं षोडशकलमादौ लोकसिसृक्षयेत्यादिना वैराजं रूपमुक्तं एतन्नानावताराणां निधानं बीजमव्य
श्रीः १ यस्यांशेन सृज्यंते देवतिर्यङ्नरादयः इति भागवतोक्तेः निधानं कार्यावसाने प्रवेशस्थानं बीजं सूक्ष्मकारणं प्रत्ययस्य यस्यावि
र्भावस्थानमनेनचिदानंदस्यैव मायया तच्छरीरत्वेन रक्षणात् तत्र कर्म तत्राणं पुराणे स्त्रीरूपमत्स्यदेवतामादेदोनास्य विजायते किं

यत्स्वभावा च सा देवी यत्स्वरूपा यदुद्भवा तत्सर्वं श्रोतुमिच्छामि त्वत्तो ब्रह्मविदांवर ऋषिरुवाच नित्यैव सा जगन्मूर्त्तिस्तया स
र्वमिदं ततम् तथापि तत्समुत्पत्तिर्बहुधा श्रूयतां मम ४७ देवानां कार्यसिद्ध्यर्थमाविर्भवति सा यदा उत्पन्नेति तदा लोके सा नित्या

तानिदैत्यैर्बहुतेसुरविमोचनाय महिषासुरादीनां अभिधीयते ४८ महत्स्वरूपं प्रकाशयति सैवैवं जनितृत्वेनेच्छापरा तथा
परस्य मोहाद्यर्थं परेषां च कविलक्षणत्वं दुःखानां च प्रमादीषुदर्शयेत् सुरूपेण यथा सैव रम्यामधुपानं कृष्णादिकं वा सा तस्य तत्र
चितमस्वरूपेण मोहाभावाय तेषां तद्दृश्ये ज्ञानजोदृशिः कुमोहात्मकदेहे पितामहदेहस्य देहवत् लोकानां दर्शयामास स्वरूपमहत्वाद
निमिति वर्तितहे भगवत्या अवतारेष्वेव मेव विलोलित्वपलक्षणम् एवं च तस्या अवतारे शोकफलम् रावणस्येश्वरत्वबुद्धिप्रतिबन्धेन प्र
मभा ? भावो मल्लास्मित्यसि प्रत्यक्षानिति केनरणाभावस्य तेन चतेनात् मत्पा ब्रह्मा रक्षितस्य मत्समेति तस्मै संचिनागतमिति प्रत्ययस्य वा रे
त्यादिना भगवतः स्वरूपफलवचनम् यद्यपि तामहकृष्णो विरज्ञो शमस्यैव कर्मस्य चतत्त्वमस्या अवतारो तथापि तत्रात्मज्ञाननाटनं भू
यस्त्वज्ञाननाटनं स्वरूपम् शंखचक्रादिधारणं तन्निरूपाभिगो विंदाद्यनेक भगवन्नामधारणं चैषां तावन्मात्रेण कृष्णस्य भगवान्त्वयम्
मित्युक्तिः न तु रामादीनाम भगवदवतारत्वेन रामे लाघिमेधादेर्बलोकदानादिना ज्ञानकलादिः करणात् प्रज्ञानादिः क
रणफलं तत्क्रमेवेत्यलं विस्तारेण ४८ रामाय नमः ॥ ६

कथं देवपार्थेन यातत्कार्यसिद्ध्यर्थमवतारिष्यतीति जिज्ञासां निवर्तयितुं मोहकारणस्यैव चरित्राणि प्रपञ्चयन्नादौ मोहिकायाः स्तुतिमाह प्रथ-
मायाप्रवर्तनरूपं मधुकैटभवधमाह योगनिद्रामिति कल्पान्ते ब्रह्मदिनान्ते योगनिद्रानाम्नीं सा च तमोगुणमयीं कालीशक्तिं भगवान् उ
पाश्रित्य संचरन्भूतानामागतिं गतिम् वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति उक्तलक्षणः तेन भूतानां प्रलयकाले तानात्मीय
पालनव्यवहारतिरोधानमन्तरा तदसंभवं मत्वा स्वपालनव्यवहारतिरोधायिकां तामसीं शक्तिमभजत् एतेनैतत्तयाऽऽत्मानमाच्छा
दयतीति सूचितम् प्रभुरित्यनेन स्वेच्छया तदङ्गीकारः न तु तया बलादस्यावरणमिति निरूपितम् अत एव योगनिद्रेत्युक्तम् तेन इतरजन
निद्रावन्मोहरूपावस्थापादनी न भवति लीलया सलीलं लोचनपिधानमात्रं करोति तदुक्तं हरिवंशे सा वी सर्वं दूरस्थैव मायया
विष्णोः शरीरजा सैषा नारायणमुखे स्थिता कमललोचनेति तेन अन्तः स्वस्वरूपज्ञानानावरकत्वं दर्शितम् ४९ तदेति मलोद्भूता
वित्यनेनानयोरतितामसत्वं सूचितं इत्यस्यायुष्यम् योगनिद्रैव स्वदक्षिणवामदलस्थकनिष्ठिकाभ्यां भगवत्कर्णयोर्मलं निःसार्य

योगनिद्रां यदा विष्णुर्जगत्येकार्णवीकृते । आस्तीर्य शेषमभजत्कल्पान्ते भगवान्प्रभुः ॥ ४९ ॥ तदा द्वावसुरौ घोरौ विख्यातौ मधुकैटभौ ।
विष्णुकर्णमलोद्भूतौ हन्तुं ब्रह्माणमुद्यतौ ॥ ५० ॥ स नाभिकमले विष्णोः स्थितो ब्रह्मा प्रजापतिः । दृष्ट्वा तावसुरौ चोग्रौ प्रसुप्तं च
जनार्दनम् ॥ ५१ ॥ तुष्टाव योगनिद्रां तामेकाग्रहृदयस्थितः । विबोधनार्थाय हरेर्हरिनेत्रकृतालयाम् ॥ ५२ ॥ विश्वेश्वरीं जग-
द्धात्रीं स्थितिसंहारकारिणीम् । निद्रां भगवतीं विष्णोरतुलां तेजसः प्रभुः ॥ ५३ ॥

तौ निर्मितवतीति कालिकापुराणे भवन्तौ च भगव
तोऽस्याधमूर्त्या यावद्व्याप्तं तस्मैलस्य स्वविषयकवरदानेन क्रियत इति तयोर्भगवन्मावरोहणं स्मर्यते च ५० ब्रह्माणमिति आह सर्वा
भीति प्रजानां पतिर्नियन्तेति ब्रह्मणो विशेषणं प्रसुप्तमित्यस्य पालनव्यवहारम् ५१ तुष्टावेति सपत्काग्रमनाः तन्मनिषद्धृदयस्य स्मृताह
शः स्थितः स च इत्यर्थः हृदयस्थितः ... विस्मृतिलोपः विबोधनाय पालनव्यवहारप्रवृत्यर्थं नेत्रप्रलयमेव सर्वांग
स्थितत्वात् लोके नेत्रयोरेव योगनिद्राभिव्यक्तिमत्वान्नेत्रस्थितिः ५२ योगनिद्रायां ... विश्वेश्वरीमि
ति नवभिर्विशेषणैराह जगद्धात्रीमित्यादि धात्रीं जननीं अनेन जगदुत्पत्तिस्थितिलयकर्तृत्वं ब्रह्मलिङ्गं दर्शितम् अतुलामित्यन्तानि वि
शेषणानि तेजसः प्रभुरिति ब्रह्मविशेषणं तत्त्वमनेनास्य बोधसाधनत्वं विष्णोः सकाशात् तरमोहकत्वम नाश्रयेमि
त्यपि ध्वनितमिति प्रापितार्थः वस्तुतो विष्णोरिति षष्ठ्योः शिव इति वस्त्री विष्णुरूपा निद्रामित्यर्थः ब्रह्मापि सर्वेश्वरः सर्वशक्तिर्यो लो
कानुग्रहाय सर्वमोहिनं स्वकृतः ... भगवतीं ... सार्वज्ञ्यादिधर्मरूपकमेदर्शयितुमेवेति न कश्चिद्विरोधः ५३

दु. टी. ना. ७

कथं तुष्टावेत्याह ब्रह्मोवाच त्वमिति स्वाहा देवहविर्दाने मंत्रोग्निपत्नी च स्वाहा देवतेनेनैतदुक्तं भवति यज्ञरूपा चेत्यर्थः स्वधा पित्र्यर्थदान
मंत्रः पितृपत्नी च वषट् क्रियते येन स वषट्कारो मंत्रः एते देवाक्रान्ताः स्वराः उदात्तादयः सुधा देवान्नं अक्षरे च नाशपरिणामही
ने नित्ये जन्मनाशहीने प्रणवे अकारादिरूपेण त्रिधा मात्रात्मिका ह्रस्वदीर्घप्लुतरूपा अर्धमात्रास्थिता अविशेषतः कथमप्युच्चारयितुम
शक्या अनुच्चार्या त्वमेवेति तुरीयरूपा विशेषतः सर्वरूपा प्रणवरूपा या मात्रात्रयमकारोकारमकारात्मकम
तदूर्ध्वमर्धमात्रा तत्र मात्रात्रयं नादस्वरूपं सुषुम्नायां निरुद्धजनसुखासीनिः तत्र अर्धमात्रा तुरीया नादस्वरूपा निरुक्ता शिवशक्तिमयी या
ऽऽद्या सा त्वमेव मात्रात्रयातिरिक्ता अक्षरस्थिता सा त्वं त्रिपुरा इति ५४ त्वमेवेति सा त्वमेवेति सन्ध्या
सुविदुरि त्वं सावित्री तत्सवितुरित्यादिरूपा वेदमाता चेत्यर्थः देवि त्वं परा उत्कृष्टा जननी सर्वजनकत्वात् सर्ववाग्जननी परा च सावित्री

ब्रह्मोवाच त्वं स्वाहा त्वं स्वधा त्वं हि वषट्कारः स्वरात्मिका। सुधा त्वमक्षरे नित्ये त्रिधा मात्रात्मिका स्थिता ५४ अ
र्धमात्रास्थिता नित्या यानुच्चार्या विशेषतः त्वमेव संध्या सावित्री त्वं देवि जननी परा त्वयैतद्धार्यते सर्वं त्वयै
तत्सृज्यते जगत् ५६ त्वयैतत्पाल्यते देवि त्वमत्स्यन्ते च सर्वदा विसृष्टौ सृष्टिरूपा त्वं स्थितिरूपा च पालने
५७ तथा संहृतिरूपान्ते जगतोऽस्य जगन्मये महाविद्या महामाया महामेधा महास्मृतिः ५८ महामो
हा च भवती महादेवी महासुरी प्रकृतिस्त्वं च सर्वस्य गुणत्रयविभाविनी ५९

त्वमेव धात्री तद्रूपा च सर्वं जगत् त्वयैव धार्यते सर्वधारणशक्तिमती पृथिवी त्वमेव अयं पञ्चभूतानि सर्वजगज्जननसामर्थ्यकानि एत
सि अग्निरूपेण आत्मसात्करोषि सदा एवं त्वं ब्रह्मादिरूपेणासि तत्र ५६ सृष्ट्यादिक्रियारूपा त्वमेवेत्याह विसृष्टाविति सृज्यन्ते
जगत् कालरात्रिकाले ५७ तथेति जगन्मये जगन्मय्येत्याभीरीत्यर्थः महाविद्या महावाक्यलक्षणा महामाया सच्चिदानन्दात्मक
विश्वसारिणी परिणामिनी त्रिरूपा नाम्नीत्याद्यभावात् सर्वलीला विद्या महामेधा भगवतः सर्वज्ञत्वशक्तिः महास्मृतिः विधेः स्रष्टुः कल्पातीत
कल्पगतसकलवस्तुस्मृतिरूपा वेदरूपा च ५८ महामोहेति संसारमूलकारणरागरूपमोहस्वरूपा महामोहजनककाम
रजोबीजरूपा च महादेवी सकलदेवशक्तिरूपा महासुरी हिरण्याक्षादिशक्तिरूपा सत्त्वरजस्तमोरूपगुणत्रयविभाव्यते
यया सा सर्वस्य जगतः प्रकृतिर्मूलप्रधानं त्वमेव एतेन परमात्मादीनामपि मूलकारणत्वमित्याह ५९ ॥ ॥

कालरात्रिरिति कालरात्रिः सर्वजंतुमरणोपलक्षिता कल्पांतरात्रिः महारात्रिः ब्रह्मप्रलयोपलक्षिता महाप्रलयरात्रिः मोहरात्रिः म
मत्तावृत्तमोहरात्र्यंतकालिनी महामायाख्या संसारनिवृत्ती उक्तंच दंष्ट्राकरालकालाग्निरुद्रकल्पातिदारुणा मोहरात्रिर्मोहनत्वेन जगतस्तेन
गवकरीति दारुणा नेवासांबलता नातिदीर्घकाटिनिर्दयत्वेन मोहरात्रिर्निशाच प्रमाणस्तु उक्तमोहरात्रिनिशा दिवसनाम्विवीतिहृदिवेशा
शक्तिः कैः श्रीः संपत्तलक्ष्मीबीजंच ईश्वरीऐश्वर्यशक्तिः कामराजबीजंच ह्रीं भुवनेशीबीजं प्रकृतिरूपामेको ह्रारः बोधो निश्चयात्मकज्ञानल
क्षणस्वरूपं यस्याः सा ह्रीः बुद्धिरंतःकरणं तन्मयेत्यर्थः ६० लज्जेति लज्जांतःकरणवृत्तिविशेषः प्रसिद्धरूपा वधः तद्विदिगनाथोटन
छं= वर्त्तुष्टिवृद्धिः शांतिर्विषयेभ्यो रहितिर्योपरमः क्षांतिः सहनाशक्तिः पराभवादिसहना एवकारान्तो नियमनं नेरयोज्याः घोरा एकदृश
स्यशिरसामभयंकरी ६१ शंखिनीति बाणभुशुंडीपरिघायुधानिधारिणः सा अनेनाभयाः कपालकृतैश्चलितम् वैकालिके

श्री ह्रीं रित्यत्र वीजपक्षेऽनुनासिकलोपश्छान्दसः

कालरात्रिर्महारात्रिर्मोहरात्रिश्च दारुणा। त्वं श्रीस्त्वमीश्वरी त्वं ह्रीस्त्वं बुद्धिर्बोधलक्षणा। ६० लज्जा पुष्टिस्तथा तुष्टिस्त्वं
शांतिः क्षांतिरेव च। खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा। ६१ शंखिनी चापिनी बाणभुशुंडीपरिघायुधा। सौम्या
सौम्यतराशेषसौम्येभ्यस्त्वतिसुंदरी ६२ परापराणां परमा त्वमेव परमेश्वरी। यच्च किंचित्क्वचिद्वस्तु सदसद्वाखिलात्मिके। ६३

रहस्ये योगनिद्रा हरेरुक्ता महाकाली तमोगुणा मधुकैटभनाशार्थं यां तुष्टावांबुजासनः दशवक्त्रा दशभुजा दशपादाञ्जनप्रभा वि
शालया राजमाना त्रिंशल्लोचनमालया स्फुरद्दशनदंष्ट्रा सा भीमरूपापि भूमिप रूपसौभाग्यकान्तीनां सा प्रतिष्ठा महाश्रियः खड्गबा
णगदाशूलशंखचक्रभुशुण्डिभृत् परिघं कार्मुकं शीर्षं निश्च्योतद्रुधिरं दधौ एषा सा वैष्णवी माया महाकाली दुरत्यया आराधिता व
शीकुर्यात्पूजाकर्तुश्चराचरम् इति मधुकैटभनाशार्थं ब्रह्मदेवस्तुतिविषयिणी शंखिन्येव राज्ञे तत्पाद्ये नाम्ना मार्कंडेये निधानमेतद्विवृतमि
शेषोक्तेः शंखिन्येव तत्कार्येण चरित्रेणैकार्थं भवति सनेन साधुताचैव नवर्णोऽस्य भेदः इदं च रूपं ब्रह्मणस्तवनमनुरविमुखो योगनिद्रा गता
स्तुता= याबोध्या इत्येवं कालीरेव बोध्यामेव च शास्त्रविधिनिमित्तं रूपं घेपरेहिमा दशवक्त्रादशभुजेत्यादिध्यानमुक्तेः इह तूक्तेषु चतुर्भु
ला= जावद्वादशकर्णिका कमलेचानेनाभीषासाभुशुंडीनिगद्यते परिघो लोहबद्धो लगुडः सौम्यायक्रूराभ्यस्तु असौम्यतराशेषेभ्यस्त्वशेष
सौम्येभ्यः सकलसद्देवेभ्यस्त्वमतिसुंदरीत्यर्थः ६२ परेति इह तूपलक्षणं पश्यन्तीमध्यमावैखरीणां परावीजं सच्च परा नादब्रह्मणोप
रमा प्रधानं तमेव यतस्त्वं परमेश्वरी सत् चेतनवर्गः असत् जडवर्गः ६३

दु॰ टी॰ ना॰ ८

तस्य सर्वस्य या शक्तिः सा यदा त्वं तदा कथं स्तूयसे इत्यर्थः परपदार्थस्तोतस्त्वमतज्जक्तिस्तुतीनां वक्तोस्त्वत्वाभावाद् इदं निबंधनात्स्तुतिः कथं
स्यादिति भावः स्तुत्यत्वाभावमेवाह यथाब्रह्मविष्णुरुद्रात्मना जगत्सृष्टिस्थितिलयकर्ता सोपिनिद्रावशंनीतः प्रापितइत्यर्थः पाता।
पालकः अत्तिसंहरति अग्रे तमोगुणप्रधानमायासंबंधादेव भगवतः सर्वोपसंहारेण स्वस्वरूपेवस्थानमिति भावः ६४ वि।
ष्णुरिति अहं ब्रह्मा शरीरग्रहणं कारिताः केवलमाधिकत्वाद्वशरीराणामिति भावः ६५ सात्वमिति सानेतरोदारस्वभावा इत्थमेवंविधै
रुदारैरसाधारणैः स्वैः प्रभावैर्माहात्म्यैः संस्तुता एतौ मोहयेत्यन्वयः मोहस्य भगवंतं प्रतिवरदानरूपः ६६ प्रबोधमिति प्रबोधं जागर
ला॰ णं पालनोद्यमरूपं देहे बोधः प्रकृतिः प्रकृतिस्वभावात्मकेति भावः ब्रह्मणः स्तुत्वेन विषयत्वोपीति न्यायेन नहननेप्रवृत्तिः विष्णुर्यद्य।
पि पालनप्रधानस्तथापि सतां पालनस्य दुष्टहननं विना संभवात्पालनार्थमुद्युक्तो नैव कदाचिद्व्रतमपि नानुपपन्नं एवं च भगवत्कृते
पि मधुकैटभवधे मायाणवककल्केकाध्ययने प्राचार्येणकार्यमाणे करीवामैरेव तेन समर्थाचरणेन भगवतस्तद्वधविषयकप्रवृत्तिसं

तस्य सर्वस्य या शक्तिः सा त्वं किं स्तूयसे तदा यया त्वया जगत्स्रष्टा जगत्पात्यत्ति यो जगत् ६४ सोपि निद्रावशं नीतः कस्त्वां
स्तोतुमिहेश्वरः विष्णुः शरीरग्रहणमहमीशान एव च ६५ कारितास्ते यतोतस्त्वां कः स्तोतुं शक्तिमान्भवेत् सा त्वमित्थं प्र
भावैः स्वैरुदारैर्देवि संस्तुता ६६ मोहयैतौ दुराधर्षावसुरौ मधुकैटभौ प्रबोधं च जगत्स्वामी नीयतामच्युतो लघु बोधश्च क्रि
यतामस्य हन्तुमेतौ महासुरौ ६७ ऋषिरुवाच एवं स्तुता तदा देवी तामसी तत्र वेधसा विष्णोः प्रबोधनार्थाय निहन्तुं म
धुकैटभौ ६८ नेत्रास्यनासिकाबाहुहृदयेभ्यस्तथोरसः निर्गम्य दर्शने तस्थौ ब्रह्मणोऽव्यक्तजन्मनः ६९ उत्तस्थौ च जगन्ना
थस्तया मुक्तो जनार्दनः एकार्णवेऽहिशयनात्ततः स ददृशे च तौ ७० मधुकैटभौ दुरात्मानावतिवीर्यपराक्रमौ क्रोधर।
क्तेक्षणावत्तुं ब्रह्माणं जनितोद्यमौ ७१

पादकत्वेन प्रेरकत्वया नहं त्वं देवा अपीति बोधय ६७ ऋषिरुवाच एवं स्तुतेति तामसी।
आवरकत्वेन तमः प्रधाना निद्रा तु चेत्यर्थः ६८ नेत्रास्येति विनिर्गत्यादि उरोवक्षः प्राणं गवेपि नैकवत् कोदंस्थानात् अव्यक्तादी
श्वराज्जन्म प्रादुर्भावो यस्य तस्य ब्रह्मणः दर्शने चक्षुर्विषये तस्थावित्यन्वयः ६९ उत्तस्थौ चेति त्यागमुक्तस्त्यक्तइत्यर्थः अहिशयनाच्छेषश
यनात् सतौ ददृशे तौ तावपि तं ददृशातेइति कर्मव्यतिहारे आत्मनेपदम् ७० तौ विशेषयति मधुकेति आद्यपादेनवातरत्वेकारस्थानात् क्रो
दः शास्त्रे कार्ये अधिकारत्वमहंममेति तस्य वीर्यं उत्साहः पराक्रमः शक्तिर्निश्चयः अनेनेति अनेन प्रवहदस्य तमसो रजोभिभावकत्वे १९

दे॰

समुत्थायेति कालाधनोरिति द्वितीयार्द्धसहस्राणीति बाहुरेव प्रहरणं युद्ध॰ १२ तावपीति वरश्चेष्टोर्ध्यः व्रियतां शृणुवां १३ भ
गवानुवाच भवेतामिति अत्र यदि तु देहि शरणीयं यदि तु तेन दिवधो भवेतामिमप्राप्तः कृतमिति वुध्या तावेऽपसके भावेक्तः ममेति क
र्तुः शत्रुत्वविवक्षायां षष्ठी १४ ऋषिरुवाच वंचिताभ्यामिति तदा तस्मिन् समये इति एवं वरं प्रार्थयित्वा वंचिताभ्यां भगवतो कृतमोहत्वा
२० त् सर्वं जगत् आपोमयं विलोक्य ताभ्यां भगवान्गदितः कमलेक्षणः आपोमयं रस्तत्वात् प्रशस्तसमाख्यातान्तु प्रकृतिका स्तत्र नेता तार्षत्वा सु॰
दात्मयट् आपोमयमिदं सर्वमापो मूर्त्तिः शरीरिणामिति च १५ किं गदितस्तत्राह आवामिति नयत्रोर्वी यत्रवा न सलिलेन सम्प्लुतान
आवां जहीत्यर्थः १६ ऋषिरुवाच तथेति पूर्ववरेणास्मत्कथामिप्रायेण ऋषिरुवाचेत्युक्तिः अत्र भूरुदसेत्यादि राभिप्रायेण तेन सम्प्लुता
तोत्व अवतारसम्प्रयोजनकसमस्तमंत्रसंख्याशरण यथावेन मध्याकाल्पायनीनत्रसमति एवं क्रमस्वीतेऽपपाद्यिष्यामः तत्र नयत्रोर्वी सेतत्तुक्तेन त
द्युक्तयोः शिरसी जघने उपस्थाप्य स्वेनाभेद्योभागे कृत्वा चक्रेणाच्छिन्नवान् एतेन भगवद्देहस्य शुद्धमायिकत्वेनापांचभौतिकत्वाज्जघनेन मारा
तोऽपि सलिलस्पर्शाभावविशिष्टोर्वीः प्राप्तिः तस्य वधस्यासिद्धिरिति परास्तम् कालिकापुराणे तु जलोपरि महामायारूपोऽपि शिलानिधायतत्र

समुत्थाय ततस्ताभ्यां युयुधे भगवान्हरिः पंचवर्षसहस्राणि बाहुप्रहरणो विभुः १२ तावप्यतिबलोन्मत्तौ महामायाविमोहितौ उ
क्तवन्तौ वरोऽस्मत्तो व्रियतामिति केशवम् १३ भगवानुवाच भवेतामद्य मे तुष्टौ मम वध्यावुभावपि किमन्येन वरेणात्र एतावद्धि वृतं म
म १४ ऋषिरुवाच वंचिताभ्यामिति तदा सर्वमापोमयं जगत् विलोक्य ताभ्यां गदितो भगवान्कमलेक्षणः १५ आवां जहि न यत्रोर्वी स
लिलेन परिप्लुता १६ ऋषिरुवाच तथेत्युक्त्वा भगवता शंखचक्रगदाभृता कृत्वा चक्रेण वै छिन्ने जघने शिरसी तयोः १७ एवमेषा स
मुत्पन्ना ब्रह्मणा संस्तुता स्वयम् प्रभावमस्या देव्यास्तु भूयः शृणु वदामि ते १८ इति मा॰ ६१
स्थित्वा तु मोरुजघनेनतयोः शिरसी आरोप्य चिच्छेद तत्तो
भारेण शिलायामधोगतावपीत्य योर्मेदसा पृथ्वी आभवामिति १७ उक्तमुपसंहरति एवमेषेति समुत्पन्ना प्रादुर्भूता प्रसादेत्याहनि अधिकर
लोचनौ अस्याः नाम स्यात् लक्ष्म्या महालक्ष्मीस्वरूपः अत एव तत् संख्यानिः भूयः प्रभावं चरस्यति तत्र महाकाल्यास्त्वरूपाभेदात्स
वैक्रप्रभावापितस्याएवेति यन्नाधित्ते तदुक्तं लक्ष्मीतंत्रे योगनिद्रा हरेरुक्ता या सा देवी विडम्बया महाकाल्या तत्र विदिता सा देवी सनातनी म
धुकैटभनाशार्थं मोहितौ च वधात्तदा जज्ञाते वरलाभेन देवदेवेन विष्णुना एषा सा वैष्णवी माया महाकाली दुरत्यया स्वयं वशीकृता कुरु याहु
शेत्तोले स्मराचरमिति स्वस्या विश्वेश्वर्यादिकं सूक्तं टुहेन तद्वलेनात्तदा तन्नेयो योगनिद्रायाममेत्युत्तुरेटर अस्याद्यास शक्तिस्मृतिरित्तराममि
त्यपि हितायसर्वभूतानां धार्यते बुक्लवादिभिरिति विशेषणादिकमस्यक्तं मेवराश्रित्सक्रममितिन्यवक्षिप्यते कालरात्रिर्महारात्रिरितितत्रापि पदा
भ्यासात् इति वोधम् विश्वेश्वरी पदेनोपक्रमात् विश्वेश्वरीस्तक्रमित्यादि १८ इति समाप्तौ सावर्णेः कः प्रकाशायत्र तारद्यो मन्वन्तरे तदु
त्पन्ने इत्यर्थः ॥ इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये प्रथमोऽध्यायः ॥ १ ॥ ॥ ॥

सर्व्वाङ्गश्वाङ्गतयोद्धियाम्बकुरुतर्जुं प्रागर्

द्वितीयचरित्रस्य विष्णुर्ऋषिः महालक्ष्मीर्देवता त्रिष्टुप्छन्दः शाकंभरीशक्तिः दुर्गाबीजम् वायुस्तत्त्वम् महालक्ष्मीप्रीत्यर्थे पाठे विनियोगः अक्षस्रक्परशुं गदेषुकुलिशं पद्मं धनुः कुण्डिकां दण्डं
शक्तिमसिं च चर्म जलजं घण्टां सुराभाजनम् शूलं पाशसुदर्शने च दधतीं हस्तैः प्रवालप्रभां सेवे सैरिभमर्दिनीमिह महालक्ष्मीं सरोजस्थिताम्

दु॰ टी॰ ना॰ ५ भूयः शक्तिवसुमंत्रं तत्रैतिहासमाह ऋषिरुवाच देवासुरमिति असुराणामधिपे महिषे सति च पुनः देवानामधिपे पुरंदरे इन्द्रे सति देवा
सुराणामब्दशतं युद्धमासीदित्यर्थः देवासुरमित्यत्र शाश्वतिकविरोधः रम्भासुरतपस्सन्तुष्टः प्रसन्नः शिवस्त्वद्वंशोत्पन्न
मत्कृते तनयो महिषः स च तपसा देवीनिकटे मम सायुज्यं भवत्विति वरं प्रार्थितवान् आदिशक्तिश्च तथेति तेन हतः पुरा द्विती
यस्मिन् युगे महाकल्पे दुर्गारूपेणाधुना त्वं हनिष्यामि महामायेति कालिकापुराणे स्पष्टं तत्रेति इन्द्रः स्वराट् २ ततइति
पद्मयोनिं ब्रह्माणं प्रजापतिमिति तस्य विशेषणं ब्रह्मणः प्रजासृष्टत्वेन हितसंबंधात् देवानां तत्र गमनं ततः पालनसंहारयोः शिव
विष्णोरेवाधिकारात् ब्रह्मणा तयोः सन्निधिगमनम् ३ यथावृत्तमिति देवानामभिभवस्य विस्तरः प्रपंचो यत्रेति चेष्टितविशेषणम् ४

ऋषिरुवाच देवासुरमभूद्युद्धं पूर्णमब्दशतं पुरा महिषेऽसुराणामधिपे देवानां च पुरंदरे १ तत्रासुरैर्महावीर्यैर्देवसैन्यं प
राजितम् जित्वा च सकलान्देवानिन्द्रोऽभून्महिषासुरः २ ततः पराजिता देवाः पद्मयोनिं प्रजापतिम् (जित्वा च सकलान्देवा
निन्द्रोऽभून्महिषासुरः) पुरस्कृत्य गतास्तत्र यत्रेशगरुडध्वजौ ३ यथावृत्तं तयोस्तद्वन्महिषासुरचेष्टितम् त्रिदशाः क
थयामासुर्देवाभिभवविस्तरम् ४ सूर्येन्द्राग्न्यनिलेन्दूनां यमस्य वरुणस्य च अन्येषां चाधिकारान्स स्वयमेवाधितिष्ठ
ति ५ स्वर्गान्निराकृताः सर्वे तेन देवगणा भुवि विचरन्ति यथा मर्त्या महिषेण दुरात्मना ६ एतद्वः कथितं सर्वममरारिवि
चेष्टितम् शरणं वः प्रपन्नाः स्मो वधस्तस्य विचिन्त्यताम् ७ इत्थं निशम्य देवानां वचांसि मधुसूदनः चकार कोपं शंभुश्च भ्रु
कुटीकुटिलाननौ ८ ततोऽतिकोपपूर्णस्य चक्रिणो वदनात्ततः निश्चक्राम महत्तेजो ब्रह्मणः शंकरस्य च ९ अन्ये
षां चैव देवानां शक्रादीनां शरीरतः निर्गतं सुमहत्तेजस्तच्चैक्यं समगच्छत १० अतीव तेजसः कूटं ज्वलन्तमिव पर्वतं ददृ
शुस्ते सुरास्तत्र ज्वालाव्याप्तदिगन्तरम् ११

सूर्येन्द्राग्न्यनिलेति स स्वयमित्यत्र एतत्तयोरितिशेषः लोपः स स्वयमित्यत्र सकारस्य पादपूरणार्थं लोपः
दित्यनेनेत्यर्थः ५ स्वर्गादिति निराकृताः निःसारिताः ६ एतद्व इति वः युवयोर्बहुवचनं गौरवात् च शरणं प्रपन्नाः आगताः स्मो भवामः
७ इत्थमिति भ्रुवोः कुटी कौटिल्यं तेन कुटिले आनने ययोस्तौ भ्रुकुटीकुटिलाननौ दिलाडुष्वः अकारिकप्रत्ययात् कुटिकारादितिङीष् ब्र
ह्मणः कोपपरिहाराधिकात्तु शिवस्य तमोगुणप्रधानस्य कोपपित्तमोगुणसाधिकेन विष्णुकोपस्य पालनमूलकत्वेन सत्त्वाधिक्यत्वात् तथा
त्रिगुणा एव लिधम्यते अत एव वाक्यवैकृतिके रहस्ये सर्वदेवशरीरेभ्यो याविर्भूतामहाप्रभा त्रिगुणा सा महालक्ष्मीः साक्षान्महिषमर्दिनीति तथा
पि रजः सत्त्वयोराधिक्ये देवानां रजः सत्त्वमयत्वात् ८ तत इति द्वितीयं ततः इति प्रसिद्धादित्यर्थक वदनात् इत्यस्य विशेषणम् ९ अन्येषां चेति
कुपितानामिति शेषः यत्तेजो निर्गतं ततः ब्रह्मादीनां तेजसां ऐक्यं एकत्वं समगच्छत् प्राप्तवत् १० अतीवेति तेजसः एकत्वे इति देशः इतिवा ५

जोगुण प्राधान्येन

अतुलमिति तत्र पुराणान्तरप्रसिद्धे कात्यायनाश्रमे कात्यायनेन सिद्धर्षिणा स्त्रीरूपेण मोहयन्तं महिषं दृष्ट्वा स्त्रीत्वादनित्यात् हनिष्यतीति शमगानि
तितरां शमेद्रूपधारणमिति कात्यायनी तु संज्ञा लोकत्रयं व्याप्य स्थितम् अश्विनकृष्णचतुर्दश्यामवतारः तत्कृष्णाष्टम्यां तद्वधः नवम्यां पूजा दशम्यां विसर्जनं देव्याः
रिति तत्र चोक्तम् तत्तेजः एकस्थं तन्नारी अभूत् त्विषा दीप्त्या १२ तेजोविभागेनाङ्गविभागमाह यदिति शम्भोः श्वेतवर्णत्वात् तेजसा जातं मुखं
श्वेतमित्यर्थः विलीनीलवर्णत्वाद्याम्यात्केशोत्पादश्च नीलाः १३ सौम्येनेति सोमसम्बन्धिनेत्यर्थः चन्द्रसत्त्वादिदम्येयि पिण्डम् अत एव श्वेतस्तनी
ऐन्द्रेण मध्यम् रक्तं जङ्घोरू इति भिन्ने पदे जङ्घा ऊरू च वारुणेन सम्बन्धः भुवः पृथ्व्याः नितम्बः कटिपश्चाद्भागः १४ ब्रह्मण इति अत एव पादौ रक्तौ तत्
दृक्कैवेतीति केशकेशवाश्वेतासुकरान्ताः श्वेतस्तनमण्डला रक्तमध्यारक्तपादा नीलजङ्घोरु रुन्मदा सुचित्रजघना चित्रमाल्याम्बरविभूषा

सोमस्य इदं सौम्यं = अतुलं तत्र तत्तेजः सर्वदेवशरीरजम् एकस्थं तदभून्नारी व्याप्तलोकत्रयं त्विषा १२ यदभूच्छाम्भवं तेजस्तेनाजायत तन्मुखम्
याम्येन चाभवन्केशा बाहवो विष्णुतेजसा १३ सौम्येन स्तनयोर्युग्मं मध्यं चैन्द्रेण चाभवत् वारुणेन च जङ्घोरू नितम्बस्तेजसा भु
वः १४ ब्रह्मणस्तेजसा पादौ तदङ्गुल्योऽर्कतेजसा वसूनां च कराङ्गुल्यः कौवेरेण च नासिका १५ तस्यास्तु दन्ताः सम्भूताः प्राजाप
त्येन तेजसा नयनत्रितयं जज्ञे तथा पावकतेजसा १६ भ्रुवौ च सन्ध्ययोस्तेजः श्रवणावनिलस्य च अन्येषां चैव देवानां सम्भवस्तेजसां
शिवा १७ ततः समस्तदेवानां तेजोराशिसमुद्भवाम् तां विलोक्य मुदं प्रापुरमरा महिषार्दिताः १८ शूलं शूलाद्विनिष्कृष्य ददौ
तस्यै पिनाकधृक् चक्रं च दत्तवान्कृष्णः समुत्पाद्य स्वचक्रतः १९ शङ्खं च वरुणः शक्तिं ददौ तस्यै हुताशनः मारुतो दत्तवांश्चापं
बाणपूर्णे तथेषुधी २० वज्रमिन्द्रः समुत्पाद्य कुलिशादमराधिपः ददौ तस्यै सहस्राक्षो घण्टामैरावताद्गजात् २१ कालदण्डाद्यमो
दण्डं पाशं चाम्बुपतिर्ददौ प्रजापतिश्चाक्षमालां ददौ ब्रह्मा कमण्डलुम् २२ समस्तरोमकूपेषु निजरश्मीन्दिवाकरः कालश्च दत्तवान्ख

ता चित्रानुलेपना कान्तिरूपसौभाग्यशालिनीति एवं च रूपेणापि त्रिगुणत्वं सूचितं सत्यपि चित्रत्वात् चित्रमाल्यादिधारणं वसूनामित्यस्य तेजसे
ति शेषः एवमन्यत्रापि १५ तस्यास्त्विति प्राजापत्येन दन्तादितेजसा तेन ब्रह्मणस्तेजसा पादावित्यनेन न विरोधः पावकोऽग्निः १६ भ्रुवौ चेति सन्ध्य
योस्तेजः भ्रुवावभूतामित्यन्वयः करणस्य वकरणे लिङ्गविवक्षा पुनर्नपुंसकं कुर्यात् कर्णौ श्रवणौ श्रवणौ क्रमात् विलिरेममाला अन्येषां च देवानां सम्बन्धितेज
नसां शिवा चण्डी सम्भवः एकीभावः कार्यमित्यर्थः समुत्पाद्यमानत्वात् तत्त्वप्रतिपादनपरं एवमग्रेऽपि अत्र चक्रं चेति चाहृत्य एवं प्रसिद्धौ १७ ततः
इति तेजोराशिसमुद्भवामिति पञ्चलेपि गमकत्वात् समासः मुदं हर्षम् १८ शूलादिति विद्यमानस्वतेजसैव भगवती प्रादुर्भूतेति तात्पर्यं एवमायुध
दानेऽपि बोध्यम् शूलामिति विनिष्कृष्य आकृष्येत्यर्थः समुत्पाद्य जनयित्वेत्यर्थः यत्पूर्वोक्तं एवमग्रेऽपि अत्र चक्रं चेति चाहृत्य १९ शङ्खं चेति व
रुणाच्छङ्खं अग्नेः शक्तिः वायोश्चापबाणपूर्णेषुधिरित्यर्थः शङ्खं चेति चकारेण हस्ताम्भवानुषङ्गः त्वेन २० वज्रमिति देवमेवाद्धस्तेनैराः सहस्राक्षो
नरूपादीनेपि न दोषः २१ कालेति इत्याद्येति शेषः प्रजापतिर्ब्रह्मा अक्षमाला कमण्डलु वा ददावित्यन्वयः ब्रह्माः इमां लोकमण्डलुमितिवामनपुराणोक्त २२

सो॰

क्षीरोदश्चेति अंगुलीयकरत्नानांते क्षीरोदः कर्ता विश्वकर्मणः परस्य अस्त्रकवचदातृत्वे चूडामण्यादिकवचदानांते विश्वकर्मणः कर्तृ
त्वमित्यन्ये तन्मते अर्धचंद्रशब्देन तदाकारो ललाटभूषणविशेषः अम्लानेत्यादि पंकजदानांते जलधिः कर्ता तत्र पंकजं हस्ते रत्नसिंहयोर्दाने
हिमवान्कर्ता अददिति ददातेर्लङि रूपं छांदसत्वात्सिपदम् २९ ददावशून्यमिति सुरया कर्त्री कौटिल्यं तेन कुटिले आननेन यथा यो स्तोभू
शब्दस्यैषोदरादित्वात्सुप्सुः कुटेरिकप्रत्ययात् कटादिकारादिति ङीष् ब्राह्मणः कोपे रजोधिक्येन शिवस्य तमोगुणप्राधान्येन कोपे
तमोगुणस्याधिक्येन विष्णुकोपस्य पालनमूलकत्वेन सत्त्वाधिक्यात् तया त्रिगुणस्वरूपे तन्निष्पत्ते अतएवोक्तं वैकृतिकेरहस्ये सर्वदेवशरी
रेभ्यश्चाविर्भूता महाप्रभा त्रिगुणा सा महालक्ष्मीः साक्षान्महिषमर्दिनीति तत्रापि रजःसत्त्वघोराधिक्यात् देवानां रजःसत्त्वमयत्वात् ८

क्षीरोदश्चामलं हारमजरे च तथांबरे चूडामणिं तथा दिव्यं कुंडले कटकानि च २४ अर्ध
चंद्रं तथा शुभ्रं केयूरान्सर्वबाहुषु नूपुरौ विमलौ तद्वद्ग्रैवेयकमनुत्तमम् २५ अंगु
लीयकरत्नानि समस्तास्वंगुलीषु च विश्वकर्मा ददौ तस्यै परशुं चातिनिर्मलम् २६
अस्त्राण्यनेकरूपाणि तथाभेद्यं च दंशनम् अम्लानपंकजां मालां शिरस्युरसि चापराम् २७
अददज्जलधिस्तस्यै पंकजं चातिशोभनम् हिमवान्वाहनं सिंहं रत्नानि विविधानि च २८
ददावशून्यं सुरया पानपात्रं धनाधिपः शेषश्च सर्वनागेशो महामणिविभूषितम् २९
नागहारं ददौ तस्यै धत्ते यः पृथिवीमिमाम् अन्यैरपि सुरैर्देवी भूषणैरायुधैस्तथा ॥ ३०

ददाविति अनेनाष्टादशभुजा सहस्रभुजा चैवेति सूचितं तदुक्तं वैकृतिकेरहस्ये अष्टादशभुजा पूज्या सा सहस्रभुजा सती अष्टादशभुजन्था
धौम्यविशेष्योक्तेः सामान्यतस्तु मैरपि देवैरायुधैरित्युक्ते विभावः आयुधान्यत्र वक्ष्यंते दक्षिणाधःकरक्रमात् अक्षमाला च कमलं बाणो
ऽसिः कुलिशं गदा चक्रं त्रिशूलं परशुः शंखो घंटा च पाशकः शक्तिर्दंडश्चर्म चापं पानपात्रं कमंडलुः अलंकृतभुजामेभिरायुधैः कमलासना
म् सर्वदेवमयीमीशां महालक्ष्मीमिमां नृप पूजयेत्सर्वलोकानां स देवानां प्रभुर्भवेदिति एवं च सायुधैरस्याः प्रादुर्भावस्तत्त्वेवेन दत्त्वा त्रिगुणात्
च सर्वस्वरूपत्वात्केवलं प्रादुर्भावस्तस्या न इति सूचितम्

शेवीतं ४१

यद्यप्यत्र ब्रह्मादीनामिन्द्रादीनां च शरीरान्निष्क्रान्तं तेजो देवीविग्रहरूपेणाभिव्यक्तमासीत् आयुधानि च देवैः स्वस्वशूलादिभ्यो विनिर्गमय्य दत्तानीत्येवोक्तम् तथापि देवीशक्त्यंशा एव तत्तद्देवपालनार्थैकदेशपालनशक्तिस्तेन यद्देव्यां निवृत्तितास्त एवं महिषवधेन सर्वलोकरक्ष(णाय पुनरेकीभूय देवीमयथाशक्ताः एवं तदायुधानि जशक्त्याश्रयीनिबोध्यम् अहंविभूत्यावृतभिरित्यादिस्तवीयचरित्रगतवचनसम्भूता(त् लक्ष्मीतत्त्वे विशेषप्रतिलक्ष्मीवचनानि महालक्ष्मीरहमंशकस्तनःस्वांशैश्चैतरे दितायसर्वदेवानां जातां महिषमर्दिनीति मदीयाः श(क्तिलेशा लये तत्तद्देवशरीरिणः धृतमयानैः संभूतेनूपंपरमशोभनम् आयुधानि च देवानां यानि यानि सुरेश्वर मच्छक्तयस्तदाका(राण्यायुधानि समाभवन्निति वर्णितेन तत्त्वज्ञानमहिषमर्दिनीतियामले ३० संमानितेति साट्टहासमिति नादक्रियाविशेष(णम् अट्टहासोऽत्यर्थहासः नभ इति भवो लोकोपलक्षणं ३१ अमायतेति मामानेदेविदिकाब्रह्मतानन्त्समासः तेनासंभवतेत्या(

सम्मानिताननादोच्चैः साट्टहासंमुहुर्मुहुः तस्या नादेन घोरेण कृत्स्नमापूरितं नभः ३१ अमायतातिमहता प्रतिशब्दो महानभूत् चुक्षुभुः सकला लोकाः समुद्राश्च चकंपिरे ३२ चचाल वसुधा चेलुः सकलाश्च महीधराः जयेति देवाश्च मुदा तामूचुः सिंहवाहिनीम् ३३ तुष्टुवुर्मुनयश्चैनां भक्तिनम्रात्ममूर्तयः दृष्ट्वा समस्तं संक्षुब्धं त्रैलोक्यममरारयः ३४ सन्नद्धाखिलसैन्यास्ते समुत्तस्थुरुदायुधाः आः किमेतदिति क्रोधादाभाष्य महिषासुरः ३५ अभ्यधावत तं शब्दमशेषैरसुरैर्वृतः स ददर्श ततो देवीं व्याप्तलोकत्रयां त्विषा ३६ पादाक्रान्त्या नतभुवं किरीटोल्लिखिताम्बराम् क्षोभिताशेषपातालां धनुर्ज्यानिःस्वनेन ताम् ३७ दिशो भुजसहस्रेण समन्ताद्व्याप्य संस्थिताम् ततः प्रववृते युद्धं तया देव्या सुरद्विषाम् ३८ शस्त्रास्त्रैर्बहुधा मुक्तैरादीपितदिगन्तरम् महिषासुरसेनानीश्चिक्षुराख्यो महासुरः ३९ युयुधे चामरश्चान्यैश्चतुरंगबलान्वितः रथानामयुतैः षड्भिरुदग्राख्यो महासुरः ४०

र्थः अस्य नभसीत्यादिः तत्रहेतुरिति महत्त्व क्षुब्धुरित्यस्य प्रतिशब्देनेत्यादिः ३२ चचालेति महीधराः पर्वताः ३३ तुष्टुवुरिति मा(नसापकृष्टत्वज्ञानवान्तः शरीरे च नम्रा तेषां संतत्वं कुलेज्ञानमितिशेषः अमरारयस्त्वमस्त्वाहस्यार्थः ३४ सन्नद्धेति सु(ष्ठायसज्जानि धृतसेनाशालिप्रविलसैस्यानियेषां आः इति क्रोधाविष्कारे अनेनच महिषासुरस्य मोमयत्वमुक्तं हताश्रेयाणात् कस्यचित्(निकृष्टस्य ममश्रेष्ठत्वेनाप्यणीपित्समोमयत्वाच्च अत एव रजः सत्त्वाधिकदेव्याः तत्त्वं ३५ अभ्यधावतेति सुरितेश ३६ देवीं विशेष(यति पादेनेति धनुषोज्याया ध्वनिःस्वनेन धनुषः ॐकारः ज्याया एकारः ३७ दिशइति समंतात्सर्वतः ३८ शस्त्रास्त्रैरिति शस्त्रके(वलमस्त्रप्रयुक्तं तद्वर्तं ३९ युयुधइति अन्यैः प्रधानदेतैः सहितः चामराख्यः चिक्षुराख्यश्च रथनागाश्वपदातिरूपचतुरंगसेनायुतोयुयुधे

मूर्तिः ॥
स्वयमेव क्रोध जमात्तेन ब्रह्म मरक्षहार्थधा वनाः ॥

दु.टी.
ना.
११

अयुध्यतेति अयुतानामिति नियुतैरिति च बहुत्वबहुत्वविवक्षया बहुवचनम् एवमग्रेऽपि एकं दश शतं चैव सहस्रमयुतं तथा लक्षं च नियुतं चैव कोटिरर्बुदमेव च वृन्दो खर्वो निखर्वश्च शंखपद्मौ च सागरः अंत्यं मध्यं परार्द्धं च दशवृद्ध्या यथाक्रमम् इति बलाग्रे ४१ अयुतानामिति गजवाजीत्यतो विडालसैन्यं ४२ वृत इति अथ तेषां वधानंतरं अयुतानां पंचाशद्भिरयुतैः परिवारितो विडालनामा तत्र संयुगे युयुधे इत्यनन्तरश्लोकेनान्वयः इदं रोदुरश्च विडालनयनस्त्वथ ते निवासनयनाः विडालनयनशब्दो योगारूढो नकेवलयौगिकः अतस्तेन नामैकदेशो नाम तद्ग्रहणम् अत एव विडालस्वामिनेति वक्ष्यमाणसंगच्छते ४३ युयुधे इति स्पष्टं ४४ युयुधुरिति

कोटिः पंचकोटिभिः बाष्कलोपि

अयुध्यतायुतानां च सहस्रेण महाहनुः पंचाशद्भिश्च नियुतैरसिलोमा महासुरः ४१ अयुतानां शतैः षड्भिर्बाष्कलो युयुधे रणे गजवाजिसहस्रौघैरनेकैः परिवारितः ४२ वृतो रथानां कोट्या च युद्धे तस्मिन्नयुध्यत विडालाख्योऽयुतानां च पंचाशद्भिरथायुतैः ४३ युयुधे संयुगे तत्र रथानां परिवारितः अन्ये च तत्रायुतशो रथनागहयैर्वृताः ४४ युयुधुः संयुगे देव्या सह तत्र महासुराः कोटिकोटिसहस्रैस्तु रथानां दन्तिनां तथा ४५ हयानां च वृतो युद्धे तत्राभून्महिषासुरः तोमरैर्भिन्दिपालैश्च शक्तिभिर्मुसलैस्तथा ४६ युयुधुः संयुगे देव्या खड्गैः परशुपट्टिशैः केचिच्च चिक्षिपुः शक्तीः केचित्पाशांस्तथापरे ४७ देवीं खड्गप्रहारैस्तु ते तां हन्तुं प्रचक्रमुः सापि देवी ततस्तानि शस्त्राण्यस्त्राणि चण्डिका ४८ लीलयैव प्रचिच्छेद निजशस्त्रास्त्रवर्षिणी अनायस्तानना देवी स्तूयमाना सुरर्षिभिः ४९ मुमोचासुरदेहेषु शस्त्राण्यस्त्राणि चेश्वरी सोपि क्रुद्धो धुतसटो देव्या वाहनकेसरी ५० चचारासुरसैन्येषु वनेष्विव हुताशनः निःश्वासान्मुमुचे यांश्च युध्यमाना रणेऽम्बिका ५१ त एव सद्यः संभूता गणाः शतसहस्रशः युयुधुस्ते परशुभिर्भिन्दिपालासिपट्टिशैः ५२ नाशयन्तोऽसुरगणान्देवीशक्त्युपबृंहिताः अवादयन्त पटहान्गणाः शंखांस्तथापरे ५३ मृदंगांश्च तथैवान्ये तस्मिन्युद्धमहोत्सवे ततो देवी त्रिशूलेन गदया शक्तिवृष्टिभिः ५४ खड्गादिभिश्च शतशो निजघान महासुरान् पातयामास चैवान्यान्घंटास्वनविमोहितान् ५५

पंचाशत्कोट्यः

अस्यपूर्वेणान्वयः आर्षं परस्मैपदं उत्तरार्द्धमुत्तरेणान्वयि ४५ हयानां चेति रथदंतिहयानां प्रत्येकं कोटिकोटिसहस्रसंख्यायुतो महिषस्तत्राभूदित्यर्थः उत्तरार्द्धमुत्तरेणान्वयि भिंदीति दंताः ४६ युयुधुरिति केचित्ते याइ विशेषः अपरे इत्युत्तरेणान्वयि ४७ देवीमिति अपरे खड्गैः प्रसिद्धा देव्या इत्यर्थः शोभमानमित्यात्मनेपदं न खेदसत्वात् ४८ लीलयैवेति आयासरहितानना ४९ मुमोचेति उत्तरार्द्धमुत्तरेणान्वयि धुताः कंपिताः ५० चचारेति उत्तरार्द्धमुत्तरेणान्वयि यान्युद्धे वने ५१ त एवेति तावंत एवेत्यर्थः एकैकनिःश्वासादेकैकगणः संभूत इत्यर्थः ते गणाः ५२ नाशयंत इति देवीप्रभावेणाप्यायिताः अवादयन्त वादितवंत इत्यर्थः गणाः केचिदिति विशेषः ५३ मृदंगांश्चेति युद्धमेव महोत्सवो वीराणां हर्षदत्वात् शक्तीनां वृष्टिभि ११
र्वर्षैरित्यर्थः ५४ खड्गेति स्पष्टम् ५५

असुरानिति अकर्षयदिति कृषेर्थौणादिकालः अपरइत्यग्रान्वयि ५६ विपोथिताइति अपरेगदयाविपोथिताः आमर्दिताः निपा
तेननिपातनेन भुविशेरतइत्यन्वयः वेमुरितिउद्वांतवं ५७ केचिदिति शूलेनवक्षसिभिन्नाः भूमौनिपतिताः निपेतुरित्यर्थः उत्तरार्द्ध
मुत्तरान्वयि ५८ सेनेति सेनामनुकुर्वन्तीति सेनानुकाराः शरीरव्याप्यत्वात् सेनासंज्ञकाः तत्सदृशाश्च अपरेछिन्नग्रीवाः प्राणा
न्मुमुचुरित्यर्थः ५९ शिरांसीति छिन्नानीतिशेषः ६० एकेति आशिरःपादपर्यंतंपाटिताइत्यर्थः उत्तरार्द्धमुत्तरान्वयि ६१ कबंधाइति
मनुष्याणांसहस्रेषुहतेषुहतमूर्धसु तदावेशात्कबंधःस्यादेकोऽस्थायीक्रियान्वितइतिलक्षिताः अपरेकबंधाश्चायुयुधुः ६२ कबंधाइति
उभयत्रापियुयुधुरितिशेषः छिन्नशिरसइतिस्वरूपकथनं छिन्नानिशिरांसियेषांरितिवाक्यरूपत्वः उभयतोधाराः खड्गाः भाषंतइतिकं

असुरान्भुविपातेन रथाश्चाप्यानकर्षयत् केचिद्द्विधाकृतास्तीक्ष्णैः खड्गपातैस्तथापरे ५६ विपोथितानिपातेनगदयाभुवि
शेरते वेमुश्चकेचिद्रुधिरंमुसलेनभृशंहताः ५७ केचिन्निपतिताभूमौभिन्नाःशूलेनवक्षसि निरंतराःशरौघेनकृताःकेचि
द्रणाजिरे ५८ सेनानुकारिणःप्राणान्मुमुचुस्त्रिदशार्दनाः केषांचिद्बाहवश्छिन्नाश्छिन्नग्रीवास्तथापरे ५९ शिरांसिपेतु
रन्येषामन्येमध्येविदारिताः विच्छिन्नजंघास्त्वपरेपेतुरुर्व्यांमहासुराः ६० एकबाह्वक्षिचरणाःकेचिद्देव्याद्विधाकृताः छि
न्नेपिचान्येशिरसिपतिताःपुनरुत्थिताः ६१ कबंधायुयुधुर्देव्यागृहीतपरमायुधाः ननृतुश्चापरेतत्रयुद्धेतूर्यलयाश्रि
ताः ६२ कबंधाश्छिन्नशिरसःखड्गशक्त्यृष्टिपाणयः तिष्ठतिष्ठेतिभाषंतोदेवीमन्येमहासुराः ६३ पातितैरथनागाश्वैर
सुरैश्चवसुंधरा अगम्यासाभवत्तत्रयत्राभूत्समहारणः ६४ शोणितौघामहानद्यःसद्यस्तत्रविसुस्रुवुः मध्येचासुर
सैन्यस्यवारणासुरवाजिनाम् ६५ क्षणेनतन्महासैन्यमसुराणांतथांबिका निन्येक्षयंयथावह्निस्तृणदारुमहाचयम्
६६ सचसिंहोमहानादमुत्सृजन्धुतकेसरः शरीरेभ्योमरारीणामसूनिवविचिन्वति ६७ देव्यागणैश्चतैस्तत्रकृतंयुद्धंतथा
सुरैः यथैषांतुतुषुर्देवाःपुष्पवृष्टिमुचोदिवि ६८ इतिमार्कंडेयपुराणेसावर्णिकेमन्वंतरेदेवीमाहात्म्येमहिषासुरसैन्यवधः २
६९

दसः ६३ पातितैरिति रथनागसहितैरश्वैरित्यर्थः एवमग्रेपि यद्वाप्राणिनुर्ध्वसेनांगानामिति सेनांगशब्देन रथिकादीनामेव ग्रहणमि
तिनात्रनियमप्राप्तिः ६४ शोणितेति असुरसैन्यस्यमध्येवारणासुरवाजिनांशोणितस्य ओघः प्रवाहोयासांतादृश्योनद्यःप्रसुस्रुवुः व्यूदस
लात्समासः ६५ ६६ सचेति क्षयंनिन्येइतिशेषः तत्रोन्नेदते अमरारीणांशरीरेभ्योऽसून्विचिन्वतीव भूतेलट् निपातागमश्छांदसः
देव्याइति चाप्यर्थे तुतुषुस्तुष्टाः ६८ इतिशिवभट्टसुतसतीगर्भजनागोजीभट्टकृतेसप्तशतीव्याख्यानेद्वितीयोध्यायः २॥

ऋषिरुवाच निहन्यमानमिति १।२ तस्येति उत्करः समूहः वाजिनां यंतारं चरथयंतारं जघानेत्यन्वयः ३ चिच्छेदेति आशुगाः बाणाः ४।५
सिंहमिति सव्ये वामे ६ तस्या इति पफाल विशीर्णः तस्या भुजमित्यन्वयः ७ चिक्षेपेति तत शूलं अंबराद्रविबिम्बमिवेत्यन्वयः ते-
जोभी रवी तच्छूलोपद्रुतिदीर्घः ८ दृष्ट्वेति तत एवं अम्बरस्य शूलमापततत् अमुंचत दृष्ट्वेत्यर्थः स च शतधानीत इति शेषः ९।१० सोपी-
ति हुंकारेति स्फुटः ११।१२ तत इति समुत्पत्य आस्थाय गजकुंभांतरस्थित इत्येकपदम् १३ युध्यमानाविति नागात् गजात् युयुधा-

ऋषिरुवाच निहन्यमानं तत्सैन्यमवलोक्य महासुरः सेनानीश्चिक्षुरः कोपाद्ययौ योद्धुमथांबिकाम् १ स देवीं शरवर्षेण व-
वर्ष समरेऽसुरः यथा मेरुगिरेः शृंगं तोयवर्षेण तोयदः २ तस्य छित्वा ततो देवी लीलयैव शरोत्करान् जघान तुरगान्बा-
णैर्यंतारं वाजिनां रथम् ३ चिच्छेद च धनुः सद्यो ध्वजं चातिसमुच्छ्रितम् विव्याध चैव गात्रेषु छिन्नधन्वानमाशु-
गैः ४ स छिन्नधन्वा विरथो हताश्वो हतसारथिः अभ्यधावत तां देवीं खड्गचर्मधरोऽसुरः ५ सिंहमाहत्य खड्गेन तीक्ष्णधारेण
मूर्धनि आजघान भुजे सव्ये देवीमप्यतिवेगवान् ६ तस्याः खड्गो भुजं प्राप्य पफाल नृपनंदन ततो जग्राह शूलं स कोपादरुण-
लोचनः ७ चिक्षेप च ततस्तत्तु भद्रकाल्यां महासुरः जाज्वल्यमानं तेजोभी रविबिम्बमिवांबरात् ८ दृष्ट्वा तदापतच्छूलं देवी
शूलममुंचत तच्छूलं शतधा तेन नीतं स च महासुरः ९ हते तस्मिन्महावीर्ये महिषस्य चमूपतौ आजगाम गजारूढश्चाम-
रस्त्रिदशार्दनः १० सोपि शक्तिं मुमोचाथ देव्यास्तामंबिका द्रुतम् हुंकाराभिहतां भूमौ पातयामास निःप्रभाम् ११ भग्नां
शक्तिं निपतितां दृष्ट्वा क्रोधसमन्वितः चिक्षेप चामरः शूलं बाणैस्तदपि साच्छिनत् १२ ततः सिंहः समुत्पत्य गजकुंभांतरे
स्थितः बाहुयुद्धेन युयुधे तेनोच्चैस्त्रिदशारिणा १३ युध्यमानौ ततस्तौ तु तस्मान्नागान्महीं गतौ युयुधातेतिसंरब्धौ प्र-
हारैरतिदारुणैः १४ ततो वेगात्खमुत्पत्य निपत्य च मृगारिणा करप्रहारेण शिरश्चामरस्य पृथक्कृतम् १५ उदग्रश्च रणे
देव्या शिलावृक्षादिभिर्हतः दंतमुष्टितलैश्चैव करालश्च निपातितः १६ देवी क्रुद्धा गदापातैश्चूर्णयामास चोद्धतम् बाष्क-
लं भिंदिपालेन बाणैस्ताम्रं तथांधकम् १७ उग्रास्यमुग्रवीर्यं च तथैव च महाहनुम् त्रिनेत्रा च त्रिशूलेन जघान परमेश्वरी १८
विडालस्यासिना कायात्पातयामास वै शिरः दुर्धरं दुर्मुखं चोभौ शरैर्निन्ये यमक्षयम् १९ रामाय ॥

तेनेत्यत्र प्रहृष्टा भावश्छांदसः १४ तत इति युद्धानंतरं वेगात्खं उत्पत्य गत्वा उत्पत्य नस्ततो निपत्य तृतीयैत्यर्थः १५ उदग्रश्चेति रणे युद्धे
दंतैर्गजदंतनिर्मितायुधैः मुष्टिभिः तलैः चपेटैरित्यर्थः यद्वा दंतैर्दंतघातैरित्यर्थः १६ देवीति उद्धतं तन्नामानं भिंदीति दमथः १७ १८

[illegible]

एवमिति गणान् निश्वासभवान् २० कांश्चिदिति खुरः कदुर्गादिः २१ वेगेनेति वेगो गतेः भ्रमणं मण्डलाकारगतिः २२ निपात्येति
प्रमथा गणाः २३ २४ वेगेति वेगयुक्तभ्रमणेन विक्षुण्णा कुट्टिता व्यशीर्यत कर्मकर्तरि रूपं सर्वतः सर्वे सार्वविभक्तिकस्तसिः प्लावया॥
मास जलेनेति शेषः २५ धुतेति कम्पितेत्यर्थः खण्डं खण्डं यासां क्रियायोगो श्वासानिलेनास्ताः प्रक्षिप्ताः शतशः अचलाः पर्वताः नभसः आकाशात्
पतिता इत्यर्थः २६ २७ सेति सा तस्योपरि पाशं क्षिप्त्वा तेन बबन्धेत्यन्वयः २८ तत इति तस्य सिंहस्य शिरो यावच्छिनत्ति तावत्खड्गपाणिः पुरुषोऽदृश्यतेति शेषः २९ तत इति
तं पुरुषं खड्गचर्मणा सह देवीति शेषः ३० पुरुषं देवी खड्गचर्मणा सह तस्माद्धितैः सायकैश्छिछेदेत्यन्वयः ३० क॥

एवं संक्षीयमाणे तु स्वसैन्ये महिषासुरः माहिषेण स्वरूपेण त्रासयामास तान्गणान् २० कांश्चित्तुण्डप्रहारेण खुरक्षेपै॥
स्तथापरान् लाङ्गूलताडितांश्चान्याञ्छृङ्गाभ्यां च विदारितान् २१ वेगेन कांश्चिदपरान्नादेन भ्रमणेन च निःश्वासपवनेना
न्यान्पातयामास भूतले २२ निपात्य प्रमथानीकमभ्यधावत सोऽसुरः सिंहं हन्तुं महादेव्याः कोपं चक्रे ततोऽम्बिका २३
सोऽपि कोपान्महावीर्यः खुरक्षुण्णमहीतलः शृङ्गाभ्यां पर्वतानुच्चांश्चिक्षेप च ननाद च २४ वेगभ्रमणविक्षुण्णा म
ही तस्य व्यशीर्यत लाङ्गूलेनाहतश्चाब्धिः प्लावयामास सर्वतः २५ धुतशृङ्गविभिन्नाश्च खण्डं खण्डं ययुर्घनाः श्वासा॥
निलास्ताः शतशो निपेतुर्नभसोऽचलाः २६ इति क्रोधसमाध्मातमापतन्तं महासुरम् दृष्ट्वा सा चण्डिका कोपं तद्वधाय तदाक
रोत् २७ सा क्षिप्त्वा तस्य वै पाशं तं बबन्ध महासुरम् तत्याज माहिषं रूपं सोऽपि बद्धो महामृधे २८ ततः सिंहोऽभवत्सद्यो यावा॥
त्तस्याम्बिका शिरः छिनत्ति तावत्पुरुषः खड्गपाणिरदृश्यत २९ तत एवाशु पुरुषं देवी चिच्छेद सायकैः तं खड्गचर्मणा सा
र्द्धं ततः सोऽभून्महागजः ३० करेण च महासिंहं तं चकर्ष जगर्ज च कर्षतस्तु करं देवी खड्गेन निरकृन्तत ३१ ततो महासुरो भू
यो माहिषं वपुरास्थितः तथैव क्षोभयामास त्रैलोक्यं सचराचरम् ३२ ततः क्रुद्धा जगन्माता चण्डिका पानमुत्तमम् पपौ पुनः
पुनश्चैव जहासारुणलोचना ३३ ननर्द चासुरः सोऽपि बलवीर्यमदोद्धतः विषाणाभ्यां च चिक्षेप चण्डिकां प्रति भूधरान् ३४
सा च तान्प्रहितांस्तेन चूर्णयन्ती शरोत्करैः उवाच तं मदोद्धूतमुखरागाकुलाक्षरम् ३५

करेणेति महासिंहं दे
वीवाहनं कर्षतस्तस्य सिंहस्य
सितादिः निराकृन्ततेति छिन्नवती ३१ तत इति तथैव प्राग्वदेव ३२ तत इति महिषस्य शिवावतारत्वेन जायमानस्यादि विच्छेदाय च॥
मद्यपानेन ... बोधयितुं ... एतत् पानमद्य कर्म ... पानादरुणलोचना पुनः पुनर्जहास चेत्यन्वयः ३३ ननर्देति ब
लं शरीरम् वीर्यमुत्साहः ताभ्यां मदोद्धतः ३४ सा चेति मदेनोद्धूतः ... मुखरागो यस्मात् सा आकुलाक्षरमिव वचनं क्रियाविशे
षणम् मद्यस्वभावोऽयम् ३५

दु.टी. ना. १३

देव्युवाच गर्जगर्जेति संभ्रमेण द्विरुक्तिर्मदेन च पिबामीति पूर्वं पुष्पाविधुक्तिस्तत्र ज्ञानं प्रतिज्ञायेरिति न दोषः ३८ ऋषिरुवाच एवमिति
समुत्पत्य कूर्दनं कृत्वा तमारूढा अथ एनं पादेनाक्रम्य कंठे च दिव्यात् कंठेन शूलेन ताडयति स्मान्वयः ३९ तत इति तया पदाक्रांतः इत्युक्तोपि सः
ततः शूलताडनोत्तरम् ततः महिषरूपी स्वात् निजमुखादर्धनिष्क्रांतः निःसृतार्धकाय एव देव्या वीर्येण शक्तिप्रतिबंधेन संवृतः प्रतिबद्धः नि
ष्क्रमितुं नाशकदित्यर्थः ४० अर्द्धेति एवं च शिरश्छेदाद्ध्रुवं तत् हत्वा एवं शूलपाणिना शिवेन च शिरश्छेदाद्योद्धा वा घस्यात्मृगो वा धः यत्तु पुनि
रोक्तः कल्पांतरीय इति तन्न पुराकल्पे यथा हतं प्रतिकल्पं तथैव तु प्रवर्तते स्वयं देवी दित्यादीनां नाशमायाति नचैव जायते युद्धमिति कालि
कापुराणात् दृष्टव्यवहारः तेन क्रियाप्रतिकल्पमेकैव न तत्र विजातीया उत्पत्तौ कल्पभेदेन क्वचिद्भेदो हरिवंशादिप्रामाण्यादिसवतत्त्व ब्रह्

देव्युवाच गर्जगर्जक्षणंमूढमधुयावत्पिबाम्यहम् मयात्वयिहतेत्रैवगर्जिष्यंत्याशुदेवताः ३८ ऋषिरुवाच एवमुक्त्वासमुत्प
त्य साऽऽरूढातंमहासुरम् पादेनाक्रम्यकंठेचशूलेनैनमताडयत् ३९ ततःसोपिपदाक्रांतस्तयानिजमुखात्ततः अर्द्धनिष्क्रांतए
वासीद्देव्यावीर्येणसंवृतः ४० अर्द्धनिष्क्रांतएवासौयुध्यमानोमहासुरः तयामहासिनादेव्याशिरश्छित्वानिपातितः ४१ त
तोहाहाकृतंसर्वंदैत्यसैन्यंननाशतत् प्रहर्षंचपरंजग्मुःसकलादेवतागणाः ४२ तुष्टुवुस्तांसुरादेवींसहदिव्यैर्महर्षिभिः जगु
र्गंधर्वपतयोननृतुश्चाप्सरोगणाः ४३ इतिमार्कंडेयपुराणेसावर्णिकेमन्वंतरेदेवीमाहात्म्येमहिषासुरवधः ३ ऋषिरुवा
च शक्रादयःसुरगणानिहतेतिवीर्येतस्मिन्दुरात्मनिसुरारिबलेचदेव्या तांतुष्टुवुःप्रणतिनम्रशिरोधरांसावाग्भिःप्रहर्षपुल
कोद्गमचारुदेहाः १ देव्यायायाततमिदंजगदात्मशक्त्यानिःशेषदेवगणशक्तिसमूहमूर्त्या तामंबिकामखिलदेवमहर्षिपूज्यां
भक्त्यानताःस्मविदधातुशुभानिसानः २ यस्याःप्रभावमतुलंभगवाननंतोब्रह्माहरश्चनहिवक्तुमलंबलंच साचं
डिकाखिलजगत्परिपालनायनाशायचाशुभभयस्यमतिंकरोतु ३

वेदैर्नेयश्चायमेव प्रतिकल्पं कृष्णचरितमेवमेवोत्पत्येति नारदप्रश्ने प्रतिकल्पं तथैवमेव चरितं नात्र संशय इति ब्रह्मवैवर्तादौ च ४१ तत इति ननाश
पलायितं हाहेति कृत्वा येनेति सैन्यविशेषणं ४२ तुष्टुवुरिति सुराः इंद्राद्याः दिव्यैर्ब्रह्मादिभिः सह महर्षिभिश्च सह तुष्टुवुरित्यर्थः ४३ इति सप्तशतीव्या
ख्याने तृतीयोध्यायः ३ तुष्टुवुः सुरा इत्युक्तं तां स्तुतिमाह ऋषिरुवाच शक्रादय इति आदिनाम रुद्राः तस्मिन्दुरात्मनि सुरारिबले देव्या निहते अन्वयः शिरो
धरा ग्रीवा अंसाः स्कंधाः पुलका रोमांचाः १ देव्येति आततं व्याप्तं तत्र हेतुश्च निःशेषदेवगणशक्तीनां समूहनात्मसमूहे येन का किं समूह एव तेजोरूपा प्रच
यरूपा मूर्तिर्विग्रहो यस्याः तया अर्थः सर्वस्य इति भावेकः नताः स्मेत्यत्र विसर्गलोपः २ यस्या इति यस्याः अतुलं प्रभावं तेजः बलं शारीरकं च अनंतः स
हस्रास्योपि ब्रह्मा चतुर्मुखोपि हरः सर्वज्ञोपि वक्तुं नालं न पर्याप्ताः अशुभभयाभयस्येत्यर्थः द्वंद्वात्समाहारे ३ ॥ १३

याश्रीरिति पापात्मनां भवनेष्वलक्ष्मीः कृतधियां निर्मलान्तःकरणानां हृदयेषु बुद्धिः स्वर्गापवर्गसाधनं ज्ञानं सतां हृदयेषु श्रद्धा आस्ति
क्यबुद्धिः कुलजनप्रभवस्य सम्भूतस्य लज्जा मनो हृदयेषु लज्जा करणीयप्रवृत्तिजनकोऽन्तःकरणवृत्तिविशेषः नताः स्मेति प्राग्वत् ४ एवं आपा
ततस्तु निर्वक्तुमशक्यमित्याह किमिति असुरादयः देवाः शिवादयः गणाः प्रमथास्तेषु अपि च अचिन्त्यं सर्वोत्कृष्टत्वादनिरूपणी
यं तव रूपं अतः किं केन प्रकारेण वर्णयाम च परं दैत्यनाशकारि भूरि वीर्यं अतिप्रभूतं कृष्टं च परं युद्धेषु यानि चरितानि तान्यद्भुतानि अत
त्कृष्टानि अतः किं वर्णयाम अयमन्वयः सर्वत्राऽचिन्त्यपदमन्वेति ५ मूलप्रकृतित्वमेवेत्याह हेतुरिति समस्तजगतां हेतुः मूलकारणम्
तत्र हेतुः यतस्त्रिगुणा सत्त्वरजस्तमोयुता न च रागादिबन्धनं सर्वकारणत्वमनुपपन्नं तत आह अपीति त्रिगुणापि दोषैः रागादिभिर्न ज्ञायसे
नाश्रिता भवसि यद्वा दोषविशिष्टैः केनापि न ज्ञायसे [illegible] भावादिमध्यैः नन्वपरिच्छिन्नतया सर्वेहवेनस्मादत आह हरिहरादिभिरप
पारा अज्ञानपरिच्छेद्या परिच्छेदाभावादित्यर्थः तत्र हेतुः यतः सर्वाश्रया सर्वेषामाश्रयः कार्यस्यास्य कार्यस्य कारणमाश्रयोऽतः सर्वत्र वर्तमा

याश्रीः स्वयं सुकृतिनां भवनेष्वलक्ष्मीः पापात्मनां कृतधियां हृदयेषु बुद्धिः श्रद्धा सतां कुलजनप्रभवस्य लज्जा तां त्वां नताः स्म परिपाल
य देवि विश्वम् ४ किं वर्णयाम तव रूपमचिन्त्यमेतत् किं चातिवीर्यमसुरक्षयकारि भूरि किं चाहवेषु चरितानि तवाद्भुतानि सर्वेषु देव्यसुर
दि= देवगणादिकेषु ५ हेतुः समस्तजगतां त्रिगुणापि दोषैर्न ज्ञायसे हरिहरादिभिरप्यपारा सर्वाश्रयाखिलमिदं जगदंशभूतमव्याकृता हि
परमा प्रकृतिस्त्वमाद्या ६ यस्याः समस्तसुरता समुदीरणेन तृप्तिं प्रयाति सकलेषु मखेषु देवि स्वाहासि वै पितृगणस्य च तृप्तिहेतुरुच्चार्य
से त्वमत एव जनैः स्वधा च ७ या मुक्तिहेतुरविचिन्त्यमहाव्रता त्वमभ्यस्यसे सुनियतेन्द्रियतत्त्वसारैः मोक्षार्थिभिर्मुनिभिरस्तसमस्तदोषैर्विद्यासि सा भ

तियां

ना च यतस्त्वमव्याकृता षड्विधविकाररहितत्वात् नामरूपहीनत्वाच्च हि यतः संसारस्याद्या परमा प्रकृतिः सत्त्वरजस्तमसां साम्यावस्थासि कीदृ
शी परमा परः आत्मा मीयते जीवभावेन विच्छिद्यते यया परमात्मैव प्राकृतधर्माभासाज्जीवत्वेनाध्यवसीयते ६ यस्या इति हे देवि यस्याः समुदीर
णेन समुच्चारणमात्रेण सकलसुरसमूहः सर्वयज्ञेषु तृप्तिं प्रयाति सा स्वाहा त्वमेवासि वै प्रसिद्धं तथा पितृगणस्यापि तृप्तिहेतुस्त्वमेव यतः अत एव जनैः
पितृकर्मणि स्वधा च उच्चार्यसे च त्वं स्वाहा देवकर्मणि ७ प्रकृतिस्वरूपत्वमुक्त्वा ब्रह्मलोपितमेवेत्याह येति हे देवि या मुक्तिहेतुः अविचिन्त्यमहाव्रतेत्य विद्या
नचिन्तनीया अप्यविछिन्नं महाव्रतं अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहरूपं योगमार्गस्य प्रसिद्धं साधनं यस्याः हे ईश्वरी च या सा भगवती भगवद्धि द्या
परमा उत्कृष्टा विद्या न हि यया वरणभञ्जिका ब्रह्मज्ञानरूपा त्वमेवासि हि यतः अस्तसमस्तरागादिदोषैः मोक्षेच्छुभिर्मुनिभिः वशीकृते
न्द्रियैः तत्त्वं ब्रह्मैव ज्ञेयत्वेन सारो येषां तैरभ्यस्यसे इत्यर्थः च अभ्यस्यसे इत्यत्र असन्धिः संहितायामनित्यत्वात् २ ४ रामाय नमः

दु॰टी॰
मा॰
१४

शब्देति सुविमलानां अपौरुषेयत्वेन दोषरहितानां ऋग्यजुषां उद्गीथः साम्नां भक्तिविशेषः तेन रम्यः पदपाठो येषां साम्नां तेषां च निधा।
नमाश्रयः शब्दब्रह्मरूपा भवस्य संसारस्य भावनाय शश्वदविच्छेदाय वार्तावृत्तिशीला त्रयी वेदत्रयी सा त्वं भगवती [illegible] विशेषतः सर्वे।
जगतां परमार्तिहन्त्री अनेन सर्वविद्यास्वरूपात्वमेवेत्युक्तम् ९ तदधिष्ठातृत्वमेवेत्याह मेधासीति मेधा सरस्वती [illegible] सि वड्भवस्व
त्वेन दुर्गापीत्युच्यते दुर्गमसंसारसागरस्य नौः ज्ञानद्वारा एवं सती हि नत्वा लक्ष्मीत्वमुक्तं प्रसिद्धनौकाव्यतिरेकमाह असंगेति ... हृदय एकाधि
वासा हि भगवती शंभोः कृतायतिष्ठा आसन्न येया अर्धशरीरत्वात् उत्तराद्धेन शिवत्वमेव लक्ष्मीत्वे चोक्तं १० ईषदिति ईषद्धाससहितं कान्तः सपा
द्मयः सर्वाङ्गीकरणविशिष्टं तव वक्त्रं विलोक्यापि आगतरोषेण प्रहरणं महिषासुरेण सहसा दर्शनसमकालमेव तन्नयाः ति त्विष्टं ते यन्ना।

शब्दात्मिका सुविमलर्ग्यजुषां निधानमुद्गीथरम्यपदपाठवतां च साम्नां देवी त्रयी भगवती भवभावनाय वार्ता च सर्वजगतां
परमार्तिहन्त्री ९ मेधासि देवि विदिताखिलशास्त्रसारा दुर्गासि दुर्गभवसागरनौरसङ्गा श्रीः कैटभारिहृदयैककृताधिवासा
गौरी त्वमेव शशिमौलिकृतप्रतिष्ठा १० ईषत्सहासममलं परिपूर्णचन्द्रबिम्बानुकारि कनकोत्तमकान्तिकान्तम् अत्यद्भुतं प्रहृत
मात्तरुषा तथापि वक्त्रं विलोक्य सहसा महिषासुरेण ११ दृष्ट्वा तु देवि कुपितं भ्रुकुटीकरालमुद्यच्छशाङ्कसदृशच्छवि यन्न सद्यः श्रु=
प्राणान्मुमोच महिषस्तदतीव चित्रं कैर्जीव्यते हि कुपितान्तकदर्शनेन १२ देवि प्रसीद परमा भवती भवाय सद्यो विनाशयसि
कोपवती कुलानि विज्ञातमेतदधुनैव यदस्तमेतन्नीतं बलं सुविपुलं महिषासुरस्य १३ ते सम्मता जनपदेषु धनानि तेषां तेषां
यशांसि न च सीदति धर्मवर्गः धन्यास्त एव निभृतात्मजभृत्यदारा येषां सदाभ्युदयदा भवती प्रसन्ना १४ ॥ श्रीमः

इतेतत्त्वाश्चर्यमित्यर्थः जगन्मोहकमपि तत्स्मेरत्वमुत्तिसुभगं यं तादृशमप्यपि वधेन देव्या एवोत्कर्षः सिध्यति ११ दृष्ट्वेति दृष्ट्वा
पीत्यर्थः भ्रुवोः कुटीरकता तया करालं भीषणं उद्यच्छशाङ्कस्य मनेनातिरिक्तता अनेन महिषस्यातिधीरत्वं देव्युत्कर्षः प्राग्वदेव १२ देवीति
देवि प्रसीदेत्यत्र कारणं विचार्यैवमेतद्वचः प्रसन्नत्वादेव तवेत्याह भवती परमा सानुग्रहा मायाद्धि येयस्मात्तादृशी कथमेतज्ज्ञातं तत्राह येता
नोभवाय कोपवती सती त्वं नो रिपूणां कुलानि सद्यो विनाशयसि तत्र संप्रतिपत्तिमाह विज्ञातमित्यादि एवं च कोपोऽप्युपकारकत्वात्फल
कोन त्वस्वाभाविक इति सत्त्वगुणप्रधानत्वं सूचितम् १३ ते इति संमताः सत्कारयोग्याः कृताः धर्मवर्ग इति त्रिवर्गः धर्मार्थकाममोक्ष
रूपः धन्याः पुण्यत्वेन प्रसिद्धाः निभृता नितरां पालिता आत्मजाद्या अभ्युदयदा सर्वमनोरथदा १४ ॥ ॥ १४

धर्म्याणीति हे देवि भवतीप्रसादात् यः सुकृती प्राग्जन्मार्जितपुण्यवान् तत एव सुकृतेन तत्प्रसादादेव प्रत्याहृतः नित्यनैमित्तिका
दावतिश्रद्धावान् प्रतिदिनं सदैव यावदैहिकावच्छेदेन सकलानि धर्म्याणि कर्माणि करोति पुनस्तत एव त्वत्प्रसादेन फलं कर्मभूमौ त्व
त्प्रसादादेव स्वर्गं प्रयाति ततः क्रमेण चापवर्गं च नत्र निश्चये तेन हेतुना लोकत्रयेपि फलदा हि त्वमेव ज्ञायसे इति भावः १५ दुर्गेति दुर्गे दुर्गमा
त्सङ्कटेष्विति यावत् तत्रास्मिन्केऽहरतिच दारिद्र्यशब्देन भावेप्यन्न भयप्रतिकूलसंस्थानं आर्द्रचित्ता स्निग्धचित्ता दुर्गास्मरणेन च दुर्गा जगदि
दं सर्वं दुर्गा सर्वस्य कारणम् अहमेव दुर्गा इत्येवं रूपे विभज्य गाढं सर्वे विश्वः सर्वस्य कारणम् अहं विश्वेति चेतुमहिम्नः स्मरणाद्वा इति
निबृहन्नारदीयोक्तेः १६ सर्वोपकारित्वमुपपादयति एभिरिति हैरतिमर्यः उपैतीति सह उपैतीत्यर्थः एते दैत्यानामसमभ्युपगमेन नर

धर्म्याणिदेविसकलानिसदैवकर्माण्यत्यादृतःप्रतिदिनंसुकृतीकरोति स्वर्गंप्रयातिचततोभवतीप्रसादाल्लोकत्रयेपि
फलदाननुदेवितेन १५ दुर्गेस्मृताहरसिभीतिमशेषजंतोः स्वस्थैःस्मृतामतिमतीवशुभांददासि दारिद्र्यदुःखभयहारि
णिकात्वदन्यासर्वोपकारकरणायसदार्द्रचित्ता १६ एभिर्हतैर्जगदुपैतिसुखंतथैतेकुर्वंतुनामनरकायचिरायपापम्
संग्राममृत्युमधिगम्यदिवंप्रयांतुमत्वेतिनूनमहितान्विनिहंसिदेवि १७ दृष्ट्वैवकिंनभवतीप्रकरोतिभस्मसर्वासु
रानरिषुयत्प्रहिणोषिशस्त्रम् लोकान्प्रयांतुरिपवोपिहिशस्त्रपूताइत्थंमतिर्भवतितेष्वपितेतिसाध्वी १८ खड्गप्रभानि
करविस्फुरणैस्तथोग्रैःशूलाग्रकांतिनिवहेनदृशोसुराणाम् यन्नागताविलयमंशुमदिंदुखंडयोग्याननंतवविलो
कयतांतदेतत् १९ दुर्वृत्तवृत्तशमनंतवदेविशीलंरूपंतथैतदविचिंत्यमतुल्यमन्यैः वीर्यंचहंतृहृतदेवपराक्रमाणांवैरिष
पिप्रकटितैवदयात्वयेत्थम् २

।कायेति नाहर्थ्ये पुनदर्थीनयापि रणमृत्युं प्राप्य स्वर्गं गच्छन्त्विति हेतूद्देशेन सिद्धत्वाज्जगदहितान्विहंसीत्यर्थः १७ दृष्ट्वैवेति दर्शनेनै
नरेष्वेतावन्मात्रेणैव भस्मकरणयोग्येषु यच्छस्त्रं पातयसि तेषामप्यमलोकप्राप्तये इति तेषामुपकारिकैव त्वमिति किं वक्तव्यं भक्ते
ष्विति भावः १८ खड्गेति निकरः समूहः विस्फुरणं सर्वत्र प्रसरणं निवहः समूहः यद्विलयं नागता तदेतत् अंशुमान्सूर्यः इन्दुखण्डस्तद्यो
ग्यं तद्वक्त्रमाननं तव विलोकयतां च तेषामसुराणामित्यादि विशेषः १९ दुर्वृत्तेति दुर्वृत्तानां वृत्तं पापं तस्य शमनं तव शीलं स्वाभाविको गुणः
तथा तथैव रूपं स्वमत एवाचिन्त्यं क्वचिद्दृष्टमिति चिन्ताविषयः दृष्ट्वैव किं नेत्यादिना उक्तं रूपमाकृतिः च पुनः हतास्ते असुराः अमरा देवा येन हन्तारः परा
क्रमो येषां तेषां दैत्यानां हन्तृ वीर्यं एवं च हृतरूपेण हतबलेन च तेषां शस्त्रपूतानां नरकमपि न दीर्घपापयाना येऽहितास्तेषु दयैव त्वया प्रकटितेति भावः २०

दु·टी·
ना·
१५

केनेति अतिहारि मनोहरं विरोधो अलंकारः केनोपमेति तृतीया आर्षत्वात् चित्ते कृपा रिपुष्वपि उपकारकत्वात् निष्ठुरता तत्संहार एव आ
त्रकृपा स्वाभाविकी निष्ठुरता आरोपिता इति विरोधपरिहार इति बोध्यम् २१ त्रैलोक्यमिति लुप्तोपमं तत्कान्वयः ततो रिपुगणा इत्यन्तमपरं
वाक्यं मत्सरमित्ततो भवमित्यन्तमपरं अनेनाचिन्त्यरूपेऽप्यतदिद्धृत नमस्ते इत्यनेन नमस्कारातिरिक्तप्रत्युपकारकरणे नास्माकं सामर्थ्यमि
ति ध्वनितम् २२ २३ प्राच्यामिति दक्षिणे इत्यस्य दिग्भागे इति शेषः भ्रामणेनेत्यत्र रक्षणाभाव आर्षः २४ सौम्यानीति सृष्टिस्थितिव्यापा
राणि अत्यर्थघोराणि संहारव्यापाराणि तथा भुवं पृथिवीं चेत्यर्थः २५ खड्गेति संगः सम्पर्कः २६ ऋषिरुवाच एवमिति सुरैरिति कृति

केनोपमा भवतु तेऽस्य पराक्रमस्य रूपं च शत्रुभयकार्यतिहारि कुत्र चित्ते कृपा समरनिष्ठुरता च दृष्टा त्वय्येव देवि वरदे भुवनत्र
येऽपि २१ त्रैलोक्यमेतदखिलं रिपुनाशनेन त्रातं त्वया समरमूर्धनि तेऽपि हत्वा नीता दिवं रिपुगणा भयमप्यपास्तमस्माकमु
न्मदसुरारिभवं नमस्ते २२ शूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके घंटास्वनेन नः पाहि चापज्यानिःस्वनेन च २३ प्राच्यां
रक्ष प्रतीच्यां च चंडिके रक्ष दक्षिणे भ्रामणेनात्मशूलस्य उत्तरस्यां तथेश्वरि २४ सौम्यानि यानि रूपाणि त्रैलोक्ये विचरन्ति ते
यानि चात्यर्थघोराणि तै रक्षास्मांस्तथा भुवम् २५ खड्गशूलगदादीनि यानि चास्त्राणि तेऽम्बिके करपल्लवसङ्गीनि तैरस्मा
२२ न्रक्ष सर्वतः २६ ऋषिरुवाच एवं स्तुता सुरैर्दिव्यैः कुसुमैर्नंदनोद्भवैः अर्चिता जगतां धात्री तथा गंधानुलेपनैः २७ भक्त्या
समस्तैस्त्रिदशैर्दिव्यैर्धूपैस्तु धूपिता प्राह प्रसादसुमुखी समस्तान्प्रणतान्सुरान् २८ देव्युवाच व्रियतां त्रिदशाः सर्वे यदस्म
त्तोऽभिवाञ्छितम् देवा ऊचुः भगवत्या कृतं सर्वं न किंचिदवशिष्यते ३० यदयं निहतः शत्रुरस्माकं महिषासुरः यदि चापि व
रो देयस्त्वयास्माकं महेश्वरि ३१ संस्मृता संस्मृता त्वं नो हिंसेथाः परमापदः यश्च मर्त्यः स्तवैरेभिस्त्वां स्तोष्यत्यमलानने ३२
तस्य वित्तर्द्धिविभवैर्धनदारादिसंपदाम् वृद्धयेऽस्मत्प्रसन्ना त्वं भवेथाः सर्वदाम्बिके ३[illegible] शुभाय नमो नमः

न्यायेन मूर्धस्थितपरमपि नंदनं देवोद्यानं दिव्यैरुत्कृष्टैः गंधाः श्रीरामादयः अनुलेपनं श्रीचन्दनादि २७ भक्त्येति दिव्यैर्मनोज्ञैः धूपैस्त्वि
तिपाठः देव्युवाच व्रियतामिति देवा ऊचुः भगवत्येति २९ यदिति यत इत्यर्थः पूर्वान्वयार्थं उत्तरार्धमुत्तरान्वयि यदि वा शब्द एवम
र्थे यद्येवं तथापि वरो देय इति तत्वत्कृतं रक्षणमाप्तमित्यर्थः अस्माकं अस्मभ्यमित्यर्थः ३० संस्मृतेति हिंसेथा घ्नसि अत्रापि उत्तरार्धमुत्तरा
न्वयि ३१ तस्येति वित्तर्द्धिविभवैरिति सहयोगे तृतीया भवने च सार्धिम वित्तानां [illegible] विभवा ऐश्वर्यादयः धनदारादीनां १५
संपदस्तासां पालनभावाः आदिना [illegible] वृद्धये उपचयाय ३२

उत्तरचरित्रस्य रुद्र ऋषिः महासरस्वती देवता अनुष्टुप्छन्दः भीमा शक्तिः भ्रामरी बीजम् सूर्यस्तत्त्वम् सामवेदः स्वरूपम् महासरस्वतीप्रीत्यर्थे उत्तरचरित्रपाठे विनियोगः घण्टाशूलहलानि शङ्खमुसले
चक्रं धनुः सायकं हस्ताब्जैर्दधतीं घनान्तविलसच्छीतांशुतुल्यप्रभाम् गौरीदेहसमुद्भवां त्रिजगतामाधारभूतां महापूर्वामत्र सरस्वतीमनुभजे शुम्भादिदैत्यार्दिनीम् ॥

ऋषिरुवाच इतीति तथात्मनः आत्मनश्चार्थे इत्यन्वयः तथेत्युक्ता तथास्त्वित्युक्त्वा भद्रं कालयति वर्धयतीति भद्रकाली अंतर्हिताऽदृ
श्याभूदेवमन्वयः ३३ इतीति एवं ३४ पुनश्चेति गौरीदेहः देहकारणं यस्मात्तथ्यर्थः समुद्भवः प्रादुर्भावः यथा येन प्रकारेण त
थेदेवः दुष्टवधो देवलोकरक्षणं च तत्र तेनाप्यस्याः कोपेत्यत आह उपकारिणीति उपकारस्वभावा यद्वत्सर्थः तच्छृणुष्वेत्याचेष्टः त
त्तत्प्रकारं मया मनः निपातोपि स्याः लोकप्रसिद्धः स्त्रापुष्ककर्मलक्ष्मीर्विलक्ष्मीवाक्य श्रुतिश्चेत्यमरः सार मतिः ... शीत ... मति
ह्रांतकरी सूक्तं दष्टे दैवे मेरशिभिः इत्यादि शुद्धविक्रांतिस्तोत्रं चैव ब्रह्मेश्वर कथयंति स्वविलीमिवोलुणो वेदपारगाः ... नेच ... प्रसा
धिप यमन स्वरमिति महिषांतकरी सूक्ते दैवे मरविंशि स्वरः ६ देव्यायया ततमिति साकेश्विशदेवमहर्षिपूज्यत्वविशेषणानि सुस्मा
भिः स्तुत तथोयाश्चलिभिः केवल एषीतोऽस्य तिकर्तव्य प्रतिपादनाचेति बोध्यम् इति शिवभट्टसुतसतीगर्भजनागोजीकृतसप्तशतीव्याख्या
नेचतुर्थोध्यायः ४

ऋषिरुवाच इति प्रसादिता देवैर्जगतोऽर्थे तथात्मनः तथेत्युक्त्वा भद्रकाली बभूवान्तर्हिता नृप ३३ इत्येतत्कथितं भूप
संभूता सा यथा पुरा देवी देवशरीरेभ्यो जगत्त्रयहितैषिणी ३४ पुनश्च गौरीदेहात्सा समुद्भूता यथाभवत् वधाय दुष्टदैत्या
नां तथा शुम्भनिशुम्भयोः रक्षणाय च लोकानां देवानामुपकारिणी तच्छृणुष्व मयाख्यातं यथावत्कथयामि ते ३५ इति मा
र्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये शक्रादिस्तुतिः ४ ऋषिरुवाच पुरा शुम्भनिशुम्भाभ्यामसुराभ्यां शचीपतेः
त्रैलोक्यं यज्ञभागाश्च हृता मदबलाश्रयात् १ तावेव सूर्यतां तद्वदधिकारं तथैन्दवं कौबेरमथ याम्यं च चक्राते वरुणस्य च २

यथावत्कथयामीति प्रतिज्ञातमितिहासमाह ऋषिरुवाच पुरेति कश्यपाद्दितिसाधुसन्ततौ जज्ञे शुंभनिशुंभाविमौ समासेखोचेति वाम
नपुराणे लक्ष्मीतन्त्रेपि तामसे तु नरेशा कमद्दाविद्याभिधायका गौरीदेहात्समुद्भूता कौशिकीति तदाह्वयम् वधाय दुष्टदैत्यानां तथा शुम्भनि
लाx शुंभयोः मदीयाः शक्तयो याश्चत्वादेवशरीरगाः तेजोरूपधारिण्यः सा तच्छापिविद्धु मम नाभिनिर्हम्रै ते दानं तत्याभ्यर्युष्याय था सहा ८
मानितः सर्वा मदीयाश्च प्रवाहिताः ... इति तु शुम्भनिशुंभकाविति नारायणीस्तुतिनीमस्कर्कपरमशोभनम् पुरंदर
तदा हृष्टैर्देवैरग्निपुरोगमैः एवं संस्तूयमानायां कौशिकासदेवशुसर्वकामप्रदायकम् उत्पत्तिर्दुर्गविक्रान्तिः स्तुतिश्चैवमितिपु
रातनैः पठ्यते विस्तुविश्वेदेवेर्देवनागपारगैः एतत्सा वत्साधीसकृत्टस्यासा मदीयसी महालक्ष्मीर्महाभागा प्रकृतिः परमेश्वरी कुष्णाः स्वत
ये सृष्ट्वा लाहैः सकलैः सुरैः नमो देव्यादिकं देवीसूक्तं सर्वफलप्रदम् इमा देवी स्तुवन्ति स्म तद्वशेनेरमा ति ... चैतान्ततीमुसकलानेव सर्वमहदे
स्मृते यत्तमाविष्णुपरस्थापतां सिद्धिमवाप्स्यतीति अग्निपुरस्सरदेवगणा हृष्टास्तानारायणीसूक्तं नुत्वनारायणीनमोस्तु त इति वक्ष्यमाणात् न
मो देवैरिमादिकं देवीसूक्तं देवीपदनोपक्रमादिति बोध्यम् मदोग्रबलशक्तिः १ तावेवेति स्वविक्रमेणैव लोकान्प्रपतीतिसूर्यतत्सभावः स

दु·टी·
ना·
१६

तावेवेति पवनः अस्यतेऽनेनेति निकृष्टोऽग्निः अनेन तदधिकारमित्यर्थः विनिर्द्धूताः कंपिताः अतः परैः आसमन्ताज्जिताः संतो भ्रष्टराज्या इ
त्यर्थः ३ हृतेति आत्मसात्कृतेत्यर्थः अधिकारो विद्यते येषां तादृशास्त्रिदशा अधिकारहृतरूपार्थौ तदभावे लोकार्याभावः तेन त्रयस्त्रिंशदित्य
र्थः ते चादित्या द्वादश रुद्रा एकादश वसवोऽष्टौ विश्वेदेवाविति एकरूपत्रिदशसंख्यत्वेन भयार्थः निराकृताः स्वर्गाद्दूरीकृताः सारिताः ।
संस्मरंति स्मरंति स्म वर्त्तमानसामीप्ये लट् ४ तत्र हेतुमाह तयेति स्मृता सती अखिलाः परमापद इत्यन्वयः ५ इतीति भवान्या अभि
धकृस्थानं तादृशमवद्दमनं तत्र हिमवति शुंभनिशुंभदमन्याः सरस्वतीरूपिण्या विष्णुमायायास्तत्राविर्भावोपक्रमे ६ प्रशब्दस्तुष्टोति ताम्
वील्येन स्तुतिमाह देवा ऊचुः नम इति देवीप्रभृतीन्द्रियमतीं महादेवी महतीं ब्रह्मादीनामपि देवानां सर्गादिव्यवहारप्रवर्तयित्री शिवा

तावेव पवनर्द्धिं च चक्रतुर्वह्निकर्म च ततो देवा विनिर्द्धूता भ्रष्टराज्याः पराजिताः ३ हृताधिकारास्त्रिदशास्ताभ्यां सर्वे नि
राकृताः महासुराभ्यां तां देवीं संस्मरन्त्यपराजिताम् ४ तयास्माकं वरो दत्तो यथापत्सु स्मृताखिलाः भवतां नाशयिष्या
मि तत्क्षणात्परमापदः ५ इति कृत्वा मतिं देवा हिमवन्तं नगेश्वरम् जग्मुस्तत्र ततो देवीं विष्णुमायां प्रतुष्टुवुः ६ देवा ऊ
चुः नमो देव्यै महादेव्यै शिवायै सततं नमः नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम् ७ रौद्रायै नमो नित्यायै गौर्यै
धात्र्यै नमो नमः ज्योत्स्नायै चेन्दुरूपिण्यै सुखायै सततं नमः ८ कल्याण्यै प्रणता वृद्ध्यै सिद्ध्यै कुर्मो नमो नमः नैरृत्यै भूभृ
तां लक्ष्म्यै शर्वाण्यै ते नमो नमः ९ दुर्गायै दुर्गपारायै सारायै सर्वकारिण्यै ख्यात्यै तथैव कृष्णायै धूम्रायै सततं नमः १०
अतिसौम्यातिरौद्रायै नतास्तस्यै नमो नमः नमो जगत्प्रतिष्ठायै देव्यै कृत्यै नमो नमः ११ ६३ रामाय नमः

प्रकृतिरूपा प्रकृत्यै स्वेच्छाशक्त्यै भद्रायै कल्याणशक्त्यै नियताः समाहितचित्ताः प्रणता नम्राः स्मेति पादपूरणे ७ रौद्रायै इति संहारशक्त्यै नि
त्यायै कालानवच्छिन्नायै नित्या शक्तिरूपा च गौरी तद्वर्णा धात्री जगदाधारा ज्योत्स्ना चंद्रकिरणा इंदुश्चंद्रः तद्रूपवत्त्वाज्ज्योतीरूपत्वस्य
सुखायै परमानंदरूपा ८ कल्याण्यै इति तत्कारी वृद्धिरुपचयः सिद्धिरणिमादिरष्टविधा प्रणता नम्राः नमो नमः कुर्म इत्यन्वयः निरृतिर
लक्ष्मीः स्वार्थेऽण् यद्वा नैरृत्यै रक्षःशक्त्यै शर्वाणी शिवशक्तिः दुर्गायै इति दुःखेन ज्ञेयायै दुर्गा दुःखाधिगमः पारः परिच्छेदो यस्याः सा दुर्गपारा सारा
सारं करोतीति च सारा तदहं ते सर्वकारिण्यै सर्वजनने सत्त्वं तस्यै प्रकृतिपुरुषयोर्भेदज्ञानं ख्यातिस्तद्रूपायै प्रसिद्धायै वा कृष्णा तद्वर्णा कृष्णशक्ति
धूम्रा तद्वर्णा धूम्रशक्तिः १० अतीति विद्यात्वेन संसारतापशामकत्वादतिसौम्या अविद्यारूपेण संसारहेतुत्वादतिरौद्रा नमो नम इति तद्धि
रुक्तं नता नम्रा इत्यर्थः जगत्प्रतिष्ठा जगदुपादानकारणं जगदाधारश्च देव्यै देवशक्त्यै कृतिः क्रिया ११ ॥ ॥ १४

ज्ञानं

येति विष्णुमायामूलाविद्येतिशब्दितासर्वागमेषुप्रतिपादिता नमस्तस्यैइतित्रिकोणकायिकवाचिकमानसिकरूपनमस्कारस्वयंदर्शि
तम् एवमग्रेपि १२ चेतनानिर्विकल्पकंशाविज्ञक्तिरित्युच्यते १३ बुद्धिःसविकल्पकज्ञानं १४ निद्रासुषुप्त्यवस्थास्वप्नावस्थाच १५
क्षुधाभ्यवहरिच्छा १६ छायासन्तापाभावः वर्णप्रसादश्च १७ शक्तिःकार्यजननसामर्थ्यं १८ तृष्णाग्रनात्मीयस्वीकारेच्छा १९
क्षान्तिः सत्यपिसामर्थ्येऽपकारिणि अपकाराचिकीर्षा २० जातिर्गोत्वादि २१ लज्जास्वाकार्यविषयान्यज्ञानभीः २२ शान्तिरिन्द्रियसं
के यमः विषयोपरतिरूपः २३ श्रद्धाऽकृत्यायुर्आस्तिक्यम् २४ कान्तिः शोभा २५ लक्ष्मीधनादिसंपत् मोक्षप्राप्तिर्वा २६ वृत्तिर्जी

यादेवीसर्वभूतेषुविष्णुमायेतिशब्दिता नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः १२ यादेवीसर्वभूतेषुचेतनेत्यभिधीय
ते नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः १३ यादेवीसर्वभूतेषुबुद्धिरूपेणसंस्थिता नमस्तस्यैनमस्तस्यै·नमोनमः १४
यादेवीसर्वभूते· निद्रारूपेण· नमस्तस्यै· १५ यादेवीसर्वभू· क्षुधारूपेण· नमस्तस्यै· १६ यादेवी· छायारू· नम· १७
यादेवीसर्वभूते· शक्तिरूपेण· नमस्तस्यै· १८ यादेवीसर्वभू· तृष्णारूपेण· नमस्तस्यै· १९ यादेवी· क्षान्तिरू· नम· २०
यादेवीसर्वभूतेषुजातिरूपेणसंस्थिता नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः २१ यादेवीसर्वभूतेषुलज्जारूपेणसंस्थिता
नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः २२ यादेवीसर्वभूतेषुशान्तिरूपेणसंस्थिता नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोन
मः २३ यादेवीसर्वभूतेषुश्रद्धारूपेणसंस्थिता नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः २४ यादेवीसर्वभूतेषुकान्तिरू
पेण· नमस्तस्यैनमस्तस्यैनमस्तस्यैनमः २५ यादेवी· लक्ष्मीरू· नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः २६ यादेवी· वृ
त्तिरू· नमस्तस्यै· २७ यादेवी· स्मृतिरू· नमस्तस्यै· २८ यादेवीस· दयारू· नमस्तस्यै· २९ यादेवी· तुष्टिरू· नमस्त·
स्यै· ३० यादेवी· मातृरूपे· नमस्त· ३१ यादेवीस· भ्रान्तिरू· नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः ३२ इंद्रियाणामधि
धिष्ठात्रीभूतानांचाखिलेषुया भूतेषुसततंतस्यैव्याप्तिदेव्यैनमोनमः ३३ चितिरूपेणयाकृत्स्नमेतद्व्याप्यस्थिताजगत्
नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः ३४

विकारवृत्तिश्च २७ स्मृतिरनुभूतविषयंज्ञानं २८ दयापरदुःखप्रहाणेच्छा २९ तुष्टिर
धिगताधिकानभिलाषः ३० मातापालयित्रीमातृकाधिष्ठात्रीदेवताच ३१ भ्रान्तिरतस्मिंस्तद्बुद्धिःसंशयः ३२ इंद्रियेति याखिलेषुभू
तेषुअंतर्यामिविधयास्थिता इंद्रियाणांज्ञानकरणानांभूतानांचज्ञानविषयाणांसूक्ष्मस्थूलानां अधिष्ठात्रीप्रवर्त्तिकानिवर्त्तिकाच त
स्यैव्याप्तिप्रयुक्तदेव्यैव्यापिकायैइत्यर्थः ३३ चितिः चयनंवृद्धिः ३४ अचनमस्त्वेनेननमोतमंत्रस्वरूपत्वे इदमुपलक्षणंसर्वमंत्रस्वरू १८

दु·टी· ना· १२

ग्रन्थसंग्रहः विष्णुमायाचेतनाबुद्धिनिद्राक्षुधा छाया शक्तिस्तृष्णा च क्षान्तिर्जातीवतः परे १ लज्जाशान्तिस्ततः श्रद्धाकान्तिर्लक्ष्मी
स्ततः परा वृत्तिः स्मृतिर्दयाचैव तुष्टिर्माताततः परम् २ भ्रान्तिर्याश्चिक्षितिरित्येवं त्रयोविंशतिसंख्यकाः इतोऽधिकमनार्षमत्रैक्षकाम्यायने
स्मृतम् स्तोत्रेति याशुभहेतुरीश्वरी सुरेन्द्रेणादिभिः पूर्वं स्तुता तथा इन्द्रेण महिषवधे समभीष्टसंश्रयात्प्राप्तैः दिनेषु प्रतिदिनं सेविता
सा नः शुभानि भद्राणि अतिशयितैः करोतु आपदश्चाभिहन्त्वित्यन्वयः ३५ येति सांप्रतं च या ईशा सुरैरस्माभिः उद्धतदैत्यपीडितैः नमस्यते
स्तूयते च करोतु सा न इत्यनेनान्वयः या च भक्तिनम्रशरीरैरस्माभिः स्मृता सती स्मृतिक्षण एव नः सर्वापदो हन्ति करोतु सा न इत्यनेनान्वयः
ऋषिरुवाच एवमिति तत्र देवसंनिहिते देशे हे राजन् पार्वती जाह्नव्यास्तोये स्नातुमभ्याययौ स्तवनेषु युक्तानां देवानामभिसन्धावेद्यया

स्तुता सुरैः पूर्वमभीष्टसंश्रयात्तथा सुरेन्द्रेण दिनेषु सेविता करोतु सा नः शुभहेतुरीश्वरी शुभानि भद्राण्यभिहन्तु चापदः ३५ ८२
या साम्प्रतं चोद्धतदैत्यतापितैरस्माभिरीशा च सुरैर्नमस्यते या च स्मृता तत्क्षणमेव हन्ति नः सर्वापदो भक्तिविनम्रमूर्तिभिः ३६ ८३
८४ ऋषिरुवाच एवं स्तवाभियुक्तानां देवानां तत्र पार्वती स्नातुमभ्याययौ तोये जाह्नव्या नृपनन्दन ३७ साब्रवीत्तान् सुरान् सुभ्रूर्भव
द्भिः स्तूयतेऽत्र का शरीरकोशतश्चास्याः समुद्भूताब्रवीच्छिवा ३८ स्तोत्रं ममैतत् क्रियते शुम्भदैत्यनिराकृतैः देवैः समेतैः स
मरे निशुम्भेन पराजितैः शरीरकोशाद्यत्तस्याः पार्वत्या निःसृताम्बिका कौशिकीति समस्तेषु ततो लोकेषु गीयते ४० ता
स्यां विनिर्गतायां तु कृष्णाभूत्सापि पार्वती कालिकेति समाख्याता हिमाचलकृताश्रया ४१ ८८ नमः

विमृष्टः ३७ तथापि तेषामज्ञाने दृष्टा का स्तूयत इति पृच्छति सेति कामदत्वात्स्तूयते युष्माभिः भावयमदस्यायाश्च भावादिति भावः ततः
ज्ञानमेव दृष्ट्वा तेषां द्रष्टया स्वयमब्रवीत् अस्याः स्वशक्तिः तज्जा न प्रतिवक्ष्येः शरीररूपात्कोशात्गृहात्समुद्भूता सत्वप्रधानांशेन प्रादुर्भूता तदेव
शिवाब्रवीदित्यर्थः ३८ किमब्रवीत्तदाह स्तोत्रमिति समेतैर्मिलितैः रणे निशुम्भेन पराजितैः अतएव शुम्भेन निराकृतैः स्वर्गान्निःसारितैः ३९
शरीरेति यत् निर्गता ततः कौशिकीति गीयत इत्यन्वयः कौशिकीति तु लक्ष्म मध्यं नक्षत्रं शरीरात् स्वशक्तिरेवं रूपेण निर्गतेति बोध्यम् ४० तस्यामि
ति कृष्णाभूत् कालिकाभूत् पूर्वं तारकवर्णा इदं कृष्णवर्णा पार्वती गौरीति तन्नाम समभूत् पार्वत्याः गौरवर्णा कौशिकीकरणाद्वा गौरीति नाम तस्याः
तिबोध्यम् आश्रयः स्थाने तद्भक्तैः कृतिकरत्वेन गौरीदेहात्समुद्भूता या सत्वैकगुणाश्रया साक्षात्सरस्वती प्रोक्ता शुम्भासुरनिबर्हिणी दधौ च
अष्टभुजा बाणमुसलशूलचक्रभृत् शंखं घण्टां लाङ्गलं च कार्मुकं वसुधाधिप एषा संपूजिता भक्त्या सर्वज्ञत्वं प्रयच्छति इति शिवदूतीसंहितायां
दैत्यौ शुम्भनिशुम्भाख्यौ भ्रातरौ संबभूवतुः याचितं नत्वपुंसा नामाब्रह्मणः परमेष्ठिनः अवध्यत्वं जगत्यस्मिन् पुरुषैरखिलैरपि अयोनिजा तु या का
मा स्यादङ्गकोशसमुद्भवा अजातपूर्वसंस्पर्शा रतिरविलङ्घ्यपराक्रमा तया स्याद्वधः संख्ये तयोः कामाभिभूतयोः इति चामर्त्यैर्ब्रह्मणाभ्यां १२

प्राह तयास्त्विति ततस्ताभ्यां जगत्त्रितउपद्रुते तयोर्लयाय देवैर्ब्रह्मप्रार्थितत्वाच्छिवं विनिंद्यापि रहस्यं वाक्कोपयित्वा यथा
तथ्यं तद्वर्णकोशाज्जाशक्तिमकामांकन्यकात्मिकां निशुम्भशुम्भयोर्हन्त्रीं देवेभ्यो दातुमर्हसि एवमभ्यर्थितो यात्राभग
वान्नीललोहितः कालीत्याहरहस्यं वामित्युक्तेः क्रुद्धां तां दृष्ट्वा क्रीडार्थं कालीत्युक्तमिति शिवेनोक्तेः भूयसी तत्त्वाप्रीति
रगौरमिति मे वपुः क्रीडोक्तिरपि कालीति वदेति कथमन्यथेति देवीवचनं श्रुत्वा तस्य कथं विदेवात्तया देवी गौतमाश्रमं प्राप्य
तपश्चरित्वा रजोगुणाधिकात् ब्रह्मणो गौररूपं प्राप्य नीलकोशामुत्सृष्टवती ततः कोशादुद्भूता कौशिकीत्युक्तं तत्कोशं सहसो
त्सृज्य गौरी सा समजायत तत्कोशादात्मनोत्सृष्टा कौशिकी नाम नामतः कोशात्काला तु दप्रख्याकन्यकासमजायत सा तु
मायात्मिका शुक्रियोगनिद्राहरेः स्मृतेति ततः प्रस्थानात्तयादेव्या देवान्प्रति कौशिकीमहिमा कथितः किं देवेन न सा दृष्टा यो
स्तस्याः कौशिकी मया तादृशी कन्यकालोके न भूता न भविष्यति अज्ञानतुस्पर्शीरचितरथ्याचालिसुन्दरीति यस्याः शरीरको
शाद्दिव्यनिर्गतासामातंगी यानिःसृता सैवोग्रतारा उग्रादपि भयात्त्राति त्यजतीति कालिकापुराणोक्तमहम् तया याका

ततोऽम्बिकां परं रूपं बिभ्राणां सुमनोहरं ददर्श चण्डो मुण्डश्च भृत्यौ शुम्भनिशुम्भयोः ८४ ताभ्यां शुम्भाय चाख्याता अतीवसु
मनोहरा काप्यास्ते स्त्री महाराज भासयन्ती हिमाचलं ८२ नैव तादृक् क्वचिद्रूपं दृष्टं केनचिदुत्तमं ज्ञायतां काप्य
सौ देवी गृह्यतां चासुरेश्वर ८४ स्त्रीरत्नमतिचार्वंगी द्योतयन्ती दिशस्त्विषा सा तु तिष्ठति दैत्येन्द्र तां भवान्द्रष्टुमर्ह
ति ८५ यानि रत्नानि मणयो गजाश्वादीनि वै प्रभो त्रैलोक्ये तु समस्तानि सांप्रतं तानि ते गृहे ८६ ऐरावतः समा
नीतो गजरत्नं पुरन्दरात् पारिजाततरुश्चायं तथैवोच्चैःश्रवा हयः ८७ विमानं हंससंयुक्तमेतत्तिष्ठति तेंगणे र
त्नभूतमिहानीतं यदासीद्वेधसोऽद्भुतं ८८ निधिरेष महापद्मः समानीतो धनेश्वरात् किंजल्किनीं ददौ चाब्धिर्मालामम्लानपं
कजाम् ८९।

यकोशादुद्भूता कालिकायाः स्तु भैरवा सा कौशिकीति विख्याता चारुरूपा मनोहरेति च तत्रैव ८४ तत इति
परमुत्कृष्टं ८२ ताभ्यामिति शुम्भाय तत्क्रियायाम्यमभिप्रेतीतिसंप्रदानत्व काप्यनिर्वाच्या॥ नैवेति असौ देवी कापि अतो
तां यत्नां मनुष्यदारान्त स्वरूपं विचार्यतां गृह्यतां चक्षुंगीक्रियतां च ८४ ननु किमस्या गीकारस्तस्याऽऽस्त्येतत्राह स्त्रीर
त्नमिति उत्तमस्त्रीत्यर्थः भवान्तां द्रष्टुमर्हति सा तव दर्शनयोग्या यतो ऽतोंऽगीक्रियतामिति भावः तद्धेतो एवं च स
मस्तरत्नानि यतस्तव गृहे ऽतइयमपि ते भविष्यत्येवेति भावः ८६ तदेव विवृणोति ऐरावत इति ८७ विमानमिति।

कु.टी.
ना
१८

वेधसोवरप्रदस्यापियद्विमानमानीतंतदद्भुतं एवंचांशेतवह्निसकलाजय्यत्वंसूचितं आनीतंबलान्नीतंदत्तस्य
दक्षवरत्नाद्वैतेनोपेक्षितइतिहृद्यम् ४८ निधिरिति किंजल्कमीनदृशामिकांद्रदाविस्यसम्भयादितिकोषः ४९
छत्रमिति कांचनस्रावि स्वर्णवर्षणशीलम् प्रजापतेर्दक्षस्य अयंविसर्गमजेयः ५० मृत्योरिति उत्क्रान्ति

छत्रंतेवारुणंगेहेकांचनस्रावितिष्ठति तथायंस्यंदनवरोधःसुरासीत्प्रजा
पतेः ५० मृत्योरुत्क्रान्तिदानामशक्तिरीशात्वयाहृता पाशाःसलिलराजस्य
भ्रातृस्तवपरिग्रहे ५१ निशुंभस्याब्धिजातानांसमस्तारत्नजातयः वह्नि
रपिदद्यौतन्मम अग्निशौचेचवाससी ५२

१८

मरणं परिग्रहेपरिजनेकरणभूतत्वयाहृतेवा ५१ निशुंभस्येति अब्धिजातानांरत्नजातयश्चनिशुंभस्यपरि
इत्यर्थः अग्निशौचे अग्निरेवशौचंनैर्मल्यकरणंययोरित्यर्थः कल्पवृक्षोपकल्पितमदेवत्स्यमग्निप्रक्षेपा
पनेमलेवाससौशुभमस्यअग्निशौचमाकृः ५२

एवमिति तेइतिकर्त्तुःशेषत्वविवक्षायांषष्ठी ५३ ऋषिरुवाच निशम्येति सुग्रीवंतन्नामानं ५४ इती
चेति इदंचेत्यर्थः वक्ष्यमाणस्यपरामर्शः अनेनशुंभनिशुंभयोरजोगुणमयत्वंसूचयति अतएवे

एवंदैतेंद्ररत्नानिसमस्तान्याहृतानिते स्त्रीरत्नमेषाकल्याणीत्वया
कस्मान्नगृह्यते ५३ ऋषिरुवाच निशाम्येतिवचःशुंभःसतदाचंडमुंड
योः प्रेषयामाससुग्रीवंदूतंदेव्यामहासुरं ५४ इतिचेतिचवक्तव्या
सागत्वावचनान्मम यथाचाभ्येतिसंप्रीत्यातथाकार्यंत्वयालघु ५५
सतत्रगत्वायत्रास्तेशैलोद्देशेतिशोभने सादेवींतांततःप्राहश्लक्ष्णंमधु
रयागिरा ५६

तद्वधार्थंसत्वगुणप्रधानोवतारइतिबोध्यम् लघुशीघ्रं ५५ सेति सदूतः ततःशुंभसकाशात् यत्रशै
लोद्देशेसादेवीआस्ते तत्रगत्वाश्लक्ष्णमत्युत्कटंमधुरयाकोमलयागिराप्राहेत्यन्वयः ५६

दु·टी· दूतउवाच देवीति नकेवलंदैत्यस्वरएवकिंतुत्रैलोक्यस्यपरमेश्वरइत्यर्थः सकाशंसमीपं ५७ त
ना· देवोपपादयति अव्याहतेति देवयोनिषुतदाज्ञागणेषु ५८ तदुक्तिमाह ममेति वशानुगतएवानु
१८ गाइत्यर्थः पृथक्पृथकइंद्राद्यधिकारिभेदेन ५९ त्रैलोक्यइति अशेषतः अशेषाणिहस्त्यश्वादीनि त

दूतउवाच देविदैत्येश्वरःशुंभस्त्रैलोक्यपरमेश्वरः दूतोहंप्रेषितस्तेनत्वत्सकाश
मिहागतः ५७ अव्याहताज्ञःसर्वासुयःसदादेवयोनिषु निर्जिताखिलदैत्यारिः
सयदाहशृणुष्वतत् ५८ममत्रैलोक्यमखिलंममदेवावशानुगाः यज्ञभागान
हंसर्वानुपाश्नामिपृथक्पृथक् ५९ त्रैलोक्येवररत्नानिममवश्यान्यशेषतः त
थैवगजरत्नंचहृत्वादेवेंद्रवाहनं ६० क्षीरोदमथनोद्भूतमश्वरत्नंममामरैः उच्चैःश्र
वससंज्ञंतत्प्रणिपत्यसमर्पितं ६१ यानिचान्यानिदेवेषुगंधर्वेषूरगेषुच रत्नभू
तानिभूतानितानिमय्येवशोभने ६२

१८

त्नत्वयि ६० क्षीरोदेति नरश्वरत्नंहस्त्याइंद्रादन्यःकारेणगृहीत्वाअमरैःप्रणिपत्यमसमर्पितमित्यर्थः
उच्चैःश्रवसेत्यत्रएषोदरादित्वादडागमः ६१ यानीति रत्नभूतानिश्रेष्ठानि रत्नरूपाणिस्थितानीत्यर्थः
६२

स्त्रीति वयमित्यात्मगौरवे वक्तृवचनम् ६३ मां वेति उरुविक्रमं महाविक्रमं वै प्रसिद्धौ ६४ परमेति प्राप्स्यसे इति छांदसस्तङ् मत्परिग्रहात्
मदाश्रयात् समालोच्य विचार्य मत्परिग्रहतां मत्पत्नीत्वं ६५ ऋषिरुवाच इतीति अंतःस्मितत्वेन सावहेलनमुत्तरं सूचितम् ६६ देव्युवाच स
त्यमिति अत्र शुंभविषये त्रैलोक्याधिपतिरिति सम्मतं ६७ किं त्विति अत्र परिग्रहत्वविषये अल्पबुद्धित्वादिति संभवाय प्रतिज्ञाहानौ च महान्दो
षः पापं च गुरुरूपपरिग्रहे ६८ प्रतिज्ञातमाह यो मामिति जयति संग्रामातिरिक्तेनापि प्रकारेण संग्रामे यो मे दर्पं बलनिमित्तमभिमानं व्यपोहति य
श्च मे प्रतिबलः समानबलः एवंत्वाभावे उत्तरः तादृशश्च तत्त्वज्ञ एवेति गूढ आशयः ६९ तदेति पाणिग्रहणात्पूर्वं मम गमनमनुचितमिति।

स्त्रीरत्नभूतां त्वां देवि लोके मन्यामहे वयम् सा त्वमस्मानुपागच्छ यतो रत्नभुजो वयम् ६३ मां वा ममानुजं वापि निशुंभमुरुविक्र।
मं भज त्वं चंचलापांगि रत्नभूतासि वै यतः ६४ परमैश्वर्यमतुलं प्राप्स्यसे मत्परिग्रहात् एतद्बुद्ध्या समालोच्य मत्परिग्रहतां व्रज ६५
ऋषिरुवाच इत्युक्ता सा तदा देवी गंभीरांतःस्मिता जगौ दुर्गा भगवती भद्रा ययेदं धार्यते जगत् ६६ देव्युवाच सत्यमुक्तं त्व।
या नात्र मिथ्या किंचित्त्वयोदितं त्रैलोक्याधिपतिः शुंभो निशुंभश्चापि तादृशः ६७ किं त्वत्र यत्प्रतिज्ञातं मिथ्या तत्क्रियते कथम् श्रू।
यतामल्पबुद्धित्वात्प्रतिज्ञा या पुरा कृता ६८ यो मां जयति संग्रामे यो मे दर्पं व्यपोहति यो मे प्रतिबलो लोके स मे भर्ता भविष्यति ६९
तदागच्छतु शुंभोत्र निशुंभो वा महासुरः मां जित्वा किं चिरेणात्र पाणिं गृह्णातु मे लघु ७० दूत उवाच अवलिप्तासि मैवं त्वं देवि ब्रू।
हि ममाग्रतः त्रैलोक्ये कः पुमांस्तिष्ठेदग्रे शुंभनिशुंभयोः ७१ अन्येषामपि दैत्यानां सर्वे देवा न वै युधि तिष्ठंति संमुखे देवि किं पुनः
स्त्री त्वमेकिका ७२ इंद्राद्याः सकला देवास्तस्थुर्येषां न संयुगे शुंभादीनां कथं तेषां स्त्री प्रयास्यसि संमुखम् ७३ सा त्वं गच्छ।
मयैवोक्ता पार्श्वं शुंभनिशुंभयोः केशाकर्षणनिर्धूतगौरवा मा गमिष्यसि ७४ देव्युवाच एवमेतद्बली शुंभो निशुंभश्चातिवी।
र्यवान् किं करोमि प्रतिज्ञा मे यदनालोचिता पुरा ७५ स त्वं गच्छ मयोक्तं ते यदेतत्सर्वमादृतः तदाचक्ष्वासुरेंद्राय स च युक्तं करोतु यत् ७६

इति मार्कंडेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये दूतसंवादः ५

भावः ७० दूत उवाच अवलिप्तेति अवलेपो गर्वः एवं प्रागुक्ते यद
ग्रे पुमानपि न तिष्ठेत् तदग्रे स्त्री न तिष्ठेदिति भावः ७१ ननु इंद्रे देवीमतः स्यात्स्यामीमत आह अन्येषामपीति द्वयम् एकिकेति कुत्सायामकच्
७२ ७३ उपसंहरति सा त्वमिति मयैवेत्यनेनान्यागमनेऽन्येषां सर्वेषां दुष्टतया गौरवं न तिष्ठेदित्यर्थः तदेव विपक्षे बाधकमाह केशाकर्षणेन वि
धूतं त्यक्तं गौरवं यस्यास्तादृशी मा गमिष्यसि अदितमानजयेः सकाशमित्यर्थः ७४ देव्युवाच एवमेतदिति सोपहासवचनः प्रतिज्ञेत्यस्य स्फुटो विशेषः २५
स त्वमिति मया यदेतदुक्तं तत्सर्वमादृतः सन् तस्मा आचक्ष्व स च युक्तं करोत्वित्यन्वयः आदृत इत्यनेन स्वानातिरिक्तं वदेति सूच्यते ७६ इति स

५

दु॰टी॰ ऋषिरुवाच इतीति अमर्षः कोपः समाचष्ट उक्तवान् १ तस्येति दैत्यानामधिपं सेनापतिम् २ हे इति दुष्टां दुर्वचनां विह्वलां आकुलाम्
चा॰ ३ ४ ऋषिरुवाच तेनेति सहस्राणामसुराणां षष्ट्या वृत इत्यन्वयः ५ स इति तुहिन हिमं मूलं समीपम् ६ विप्रतेवाधकमाह नचेदि-
४१ ति नचेदित्यर्थः ७ देव्युवाच दैत्येश्वरेणेति एवं केशाकर्षणविह्वलाम् बलेसामर्थ्ये सेनाच सावष्टंभोक्तिरेषा ८ ऋषिरुवाच इतीति तं साम

ऋषिरुवाच इत्याकर्ण्य वचो देव्याः स दूतोमर्षपूरितः समाचष्टसमागम्य दैत्यराजाय विस्तरात् १ तस्य दूतस्य तद्वाक्यमाकर्ण्या-
सुरराट् ततः सक्रोधः प्राह दैत्यानामधिपं धूम्रलोचनम् २ हे धूम्रलोचनाशु त्वं स्वसैन्यपरिवारितः तामानय बलाद्दुष्टां केशाक-
र्षणविह्वलाम् ३ तत्परित्राणदः कश्चिद्यदि वोत्तिष्ठतेपरः स हन्तव्योमरो वापि यक्षो गंधर्व एव वा ४ ऋषिरुवाच तेनाज्ञप्तस्ततः
शीघ्रं स दैत्यो धूम्रलोचनः वृतः षष्ट्या सहस्राणामसुराणां द्रुतं ययौ ५ स दृष्ट्वा तां ततो देवीं तुहिनाचलसंस्थिताम् जगादोच्चैः
प्रयाहीति मूलं शुंभनिशुंभयोः ६ न चेत्प्रीत्याद्य भवती मद्भर्तारमुपैष्यति ततो बलान्नयाम्येष केशाकर्षणविह्वलाम् ७ देव्यु-
वाच दैत्येश्वरेण प्रहितो बलवान्बलसंवृतः बलान्नयसि मामेवं ततः किं ते करोम्यहम् ८ ऋषिरुवाच इत्युक्तः सोभ्यधावत्तामसु-
रो धूम्रलोचनः [illegible] हुंकारेणैव तं भस्म सा चकाराम्बिका ततः ९ अथ क्रुद्धं महासैन्यमसुराणां तथांबिका ववर्ष
सायकैस्तीक्ष्णैस्तथा शक्तिपरश्वधैः १० ततो धुतसटः कोपात्कृत्वा नादं सुभैरवम् पपातासुरसेनायां सिंहो देव्याः स्ववाहनः ११
कांश्चित्करप्रहारेण दैत्यानास्येन चापरान् आक्रान्त्या चाधरेणान्यान्स जघान महासुरान् १२ केषांचित्पाटयामास नखैः कोष्ठा-
नि केसरी तथा तलप्रहारेण शिरांसि कृतवान्पृथक् विच्छिन्नबाहुशिरसः कृतास्तेन तथापरे पपौ च रुधिरं कोष्ठादन्येषां धुतकेसरः
१४ क्षणेन तद्बलं सर्वं क्षयं नीतं महात्मना तेन केसरिणा देव्या वाहनेनातिकोपिना १५ श्रुत्वा तमसुरं देव्या निहतं धूम्रलोचनम्
बलं च क्षयितं कृत्स्नं देवीकेसरिणा ततः १६ चुकोप दैत्याधिपतिः शुंभः प्रस्फुरिताधरः आज्ञापयामास च तौ चंडमुंडौ महासु-
रौ १७ हे चंड हे मुंड बलैर्बहुभिः परिवारितौ तत्र गच्छत गत्वा च सा समानीयतां लघु १८ ॥ ६ ॥ रामः

स च कारेत्यर्थः ९ अथेति अंबिका कर्त्री शतपर्वकत्थापरश्वारस्वम् १० सिंहनादं कृत्वा सिंहो देव्याः प्रयातोऽभ्यर्थः इति मत्वा सिंहो युद्धे न
तस्थौ इति तत्र देवतागर्भविशेषणम् स्ववाहन इति अर्थाचादिनामसंस्तव स्त्रीयवाहनइत्यर्थः पपातप्राविशत् ११ कांश्चिदिति सप्तभिः आक्रान्ति
राक्रमणं तेन अधरेणाः धरकायेनाध्योहेन चान्यान्महासुरान्जघानेत्यन्वयः १२ केषामिति कोष्ठानि उदरमध्यानि तलो विस्तृतांगुलिः पाणिः
१३ १४ १५ श्रुत्वेति क्षयितमिति क्षयशब्दात्कारान्तौ क्षयितः कृतक्षयमित्यर्थः १६ तोऽप्येवांको १७ हे चंडेति बहुभिर्बलैरिमित्यर्थः गच्छत गत्वा १५

आनयने प्रकारद्वयमाह वाक्येन केशेष्विति आकर्षणमात्रादागमने बंधनेन वा इति गौरवाद्बहुवचनं सेनाभिप्रायं वा तथा सद्युधियु।
द्वेशसंदेहे यदि तत्र आनयने संदेहस्तदा सर्वैर्दैत्यैः सकलायुधैः साविशेषं तलि निहन्यतां मार्यतां इत्यर्थः उपसंहरति १९ तस्यामिति आगम्य।
तामिति तेन सर्वथा गृहीत्वा मशाक्याचेदेवं हत्वा आनयमिति आह वद्ध्वेति अथ इति पदान्तरे यदि शक्या तेन दिवधानां गृहीत्वैवागंतव्यमित्यर्थः धूम्र।
लोचनवधेनैकमावली २० इति श्रीविश्वमहाहस्तनत्नाभिजनगोजीभट्टकृते सप्तशतीव्याख्याने षष्ठोध्यायः ६ ऋषिरुवाच आज्ञप्ता इति
१ ददृशुरिति शैलेंद्रशृंगे हिमाचलशृंगे सिंहस्योपरि स्थितामित्यन्वयः २ ते इति चण्डादयः सप्रयत्नाः समादातुं ग्रहीतुं उद्यमं उद्योगं उ
द्यताः उत्साहवंतो ज्ञाताः आकृष्टकर्णांतकृष्टं कोशाद् उद्धृतमसिं तत्समीपगाः ग्रहीतुं उद्युता नानारूपाणां अर्थसमीपगा इत्यर्थः ३ अनेन च उत्सोदी।

केशेष्वाकृष्य बध्वा वा यदि वः संशयो युधि तदाशेषायुधैः सर्वैरसुरैर्विनिहन्यताम् १९ तस्यां हतायां दुष्टायां सिंहे च वि।
निपातिते शीघ्रमागम्यतां बध्वा गृहीत्वा तामथाम्बिकाम् २० इति मार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये धूम्रलोच।
नवधः ६ ऋषिरुवाच आज्ञप्तास्ते ततो दैत्याश्चण्डमुण्डपुरोगमाः चतुरंगबलोपेता ययुरभ्युद्यतायुधाः १ ददृशुस्ते ततो।
देवीमीषद्धासां व्यवस्थिताम् सिंहस्योपरि शैलेंद्रशृंगे महति कांचने २ ते दृष्ट्वा तां समादातुमुद्यमं चक्रुरुद्यताः आकृष्टचापा।
सिधरास्तथान्ये तत्समीपगाः ३ ततः कोपं चकारोच्चैरम्बिका तानरीन् प्रति कोपेन चास्या वदनं मसीवर्णमभूत्तदा ४ भ्रुकु।
टीकुटिलात्तस्या ललाटफलकाद्द्रुतम् काली करालवदना विनिष्क्रान्तासिपाशिनी ५ विचित्रखट्वांगधरा नरमालाविभूष।
णा द्वीपिचर्मपरीधाना शुष्कमांसातिभैरवा ६ अतिविस्तारवदना जिह्वाललनभीषणा निमग्नारक्तनयना नादापूरितदि
ङ्मुखा ७ सा वेगेनाभिपतिता घातयन्ती महासुरान् सैन्ये तत्र सुरारीणामभक्षयत तद्बलम् ८ पार्ष्णिग्राहांकुशग्राहियोध
घण्टासमन्वितान् समादायैकहस्तेन मुखे चिक्षेप वारणान् ९ तथैव योधं तुरगै रथं सारथिना सह निक्षिप्य वक्त्रे दशनैश्च।
र्वयन्त्यतिभैरवम् १० एकं जग्राह केशेषु ग्रीवायामथ चापरम् पादेनाक्रम्य चैवान्यमुरसान्यमपोथयत् ११ = यमः

नामपि तामसत्वेध्वनितम् अत एव तद्धार्थमलिनात्मसीप्रादुर्भावमाह ततइति मसीलिपिसाधनद्रव्यं तद्वत् श्यामवर्णं निःसरितकाली
प्रादुर्भूतादितिभावः भ्रुकुटीति तस्याः कुपितदेव्याः विनिष्क्रांता निःसृता ५ विचित्रेति खट्वांगपट्टिकाकंकालचर्दितांके कालपंजरास्थिवा
नरमालात्वेनरघाटृशतन्मृतिलाततिकः द्वीपीव्याघ्रः शुष्कमांसानि मांसदेहा अत एवातिभैरवा ६ अतीति अतिशयितो विस्तारो यस्य तादृ
शं वदनं यस्याः सा तथा ललनं चालनं निमग्नानि निरवृत्तानि नयनानि यस्याः निमग्नानि ७ ८ पार्ष्णीति पार्ष्णिग्राहो गजपार्श्वरक्षकः अंकु
शग्राही महामात्रः योधो गजारूढो वीरः ९ तथैवेति योधमिति जात्यावेकवचनम् एवं रथमपरमन्यमित्यादावपि चर्वयंति वर्तमानसामीप्ये

दु.टी.
ना.
२०

तैरिति मथितान्यपि मथितानि चर्वितानीत्यर्थः १२ बलिनामिति महात्मनां १३ १४ १५ शरेति चण्डः शरवर्षैः मुण्डः सहस्रशः तिग्मैश्चक्रैश्छा
दयामासेत्यन्वयः एवं च स्वर्कमेकैकं चण्डमुण्डयोः शरोत्पलत्वम् १६ तानीति मुखं विशमानानि चक्राणि घनोदरं विमानकं बिम्बानीव
बभुः शानचक्रोद्रसः ततः इति भीममिति क्रियाविशेषणम् वक्त्रान्तर्वक्त्रमध्ये विकटदन्ततया दुर्दर्शा ये दशनास्तैरुज्ज्वला तेजोमयी १८ उत्था
येति महासिंहमारुह्य उत्थाय इत्युक्ते सकोपवारणं यथा स्यात्तथा इति सिद्धान्ता देवी चण्डमधावत असि चण्डस्य तेनोद्यतेन १९ अथेति त्वा

तैर्मुक्तानि च शस्त्राणि महास्त्राणि तथासुरैः मुखेन जग्राह रुषा दशनैर्मथितान्यपि १२ बलिनां तद्बलं सर्वमसुराणां महात्मना
म् ममर्दाभक्षयच्चान्यानन्यांश्चाताडयत्तथा १३ असिना निहताः केचित्केचित्खट्वाङ्गताडिताः जग्मुर्विनाशमसुरा दन्ताग्राभि
हतास्तथा १४ क्षणेन तद्बलं सर्वमसुराणां निपातितं दृष्ट्वा चण्डोऽभिदुद्राव तां कालीमतिभीषणाम् १५ शरवर्षैर्महाभीमैर्भी
माक्षीं तां महासुरः छादयामास चक्रैश्च मुण्डः क्षिप्तैः सहस्रशः तानि चक्राण्यनेकानि विशमानानि तन्मुखम् बभुर्यथार्कबिं
बानि सुबहूनि घनोदरम् १७ ततो जहासातिरुषा भीमं भैरवनादिनी कालीकरालवक्त्रान्तर्दुर्दर्शदशनोज्ज्वला १८ उत्थाय च म
हासिंहं देवी चण्डमधावत गृहीत्वा चास्य केशेषु शिरस्तेनासिनाच्छिनत् १९ अथ मुण्डोऽभ्यधावत्तां दृष्ट्वा चण्डं निपातितम् तमप्य पातय=
ताडयद्भूमौ सा खड्गाभिहतं रुषा २० हतशेषं ततः सैन्यं दृष्ट्वा चण्डं निपातितम् मुण्डं च सुमहावीर्यं दिशो भेजे भयातुरम् २१ शि
रश्चण्डस्य काली च गृहीत्वा मुण्डमेव च प्राह प्रचण्डाट्टहासमिश्रमभ्येत्य चण्डिकाम् २२ मया तवात्रोपहृतौ चण्डमुण्डौ महापशू
युद्धयज्ञे स्वयं शुम्भं निशुम्भं च हनिष्यसि २३ ऋषिरुवाच ॥ तावानीतौ ततो दृष्ट्वा चण्डमुण्डौ महासुरौ उवाच कालीं
कल्याणी ललितं चण्डिका वचः २४ यस्माच्चण्डं च मुण्डं च गृहीत्वा त्वमुपागता चामुण्डेति ततो लोके ख्याता देवि भविष्यसि
२५ ॥ इति मार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये चण्डमुण्डवधः ७ ॥

ङ्गाभिहतं पूर्वोक्तखड्गाभिहतं अस्य शिरो न छिन्नं किं तु खड्गप्रहारमात्रं २० २१ शिर इति मुण्डं सशिरस्कं तद्देहमित्यर्थः प्रचण्डाट्टहा
सेन मिश्रं कर्म यथा भवति तथा यल्ललाटफलकान्निर्गता तां देवीं प्राहेत्यर्थः २२ मयेति युद्धयज्ञे महापशू इति रूपकम् उपहृतौ प्रधानो
पहारेण चण्डस्योपहारः २३ ऋषिरुवाच ताविति कालीं ललाटभवां कल्याणीति कर्तृविशेषणं चण्डिका कौशिकी २४ यस्मादिति चा
ण्डशिरोहारात् हे देवि ख्याता भविष्यसीत्यन्वयः चामुण्डेति पृषोदरादित्वात्साधु २५ अनेनेयमामसी कौशिकी तस्या काली कौशिकी
नियम्यते दर्शितम् इति श्रीमहामहोपाध्यायश्रीशिवभट्टसुतसतीगर्भजनागोजीभट्टकृते सप्तशतीव्याख्याने सप्तमोऽध्यायः ७ ॥ २०

चण्डेइति ऋषिरुवाच चण्डेइति क्षयितेषु क्षतनष्टेषु १ ततइति तेषां वधजकोपेनास्वाधीनचेताः अतएवसौ वधे प्रवृत्त इति भा
वः सर्वसैन्यानामिति दैत्यानां विशेषणम् २ अद्येति उदायुधाः उद्यतायुधाः तत्संज्ञकाः कम्बूनां तन्नाम्नां चतुरशीतिर्दैत्या इति शेषः ३
कोटीति कोटिवीर्याणि तन्नामानि धौम्राः धूम्रवंश्याः ४ कालकास्तन्नामानः दौर्हृदाः दुर्हृदोपत्यानि मौर्यास्तन्नामानः तथा कालकाद्या
अपत्यानि कालकेयाः असुराः सज्जाः ससामग्रीकाः ५ इतीति भैरवशासनम् ६ आयान्तमिति आयान्तमित्यर्थः अन्तरमध्यं ७ ततइति
तन्नादानिति बहुवचनम् महानादमित्येकत्वविवक्षया अतीवेत्यस्यानेकवारमित्यर्थो वा उपबृंहयदित्सर्वाधोऽभावः ८ धनुरिति ना

ऋषिरुवाच चण्डे च निहते दैत्ये मुण्डे च विनिपातिते बहुलेषु च सैन्येषु क्षयितेष्वसुरेश्वरः १ ततः कोपपराधीनचेताः शुम्भः
प्रतापवान् उद्योगं सर्वसैन्यानां दैत्यानामादिदेश ह २ अद्य सर्वबलैर्दैत्याः षडशीतिरुदायुधाः कम्बूनां चतुरशीतिर्निर्यान्तु
स्वबलैर्वृताः ३ कोटिवीर्याणि पञ्चाशदसुराणां कुलानि वै शतं कुलानि धौम्राणां निर्गच्छन्तु ममाज्ञया ४ कालका दौर्हृदा
मौर्याः कालकेयास्तथासुराः युद्धाय सज्जा निर्यान्तु आज्ञया त्वरिता मम ५ इत्याज्ञाप्यासुरपतिः शुम्भो भैरवशासनः नि
र्जगाम महासैन्यसहस्रैर्बहुभिर्वृतः ६ आयान्तं चण्डिका दृष्ट्वा तत्सैन्यमतिभीषणम् ज्यास्वनैः पूरयामास धरणीगगनान्तरम्
७ ततः सिंहो महानादमतीव कृतवान्नृप घण्टास्वनेन तन्नादमम्बिका चोपबृंहयत् ८ धनुर्ज्यासिंहघण्टानां नादापूरि
तदिङ्मुखा निनादैर्भीषणैः काली जिग्ये विस्तारितानना ९ तं निनादमुपश्रुत्य दैत्यसैन्यैश्चतुर्दिशम् देवी सिंहस्तथा
काली सरोषैः परिवारिताः १० एतस्मिन्नन्तरे भूप विनाशाय सुरद्विषाम् भवायामरसिंहानामतिवीर्यबलान्विताः ११ ब्रह्मे
शगुहविष्णूनां तथेन्द्रस्य च शक्तयः शरीरेभ्यो विनिष्क्रम्य तद्रूपैश्चण्डिकां ययुः १२ यस्य देवस्य यद्रूपं यथाभूषणवाहनम्
तद्वदेव हि तच्छक्तिरसुरान्योद्धुमाययौ १३ हंसयुक्तविमानाग्रे साक्षसूत्रकमण्डलुः आयाता ब्रह्मणः शक्तिर्ब्रह्माणी साभि
धीयते १४ माहेश्वरी वृषारूढा त्रिशूलवरधारिणी महाहिवलया प्राप्ता चन्द्ररेखाविभूषणा १५ नमायनमोनमः

दैः स्वानैः पूरिता दिङ्मुखा काली धनुर्ज्यासिंहघण्टानां भीषणैर्नादैर्जिग्ये जिता दैत्याधरा दिशोऽवेः कालीशब्दोऽजित इति भावः ९ काली
चालीलतारजा तदिति सरोषैः सक्रोधैः एतस्मिन्निति देवीदानवसंग्रामावसरे भवाय संपदे ११ ब्रह्मेति विष्णुशब्देन वराहनृसिंहावपि ग्रा
ह्यः स्वामातिरेकिण्यो देवताः शक्तिशक्तिमतोरभेदाभ्याम् १२ ब्रह्मादिदेवैरिर्यर्थकं तद्रूपैरिति माचष्टे यस्येति तद्वत् तथाविधस्वरूपा वा
दैवेत्यर्थः १३ हंसेति विमानाग्रेऽक्षस्रग्युते इति शेषः अक्षसूत्रं जपमाला ब्रह्मणोब्रह्माणमानयतीति व्युत्पत्तिः साधुः १४
माहेश्वरीति महाही नतः हानलोवलयोयस्याः चन्द्ररेखा चन्द्रकला १५ ॥

दु.टी.
ना.
२१

कौमारीति गुहरूपिणी गुहसमानाकारा कुमारसंबंधिनी शक्तिराययौ विलम्बार्थोऽत्र यो न रुक्मं ऐंद्री वज्रकापि यथा शक्रस्तथैव सेति वत् श्रंवि
कापटेन गुहस्य शिवस्य च हास्यं व्यञ्जयति तथैवेति खड्गशार्ङ्गपदेन बाणोऽप्युपलक्ष्यते बाजभिरीत्यात्रु हा शंखचक्रगदासिनी शार्ङ्गबाण
धराजाता वैष्णवी रूपशालिनीति वामनपुराणात् एतेनास्याः षड्भुजत्वम् १७ यज्ञेति यज्ञांशकल्पितवराहाकारः बिभ्रतो हरेरिति ने
नास्य विग्रहत्वमेवेति सूचितम् एवं नृसिंहोऽपि नचैवं कश्चिद्विग्रहोऽवतारभवतारस्य देहिनः शरभपक्षपातित्वं वराहबलहारकत्वं श्रुतं न्यसिंह
स्य च वराहस्य यथाधिकत्वं शक्रं विरुध्येतेति वाच्यम् तस्य लीलामात्रत्वात् १८ १९ वज्रेति यथा शक्रः इंद्राकारः परम् एवं सहस्राक्षत्वमस्याकार
तादृष्ट्वा गजराजपृष्ठगतः २० प्रतिविशिष्टतेजसः कौशिकायाः सविधे स्वर्गगतमशक्तास्ता देवशक्तीरीशानो देवोऽदर्शितवानित्याह

कौमारी शक्तिहस्ता च मयूरवरवाहना योद्धुमभ्याययौ दैत्यानम्बिका गुहरूपिणी १६ तथैव वैष्णवी शक्तिर्गरुडोपरि संस्थि
ता शंखचक्रगदाशार्ङ्गखड्गहस्ताभ्युपाययौ १७ यज्ञवाराहमतुलं रूपं या बिभ्रतो हरेः शक्तिः साप्याययौ तत्र वाराहीं बि
भ्रती तनुम् १८ नारसिंही नृसिंहस्य बिभ्रती सदृशं वपुः प्राप्ता तत्र सटाक्षेपक्षिप्तनक्षत्रसंहतिः १९ वज्रहस्ता तथैवैन्द्री ग
जराजोपरि स्थिता प्राप्ता सहस्रनयना यथा शक्रस्तथैव सा २० ततः परिवृतस्ताभिरीशानो देवशक्तिभिः हन्यन्तामसु
राः शीघ्रं मम प्रीत्याह चंडिकाम् २१ ततो देवीशरीरात्तु विनिष्क्रान्तातिभीषणा चण्डिकाशक्तिरत्युग्रा शिवाशतनिनादि
नी २२ सा चाह धूम्रजटिलमीशानमपराजिता दूत त्वं गच्छ भगवन् पार्श्वं शुम्भनिशुम्भयोः २३ ब्रूहि शुम्भं निशुम्भं च दानवाव
तिगर्वितौ ये चान्ये दानवास्तत्र युद्धाय समुपस्थिताः २४ त्रैलोक्यमिन्द्रो लभतां देवाः सन्तु हविर्भुजः यूयं प्रयात पातालं यदि

तत इति ताभिः परिवृत ईशानः मम प्रीत्या एताभिर्देवशक्तिभिर्महासुरा हन्यन्तामिति चंडिकामाहेत्यन्वयः स्वशक्तेः पार्वत्याः शब्दार्थतत्त्वेन
श्रुघत यद् ईशान एव तत्र शक्तवानिति भावः श्रेष्ठाधिकारिणः इंद्रादयः श्रेष्ठत्वाधिकारिणः शुम्भादिजितत्वेन पदप्राप्त्यसंभवात् २१ स्व ब्रह्मादीनाद
स्यापि सहायभूतशिवेन नेच्छ्रुत्वा भगवतीतस्योत्तरं नाह किन्तु काचिच्छक्तिरित्याह तत इति अतिभीषणा दर्शनमात्राद्भयंकरी प्रभुग्रा इस्व
भावा शिवानां शृगालीनां शतेनेव निनादिनी शतशब्दोऽनंतवाची नितरां तत्त्वतः शिवा सहिता एषैव शिवदूती शुम्भाः ते भक्तीशानावेदमा
तामुग्रोद्धरीकरालाकामदाभगा सा भगमालिनी भगोदरी भगाहा शाम्भगुलिका भगाद्योहादश योगिन्यस्ता इति कालिकापुराणे साचेति धू
म्रवर्ण जटावृतं सुपराजितानतदा अपरैरजिता च हरभाववान्मो वह त्वं शुम्भनिशुम्भयोः पार्श्वं च गच्छेत्यन्वयः गच्छेति निपातः कालमी
त्रैतेनात्र वीदित्यर्थः एतच्छिवापेतया स्यात्तस्मात्प्रादुर्भावकदानया साधिक्येन तत्समूहस्वेन प्रेषणानौचित्यम् २३ ब्रूहीति ये च तत्र गर्भालिके २१
ऽपरदानवास्ताश्च ब्रूहीत्यन्वयः युद्धाय युद्धं कर्तुम् २४ वचनमाह त्रैलोक्यमिति स्पष्टम् २५
रामः ॥

वृतेति अपलेपो गर्वः मक्षिका ग्रामयाः सद्गनिनृदंष्ट्राः प्रादुर्भूताः पिशितं मांसम् २६ यत इति दूत्यमेव दौत्यं प्रजापाद्युणं शिवदूतीगौरा
दिव्यात्मकीश प्रख्यातगर्वएव पदादितिवा २७ तेपीति अमर्षेण सर्वतः पूरिताः यतः यं देशमाक्रम्य कात्यायनी स्थिता तं देशं जग्मुरित्यन्वयः श्
लशक्त्यृष्टिस्त्राण्यपि कात्यायनीवोक्तिः २८ तत इति प्रथममादौ अग्रे सन्मुखे ववर्षुरिति शुण्यदुत्कटदसः उद्धताः प्रकटाः प्रकटेन स्त्रीश
ब्दमतो हन्तुमयोग्यमिति विवेकराहित्येनेत्याशयः विहिंसितुमित्यर्थः २९ ३० तस्येति तस्याग्रत इति छेदः छादसः संधिः तस्या च एवैव तद

बद्धावलेपादस्थचेद्रूवंतो युद्धकोविदाः तदा गच्छत तल्यं तु मक्षिकाः पिशितेन वः २६ यतो नियुक्तो दौत्येन तया देव्या शि-
वः स्वयम् शिवदूतीति लोकेस्मिंस्ततः सा ख्यातिमागता २७ तेपि श्रुत्वा वचो देव्याः शर्वाख्यातं महासुराः अमर्षापूरिता जग्मु-
र्यतः कात्यायनी स्थिता २८ ततः प्रथममेवाग्रे शरशक्त्यृष्टिवृष्टिभिः ववर्षुरुद्धतामर्षास्तां देवीममरारयः २९ सा च तान्प्र-
हितान्बाणान्शूलचक्रपरश्वधान् चिच्छेद लीलयाध्मातधनुर्मुक्तैर्महेषुभिः ३० तस्याग्रतस्तथा काली शूलपातविदारितान्
खट्वाङ्गपोथितांश्चारीन्कुर्वती व्यचरत्तदा ३१ कमण्डलुजलाक्षेपहतवीर्यान्हतौजसः ब्रह्माणी चाकरोच्छत्रून्येन येन
स्म धावति ३२ माहेश्वरी त्रिशूलेन तथा चक्रेण वैष्णवी दैत्याञ्जघान कौमारी तथा शक्त्यातिकोपना ३३ ऐन्द्रीकुलिशपा-
तेन शतशो दैत्यदानवाः पेतुर्विदारिताः पृथ्व्यां रुधिरौघप्रवर्षिणः ३४ तुण्डप्रहारविध्वस्ता दंष्ट्राग्रक्षतवक्षसः वाराहमूर्त्या
न्यपतंश्चक्रेण च विदारिताः ३५ नखैर्विदारितांश्चान्यान्भक्षयन्ती महासुरान् नारसिंही चचाराजौ नादापूर्णदिगम्बरा ३६
चण्डाट्टहासैरसुराः शिवदूत्यभिदूषिताः पेतुः पृथिव्यां पतितांस्तांश्चखादाथ सा तदा ३७ इति मातृगणं क्रुद्धं मर्दयन्तं म-
हासुरान् दृष्ट्वाभ्युपायैर्विविधैर्नेशुर्देवारिसैनिकाः ३८ दैवीकृते

दैत्याश्च सत्वके दैत्वहांगं खट्वाङ्गं कीलीललाटजाऽवर्तती अशुद्धा
त्वाभावात् ३१ कमण्डल्विति आक्षेपः क्षेपः वीर्यं बलं ओजस्तेजः धावतीति सयोरोभूतेलट् ३२ माहेश्वरीति स्पष्टम् ३३ ऐन्द्री
ति दैत्यदानवयोर्मातृतो भेदः ऐन्द्र्याः कुलिशपातेनेत्यर्थः ३४ तुण्डेति वाराहीवासो मूर्तिश्च वाराहमूर्तिस्तया चक्रेणान्येनेत्याह्या
सुवेमव वाराहसहस्रेननलव्यादितिसिद्धते एवं शक्तिमतो वराहस्यापि बोधम् ३५ नखैरिति आजौ रणे अम्बरमाकाशम् चण्डेति चण्ड उत्क
टः सकोपो वा शिवदूत्यभिदूषिताः इतिसंधिरार्षः अभिदूषिताः प्राप्तिमर्दाः सा शिवदूती ३७ इतीति इति पूर्वोक्तैः अभ्युपायैः सं
ग्रामसाधनैर्दैत्यान्मर्दयन्तं मातृगणं दृष्ट्वा नेशुः पलायिता इत्यन्वयः मातृगणो ब्राह्म्याद्या अष्टमातरः यथा ब्राह्मी माहेश्वरी चैव कौ
मारी वैष्णवी तथा वाराही नारसिंही चैन्द्री चामुण्डा मातरः स्मृता इति अमरतेजनवार्णविधाने ३८ नमायनमः ॥

पलायनेति रक्तं बीजं कारणं यस्य स रक्तबीजः ३९ तदेवाह रक्तेति अस्य रक्तबीजस्य ४० स रक्तबीजः ४१ कुलिशेनेति तस्य रक्तबीजस्य
४२ यावन्त इति वीर्यं प्रभावः बलं शरीरं विक्रमः पराक्रमस्तत्समास्तद्रूपाः ४३ ते इति समं सह अत्युग्रशस्त्रपातेति शस्त्रविशेषणं तत्समस्तम् ४४ पुनः
श्चेति ववाहेति वहति स्म तस्माद्विनिसृतरक्तम् ४५ वैष्णवीति ऐन्द्र्याः शक्तेरिति तत्पराहतोऽसुरेश्वरस्तस्य प्राबल्यं एवं वैष्णवी चक्रेणाभिजघान गदया च
ताडयामासेत्यन्वयः ४६ ४७ शक्त्येति ४८ स चापीति अहनत् हिनस्ति स्म दितेरपत्यं दैत्यः महांश्चासौ असुरश्च महासुरः इति।

पलायनपरान्दृष्ट्वा दैत्यान्मातृगणार्दितान् योद्धुमभ्याययौ क्रुद्धो रक्तबीजो महासुरः ३९ रक्तबिन्दुर्यदा भूमौ पतत्यस्य शरीर-
तः समुत्पतति मेदिन्यां तत्प्रमाणस्तदासुरः ४० युयुधे स गदापाणिरिन्द्रशक्त्या महासुरः ततश्चैन्द्री स्ववज्रेण रक्तबीजमता-
डयत् ४१ कुलिशेनाहतस्याशु बहु सुस्राव शोणितम् समुत्तस्थुस्ततो योधास्तद्रूपास्तत्पराक्रमाः ४२ यावन्तः पतिता-
स्तस्य शरीराद्रक्तबिन्दवः तावन्तः पुरुषा जातास्तद्वीर्यबलविक्रमाः ४३ ते चापि युयुधुस्तत्र पुरुषा रक्तसम्भवाः समं मा-
तृभिरत्युग्रशस्त्रपातातिभीषणम् ४४ पुनश्च वज्रपातेन क्षतमस्य शिरो यदा ववाह रक्तं पुरुषास्ततो जाताः सहस्रशः ४५
वैष्णवी समरे चैनं चक्रेणाभिजघान ह गदया ताडयामास ऐन्द्री तमसुरेश्वरम् ४६ वैष्णवीचक्रभिन्नस्य रुधिरस्रावसम्भवैः
सहस्रशो जगद्व्याप्तं तत्प्रमाणैर्महासुरैः ४७ शक्त्या जघान कौमारी वाराही च तथासिना माहेश्वरी त्रिशूलेन रक्तबीजं महासुर-
म् ४८ स चापि गदया दैत्यः सर्वा एवाहनत्पृथक् मातॄः कोपसमाविष्टो रक्तबीजो महासुरः ४९ तस्याहतस्य बहुधा शक्तिशूला-
दिभिर्भुवि पपात यो वै रक्तौघस्तेनासञ्छतशोऽसुराः ५० तैश्चासुरासृक्सम्भूतैरसुरैः सकलं जगत् व्याप्तमासीत्ततो देवा भयमा-
जग्मुरुत्तमम् ५१ तान्विषण्णान्सुरान्दृष्ट्वा चण्डिका प्राह सत्वरा उवाच कालीं चामुण्डे विस्तरं वदनं कुरु ५२ मच्छस्त्रपातसम्भू-
तान्रक्तबिन्दून्महासुरान् रक्तबिन्दोः प्रतीच्छ त्वं वक्त्रेणानेन वेगिना ५३ भक्षयन्ती चर रणे तदुत्पन्नान्महासुरान् एवमेष क्षयं
दैत्यः क्षीणरक्तो गमिष्यति ५४ भक्ष्यमाणास्त्वया चोग्रा न चोत्पत्स्यन्ति चापरे इत्युक्त्वा तां ततो देवी शूलेनाभिजघान तम् ५५ मुखे-
न काली जगृहे रक्तबीजस्य शोणितम् ततोऽसावाजघानाथ गदया तत्र चण्डिकाम् ५६ २ ७० रामीयो

पौनरुक्त्यम् ४९ ५० तैश्चेति उत्तमेति अतिशयं सकलं जगदित्यतिशयोक्तिः ५१ तानिति तान्विषण्णान्दृष्ट्वा त्वरासहिता चण्डिका सत्वरा
प्राह रूपमात्रविशीर्णं तत्तेति शेषः एवं सुराणां त्रासविस्तरं विस्तरवदनं कालिकां कालीमुवाचेत्यपौनरुक्त्यं ५२ मच्छेति अनेन विस्तीर्णे-
न वदनेन रक्तबिन्दोरिति जातावेकवचनम् ततो जातान्महासुरान्मच्छस्त्रपातसम्भूतान्रक्तबिन्दून्भूमिमप्राप्तानेव प्रतीच्छ गृहाण ५३ किंच यानि सम-
येव हते सञ्जातान्महासुरान्भक्षयन्ती रणे चर एवम्प्रकारेणैव दैत्यः क्षयं गमिष्यति ५४ भक्ष्यमाणास्त्विति उत्पत्स्यन्तीति त्वया भक्षितत्वात् ५५ मुखेनेति
शोणितानमभूतानमेव विस्तीर्णेनात्मवदनस्य ग्रसौ रक्तबीजः तत्र घृहे ५६

नस्य=

22

22

नचेति विदारणात्मकत्वादितिभावः ५७ यतस्ततइति सर्वतइत्यर्थः अतिविस्तीर्णत्वाद्वदनस्य उत्तरार्द्धमुत्तरान्वयि ५८ तांश्चेति उत्तरार्द्धमुत्तरान्वयि असिभिरितिक्रियापेक्षंबहुवचनम् ऋष्टिभिरित्यप्येवं ऋष्टिर्भयलोधाराभिः ५९ जघानेति शस्त्रसंघैःसमूहैः समाहतइतितृतीयातत्पुरुषः ६० नीरक्तश्चेति चामुण्डापीतत्वान्निःशेषरुधिरत्वात् नीरक्तश्चसन् महीपृष्ठेपपातेत्यन्वयः ६१ तेषामिति तेषांमातृगणांमध्येसृङ्मदोद्धतोजातः तस्मात्सगणोयंनृत्यपादिसहितोननर्तेत्यर्थः ६२ इतिश्रीशिवभट्टसुतसतीगर्भजनागोजी,

नचास्यावेदनांचक्रेगदापातोल्पिकामपि तस्याहतस्यदेहात्तुबहुसुस्रावशोणितम् ५७ यतस्ततस्तद्वक्त्रेणचामुण्डासंप्रतीच्छति मुखेसमुद्गतायेस्यारक्तपातान्महासुराः ५८ तांश्चखादाथचामुण्डापपौतस्यचशोणितम् देवीशूलेनवज्रेणबाणैरसिभिरृष्टिभिः ५९ जघानरक्तबीजंतंचामुण्डापीतशोणितम् सपपातमहीपृष्ठेशस्त्रसंघसमाहतः ६० नीरक्तश्चमहीपालरक्तबीजोमहासुरः ततस्तेहर्षमतुलमवापुस्त्रिदशानृप ६१ तेषांमातृगणोजातोननर्तासृङ्मदोद्धतः ६२ इतिमार्कण्डेयपुराणेसावर्णिकेमन्वन्तरेदेवीमाहात्म्येरक्तबीजवधः ८ राजोवाच विचित्रमिदमाख्यातंभगवन्भवता मम देव्याश्चरितमाहात्म्यंरक्तबीजवधाश्रितम् १ भूयश्चेच्छाम्यहंश्रोतुंरक्तबीजेनिपातिते चकारशुम्भोयत्कर्मनिशुम्भश्चातिकोपनः २ ऋषिरुवाच चकारकोपमतुलंरक्तबीजेनिपातिते शुम्भासुरोनिशुम्भश्चहतेष्वन्येषुचाहवे ३ हन्यमानंमहासैन्यंविलोक्यामर्षमुद्वहन् अभ्यधावन्निशुम्भोथमुख्ययासुरसेनया ४ तस्याग्रतस्तथापृष्ठेपार्श्वयोश्चमहासुराः संदष्टौष्ठपुटाःक्रुद्धाहन्तुंदेवीमुपाययुः ५ आजगाममहावीर्यःशुम्भोपिस्वबलैर्वृतः निहन्तुंचण्डिकांकोपात्कृत्वायुद्धंतुमातृभिः ६ ततोयुद्धमतीवासीद्देव्याशुम्भनिशुम्भयोः शरवर्षमतीवोग्रंमेघयोरिववर्षतोः ७ चिच्छेदास्ताञ्छरांस्ताभ्यांचण्डिकास्वशरोत्करैः ताडयामासचाङ्गेषुशस्त्रौघैरसुरेश्वरौ ८ निशुम्भोनिशितंखड्गंचर्मचादायसुप्रभम् अताडयन्मूर्ध्निसिंहंदेव्यावाहनमुत्तमम् ९ ताडितेवाहनेदेवीक्षुरप्रेणासिमुत्तमम् निशुम्भस्याशुचिच्छेदचर्मचाप्यष्टचन्द्रकम् १० ॥

कृतेसप्तशतीव्याख्यानेष्टमोध्यायः ८ राजोवाच विचित्रमिति राज्ञाहरथः चरितंकर्म माहात्म्यंप्रभावः समाहारद्वंद्व आश्रितंजनकं १२ ऋषिरुवाच चकारेति आवहोरणः ३ हन्यमानमिति उद्वहन् धारयन् ४ संदष्टौष्ठपुटाः दंताभ्यांमनःसंधृतोष्ठाः तथासतिपुटाकारताभवति ५ ६ ततइति देव्याइतिसहार्थेतृतीया ७ चिच्छेदेति ताभ्यामस्तान्विमुक्तानित्यन्वयः ८ ९ ताडितेइति क्षुर

दु॰ टी॰
ना॰
२३

छिन्नेइति शक्तिक्षेपो देव्यां प्रति अभिमुखागतां तां देवी चिच्छेद इत्यर्थः ११ कोपेति जग्राह ग्रहणपूर्वकं प्रक्षेपे च गृहीतः आयान्तं आगतम्
तच्छूलं १२ आविध्य भ्रामयित्वा देव्याः करस्थितत्रिशूलेन करणेन सापि गदा भिन्ना भस्मत्वमागता भस्मापि नाच अन्तर्भाविता इत्यर्थः १३ पुं
गवः श्रेष्ठः अत्र निशुम्भस्य मूर्च्छासम्पादनेन पातनं १४ तस्मिन्निति प्रययौ शुम्भ इति शेषः १५ स इति तथा ... प्रकारेणात्यु
च्चैर्गृहीतैरायुधैर्व्याप्य बभौ विराजितः इत्यर्थः १६ आयान्तं आगच्छन्तं १७ स्वनेनचेति घण्टास्वनेन ... समस्तवधः वधो नाशः विधायिनेति स्वन

छिन्ने चर्मणि खड्गे च शक्तिं चिक्षेप सोऽसुरः तामप्यस्य द्विधा चक्रे चक्रेणाभिमुखागताम् ११ कोपाध्मातो निशुम्भोऽथ शूलं जग्रा
ह दानवः आयान्तं मुष्टिपातेन देवी तच्चाप्यचूर्णयत् १२ आविध्याथ गदां सोऽपि चिक्षेप चण्डिकां प्रति सापि देव्या त्रिशूलेन भिन्ना
भस्मत्वमागता १३ ततः परशुहस्तं तमायान्तं दैत्यपुङ्गवम् आहत्य देवी बाणौघैरपातयत भूतले १४ तस्मिन्निपतिते भूमौ
निशुम्भे भीमविक्रमे भ्रातर्यतीव संक्रुद्धः प्रययौ हन्तुमम्बिकाम् १५ स रथस्थस्तथात्युच्चैर्गृहीतपरमायुधैः भुजैरष्टाभिरतु
लैर्व्याप्याशेषं बभौ नभः १६ तमायान्तं समालोक्य देवी शङ्खमवादयत् ज्याशब्दं चापि धनुषश्चकारातीव दुःसहम् १७ पू
रयामास ककुभो निजघण्टास्वनेन च समस्तदैत्यसैन्यानां तेजोवधविधायिना १८ ततः सिंहो महानादैस्त्याजितेभमहा
मदैः पूरयामास गगनं गां तथोपदिशो दश १९ ततः काली समुत्पत्य गगनं क्ष्मामताडयत् कराभ्यां तन्निनादेन प्राक्स्वना
स्ते तिरोहिताः २० अट्टाट्टहासमशिवं शिवदूती चकार ह तैः शब्दैरसुरास्त्रेसुः शुम्भः कोपं परं ययौ २१ दुरात्मंस्तिष्ठ तिष्ठेति व्या
जहाराम्बिका यदा तदा जयेत्यभिहितं देवैराकाशसंस्थितैः २२ शुम्भेनागत्य या शक्तिर्मुक्ता ज्वालातिभीषणा आयान्ती वह्निकूटा
भा सा निरस्ता महोल्कया २३ सिंहनादेन शुम्भस्य व्याप्तं लोकत्रयान्तरम् निर्घातनिःस्वनो घोरो जितवानवनीपते २४ शुम्भमु
क्ताञ्छरान्देवी शुम्भस्तत्प्रहिताञ्छरान् चिच्छेद स्वशरैरुग्रैः शतशोऽथ सहस्रशः २५ ततः सा चण्डिका क्रुद्धा शूलेनाभिजघान त
म् स तदाभिहतो भूमौ मूर्छितो निपपात ह २६ ततो निशुम्भः सम्प्राप्य चेतनामात्तकार्मुकः आजघान शरैर्देवीं कालीं केसरिणं तथा २७

विशेषणम् १८ उपदिशः सामान्यदिग्रूपेत्यर्थः परितः सर्वादीनां दशानां तदाह दशेति १९ समुत्पत्य उत्पत्य पुनरवतीर्य क्ष्मां २० अट्टाट्ट
हासं शब्दं घोरं द्वितीयरूपम् अशिवं विपक्षाणां भयदम् २१ आकाशसंस्थितैः देवीदानवसङ्ग्रामदर्शनाय तत्र स्थितैः २२ महोल्कयेति महा
ज्वालावृताकाशात्पतनशीलकम् यद्वा तन्नामशस्त्रविशेषकम् २३ सिंहेति उत्कटसिंहस्य तथापि व्याप्तिः निर्घातनिःस्वनः उत्पातध्वनिः जितवानिति
शुम्भसिंहनादमिति शेषः २४ शुम्भेति अनेन देवीशुम्भयोः समम्युद्धमुक्तं २५ ततइति अभितः समन्तात् २६ ततइति शुम्भमूर्छानन्तरं निशुम्भो द २३

प्रतरिति दनोः पुत्रोपि दितिजः समानशीलत्वादितिजः २८ ततइति दुर्गासंकटे आर्तैः पीडा यया नाशिनी छिनत्तीति विप्रत्ययः २९ ततइति दैत्य
सेनया समावृतः ३० ३१ शूलेति समायांतम् आगच्छन्तम् वेगाविद्धेन वेगाक्षिप्तेन ३२ ३३ स्वनवदिति प्रहस्य स्वनविशेषणम् ३४
ततइति उग्रमिति क्रियाविशेषणं कालीशिवदूतीचत्वारोत्र कर्तारः ३५ निराकृतास्ताः मंत्रपूतजलैः ३६ ३७ खंडखंडं खंडखंडप्रकारः
खंडस्य खंडशः क्रियायां तथा कृताः प्रकारे गुणवचनस्येति द्वित्वं खंडखंडं कृता इत्येव ३८ विनेशुर्नष्टाः नष्टाः पला

शुभ्रमुक्तवान्बाणान्प्रमुक्तं ततोसुरेश्वरः चक्रायुधेन दितिजश्छादयामास चंडिकाम् २८ ततो भगवती क्रुद्धा दुर्गा दुर्गार्तिनाशि
नी चिच्छेद तानि चक्राणि स्वशरैः सायकांश्च तान् २९ ततो निशुंभो वेगेन गदामादाय चंडिकाम् अभ्यधावत वै हंतुं दैत्यसेना स
मावृतः ३० तस्यापतत एवाशु गदां चिच्छेद चंडिका खड्गेन शितधारेण स च शूलं समाददे ३१ शूलहस्तं समायांतं निशुंभम
मरार्दनम् हृदि विव्याध शूलेन वेगाविद्धेन चंडिका ३२ भिन्नस्य तस्य शूलेन हृदयान्निःसृतोपरः महाबलो महावीर्यस्तिष्ठेति
पुरुषो वदन् ३३ तस्य निःक्रामतो देवी प्रहस्य स्वनवत्ततः शिरश्चिच्छेद खड्गेन ततोसावपतद्भुवि ३४ ततः सिंहश्चखादोग्रदं
ष्ट्राक्षुण्णशिरोधरान् असुरांस्तांस्तथा काली शिवदूती तथापरान् ३५ कौमारीशक्तिनिर्भिन्नाः केचिन्नेशुर्महासुराः ब्रह्मा
णीमंत्रपूतेन तोयेनान्ये निराकृताः ३६ माहेश्वरीत्रिशूलेन भिन्नाः पेतुस्तथापरे वाराहीतुंडघातेन केचिच्चूर्णीकृता भु
वि ३७ खंडंखंडं च चक्रेण वैष्णव्या दानवाः कृताः वज्रेण चैन्द्रीहस्ताग्रविमुक्तेन तथापरे ३८ केचिद्विनेशुरसुराः केचिन्न
ष्टा महाहवात् भक्षिताश्चापरे कालीशिवदूतीमृगाधिपैः ३९ इति मार्कंडेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये निशुं
भवधः ९ ॥ ॥ ऋषिरुवाच निशुंभं निहतं दृष्ट्वा भ्रातरं प्राणसंमितम् हन्यमानं बलं चैव शुंभः क्रुद्धोब्रवीद्वचः १
बलावलेपाद्दुष्टे त्वं मा दुर्गे गर्वमावह अन्यासां बलमाश्रित्य युद्ध्यसे यातिमानिनी २ देव्युवाच एकैवाहं जगत्यत्र द्वितीया का ममा
परा पश्यैता दुष्ट मय्येव विशंत्यो मद्विभूतयः ३ ततः समस्तास्ता देव्यो ब्रह्माणीप्रमुखा लयम् तस्या देव्यास्तनौ जग्मुरेकैवासीत्तदाम्बि कि

यिताः ३९ इति सप्तशतीव्याख्याने नवमोध्यायः ९ ऋषिरुवाच निशुंभमिति अब्रवीदित्यस्य देवीमिति शेषः १ बलेति बलगर्वेण दुर्वि
नीते दुर्गे गर्वं मावह यात्यंतमतिमानिनी सती अन्यासां बलमाश्रित्य युद्ध्यसे इत्यन्वयः २ देव्युवाच एकैवेति एकाखंडगगनभेदहीना परमात्मरूपा
त्वात् अपरा समसहायभूता द्वितीया कास्ति न कापीत्यर्थः अत्रभूयमानस्त्वभेदो न वास्तव इत्याह पश्यैतेति वाक्यार्थस्य कर्मत्वं मद्विभूतय इ
त्यनेन भेदं निरस्यति ३ ततइति ततो शरीरे लयं प्राप्य अभाव अनेन ब्रह्मादिरूपप्राविर्भूतानां संघप्रपंचलयदर्शनेन समस्तोपादानत्वमस्याप्येवे

देव्युवाच अहमिति अहं विभूत्या स्वैश्वर्येण बहुभी रूपैर्यदहं बहुमास्थिता तदहं तं मया संहृतं तस्मादहमेकैव तिष्ठामि त्वमपि रणे स्थिरो भवेत्यर्थः
प्रत्येनापि तद्देवहूतीकृतम् ५ ऋषिरुवाच तत इति पश्यतामित्यत्राद्देवेषी ६ श्यः सुदृढ ७ ८ हुंग्रं तत्र हुङ्कारोच्चारणं चन्द्रादिभिः
मंत्रोच्चारणैः ९ ततस्सा तत्कुपिता धनुः इषुभिः सह १० छिन्न इति तथा तेन प्रकारेण छिन्ने धनुषीत्यन्वयः ११ तत इति शक्तिखड्ग
मतरमित्यर्थः भानुमदिति किरणयुक्तमित्यर्थकम् स्वकृत्यशामवंद्रस्य चर्मणस्य विशेषणं तदा युद्धकाले दैत्यानामधिपेश्वर इति नामकः १२

देव्युवाच एकैवाहं जगत्यत्र द्वितीया का ममापरा पश्यैता दुष्ट मय्येव विशन्त्यो मद्विभूतयः ३ ततः समस्तास्ता देव्यो ब्रह्माणी
प्रमुखा लयम् तस्या देव्यास्तनौ जग्मुरेकैवासीत्तदाम्बिका ४ देव्युवाच अहं विभूत्या बहुभिरिह रूपैर्यदास्थिता तत्संहृतं मया
एकैव तिष्ठाम्याजौ स्थिरो भव ५ ऋषिरुवाच ततः प्रववृते युद्धं देव्याः शुम्भस्य चोभयोः पश्यतां सर्वदेवानामसुराणां च दारुणं
६ शरवर्षैः शितैः शस्त्रैस्तथास्त्रैश्चैव दारुणैः तयोर्युद्धमभूद्भूयः सर्वलोकभयङ्करम् ७ दिव्यान्यस्त्राणि शतशो मुमुचे यान्यथा
म्बिका बभञ्ज तानि दैत्येन्द्रस्तत्प्रतीघातकर्तृभिः ८ मुक्तानि तेन चास्त्राणि दिव्यानि परमेश्वरी बभञ्ज लीलयैवोग्रहुङ्कारो
च्चारणादिभिः ९ ततः शरशतैर्देवीमाच्छादयत सोऽसुरः सापि तत्कुपिता देवी धनुश्चिच्छेद चेषुभिः १० छिन्ने धनुषि दैत्ये
न्द्रस्तथा शक्तिमथाददे चिच्छेद देवी चक्रेण तामप्यस्य करे स्थिताम् ११ ततः खड्गमुपादाय शतचन्द्रं च भानुमत् अभ्यधावत
दा देवी दैत्यानामधिपेश्वरः १२ तस्यापतत एवाशु खड्गं चिच्छेद चण्डिका धनुर्मुक्तैः शितैर्बाणैश्चर्म चार्ककरामलम् १३ हताश्वः
स तदा दैत्यश्छिन्नधन्वा विसारथिः जग्राह मुद्गरं घोरमम्बिकानिधनोद्यतः १४ चिच्छेदापततस्तस्य मुद्गरं निशितैः शरैः त
थापि सोऽभ्यधावत्तां मुष्टिमुद्यम्य वेगवान् १५ स मुष्टिं पातयामास हृदये दैत्यपुङ्गवः देव्यास्तं चापि सा देवी तलेनोरस्यताडयत्
१६ तलप्रहाराभिहतो निपपात महीतले स दैत्यराजः सहसा पुनरेव तथोत्थितः १७ उत्पत्य च प्रगृह्योच्चैर्देवीं गगनमास्थितः
तत्रापि सा निराधारा युयुधे तेन चण्डिका १८ नियुद्धं खे तदा दैत्यश्चण्डिका च परस्परम् चक्रतुः प्रथमं सिद्धमुनिविस्मयकारकं १९
ततो नियुद्धं सुचिरं कृत्वा तेनाम्बिका सह उत्पात्य भ्रामयामास चिक्षेप धरणीतले २० स क्षिप्तो धरणीं प्राप्य मुष्टिमुद्यम्य वेगितः अभ्य

त्वात्समासः २१ चर्मेति चेतनाश्वसारथयः सञ्जुयः १४ तदा इति हताश्व इति १४ स्वमुष्टिमिति देव्या हृदये इत्यन्वयः ततोऽपहस्तेनाथ तलि
कचपेटः १५ १६ सहसा तत्क्षणम् १७ उत्पत्येति भूमेः सकाशादूर्ध्वं गत्वा प्रगृह्य गगनमित्यन्वयः आस्थितः आस्थितवान् निराधारा स्वप्रयु
क्तेनाधाराभावेन हीना तेन शुम्भेन १८ नियुद्धं बाहुयुद्धं तदा हि प्रथमं नित्ययुद्धं सिद्धा देवयोनिविशेषाः मुनयो ऋषयः १९
उत्पात्य ऊर्ध्वं परिहत्य आपतनसमये चरणौ गृहीत्वा भ्रामयामास धरणीतले चिक्षेपेत्यर्थः २० वेगितः वेगवान् २१ ॥

२२ विहतः कृतव्रणः तालयन्निति हस्ताभाव आर्षः २३ प्रसन्नं प्रकाशवत् स्वास्थ्यं ग्लानिविलत्वम् २४ उत्पातेति उत्पातसूचका मेघाः उ
त्पाताः शुभाशुभं देवशुभं च उल्कादिग्निजेजः प्राक् शुम्भवधात् तथासन् इत्यस्य सरितो मार्गवाहिन्यः न प्रवन्ति तुद्ध्य गामिन्यः प्रासन् तत्र शुम्भे २५
२६ पुण्याः पवित्राः २७ जज्वलुरिति अयुग्मं प्राग्ज्वलनीयाद्यः शान्ताः सौम्याः सन्तो जज्वलुः शान्ता दिग्जनिताः स्वनाः उत्पातसूचकाः
सूत्कारादिशब्दा येषां ते २९ अस्यास्तात्पर्यमलो हरस्वमधु स्तानु वालो च शुम्भ इलनतथा शूले बद्धं तथा शंखं विहृतो वेला गलतथा धनुरेना
निरिस्मानिहसैदेवी विभतिस्मा स्वेनपर्वतेन मेकाशाम्ब तव विशेषिता नानारत्नसमाकीर्णा वेदविद्याविनोदिनी आयाहेनवरात्रेतस् प्रिने

तमायांतं ततो देवी सर्वदैत्यजनेश्वरम् जगत्यां पातयामास भित्वा शूलेन वक्षसि २२ स गतासुः पपातोर्व्यां देवीशूलाग्रवि
क्षतः चालयन्सकलां पृथ्वीं साब्धिद्वीपां सपर्वताम् २३ ततः प्रसन्नमखिलं हते तस्मिन्दुरात्मनि जगत्स्वास्थ्यमतीवाप निर्म
लं चाभवन्नभः २४ उत्पातमेघाः सोल्का ये प्रागासंस्ते शमं ययुः सरितो मार्गवाहिन्यस्तथासंस्तत्र पातिते २५ ततो देवगणा
सर्वे हर्षनिर्भरमानसाः बभूवुर्निहते तस्मिन् गंधर्वा ललितं जगुः २६ अवादयंस्तथैवान्ये ननृतुश्चाप्सरोगणाः ववुः पु
ण्यास्तथा वाताः सुप्रभोभूद्दिवाकरः जज्वलुश्चाग्नयः शांताः शांता दिग्जनितस्वनाः २८ इति मार्कंडेयपुराणे सावर्णि
के मन्वंतरे देवीमाहात्म्ये शुंभवधः १० ऋषिरुवाच देव्या हते तत्र महासुरेंद्रे सेन्द्राः सुरा वह्निपुरोगमास्तां कात्यायनीं तुष्टु
वुरिष्टलाभाद्विकाशिवक्त्राब्जविकाशिताशाः १ देवि प्रपन्नार्तिहरे प्रसीद प्रसीद मातर्जगतोखिलस्य प्रसीद विश्वेश्वरि पाहि विश्वं
त्वमीश्वरी देवि चराचरस्य २ आधारभूता जगतस्त्वमेका महीस्वरूपेण यतः स्थितासि अपां स्वरूपस्थितया त्वयैतदाप्यायते कृत्
स्नमलंघ्यवीर्ये ३ त्वं वैष्णवी शक्तिरनंतवीर्या विश्वस्य बीजं परमासि माया संमोहितं देवि समस्तमेतत्त्वं वै प्रसन्ना भुवि मुक्तिहेतुः ४

न्याशुंभमिति वर्द्धितेति इति श्रीशिवभट्टसुतसतीगर्भजनागोजीभट्टकृते सप्तशतीव्याख्याने दशमोध्यायः १० ॥ ऋषिरुवाच देव्ये
वह्नि ति तत्र युद्धे वह्निपुरोगमाः सुराः कात्यायनीमित्यनेन परस्परं मासामेकां सूचयति इष्टस्य शुंभादिवधस्य लाभात्प्राप्तेः कृपया मुखाग्रः विका
सीनि विकस्वराणि वक्त्राण्येव अब्जानि तत्प्रकाशेन विकासिता प्रकाशिता आशा याभिः १ देवीति प्रपन्ना भक्ताः आर्तिहरे प्रसीदेति निश्चितिः वरा
चरस्य निर्माणादीनमीश्वरी स्वतंत्रा इतरत्सर्वं परतंत्रमिति भावः २ आधारभूतेति तत्र हेतुः महीरूपेण स्थितिः अपां स्वरूपस्थितया प्रवर्धितं
स्वरूपेण स्थितया गमकत्वात्समासः आप्यायते प्याय्यते तृप्तः कर्मणि लकारयत्को ग्रन्थेनोपलक्षणेन सर्वा त्वदधिवर्धितम् ३ त्वमिति आद्यपादेन
लक्षणाक्रिमंत द्वितीयेकारणताशक्तिमंत मायाविद्या तयेनंसंमोहितंसमस्तं संसारगर्तपातितं तत्किं मोहो नास्त्येव मतआह त्वं प्रसन्नाकृतप्रसादा

दु.टी.
ना
२५

विद्या इति अंगानि वेदाश्चत्वारो मीमांसान्यायविस्तरम् पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश आयुर्वेदो धनुर्वेदो गांधर्वोर्थशास्त्रैः सहाष्टादश
भेदा अंशाः सकलाश्चतुःषष्टिकलोपेताः पातिव्रत्यसौंदर्यतारुण्याद्युपेताः समस्ताः स्त्रियोपि त्वदंशाः स्त्रिय इत्युपलक्षणमित्याह त्वयैकयेत्यम
पूरितमेतद्विश्वव्याप्तम् एवं च त्वत्तः पृथग्भूतस्याभावात् स्तोतृस्तुतिविषयेषु परापरवागोलीभूताच्च योक्तिः स्तुरूपा स्तुतिः का ते इत्यर्थः
यद्वा उक्तिरूपा त्वमेवातः का ते स्तुतिः ५ पुनरपि स्तुतेरघटनामाह सर्वेति सर्वभूता विश्वात्मिका देवी यदा त्वं स्तुता स्वर्गमुक्त्योः प्रकर्षेण दा
त्रीति यदा त्वं स्तुता तदा त्वत्स्तुतये परमा उत्कृष्टा उक्तयः का वा भवन्तु न का अपीत्यर्थः ६ तथा भूतपद्धतिमाह सर्वस्येति बुद्धिर्निश्चयात्मकं
ज्ञानं तद्रूपेण च स्वर्गापवर्गदत्वे नारायणस्य विष्णोः शक्तिर्नारायणी यद्वा नारस्य जीवसमूहस्यायनी स्थानभूता तद्रूपा तत्संबोधने तव ७

विद्याः समस्तास्तव देवि भेदाः स्त्रियः समस्ताः सकला जगत्सु त्वयैकया पूरितमंबयैतत् का ते स्तुतिः स्तव्यपरापरोक्तिः ५
सर्वभूता यदा देवी स्वर्गमुक्तिप्रदायिनी त्वं स्तुता स्तुतये का वा भवन्तु परमोक्तयः ६ सर्वस्य बुद्धिरू
पेण जनस्य हृदि संस्थिते स्वर्गापवर्गदे देवि नारायणि नमोस्तु ते ७ कलाकाष्ठादिरूपेण परिणामप्रदायि
नि विश्वस्योपरतौ शक्ते नारायणि नमोस्तु ते ८ सर्वमंगलमंगल्ये शिवे सर्वार्थसाधिके शरण्ये त्र्यंबके गौरि
नारायणि नमोस्तु ते ९ सृष्टिस्थितिविनाशानां शक्तिभूते सनातने गुणाश्रये गुणमये नारायणि नमोस्तु ते १०

कलेति कला त्रिंशत्काष्ठा अष्टादश निमेषाः काष्ठा आदिना क्षणमुहूर्तादयः परिणामो जन्मवृद्ध्यादीनामवस्थाविशेषः तेन कालरूपत्वं मदे
वत्युक्तमाह विश्वस्योपरतौ नाशे शक्ते नाशशक्तिमति इत्यर्थः कालस्यैव जगद्ध्वंसकत्वात् ८ सर्वमंगलेति मंगलानां मंगलरूपे शिवे क
ल्याणकर्त्रि शरण्ये शरणार्हे त्र्यंबके त्रिनेत्रे गौरि गौरवर्णे अनेन शिवोक्तं स्वाधिष्ठितम् यदुक्तं देवीपुराणे सर्वाणि हृदयस्थानि मंगलानि ब
शुभानि च ददाति चेप्सितान् लोके तेन सा सर्वमंगला अमंगलानामाधिहारिणी मंगल्या तेन सा स्मृता २ शिवा मुक्तिः समाख्याता तन्मयत्वाच्छिवा
स्मृता ३ धर्मादींश्चिंतितान् यस्मात्सर्वलोकस्य यच्छति अनेन देवी समाख्याता लोके सर्वार्थसाधिका ४ विपद्भिर्भयघोरेभ्यः शरण्या सा शर
णाद्यतः शरण्या तेन सा देवी श्रुतिभिः परिकीर्तिता ५ सोमसूर्यानलास्त्रित्वाच्च त्र्यंबका सा स्मृता बुधैः योगाग्निदग्धदेहायाः पुनर्जाता हि
मालये शीतेंदुकुंदधवला तेन गौरीति सा स्मृता ७ नरायनान्नराणां च समुद्धरायनापि वा नारायणी समाख्याता नरनारीप्रवर्तिका व
सा हर्षा सर्वेषु भूतेषु नान्दिनायन्तः इत्या त्वयेदं सर्वं जगत्स्थावरजंगमम् इति अस्य श्लोकस्य समाप्ति पाठो महाफलद इति कालिकापुरा
णे ९ सृष्टीति आद्यार्थेन ब्रह्मादीनां सृष्ट्यादिशक्तिस्त्वमेवेत्युक्तं सनातने नित्ये गुणानां सत्त्वादीनामाश्रयभूते अगुणमये अविद्यमानगु

शरणेति दीनाः सर्वेष्विष्टदुःखभाजः आर्ताः तस्करादिपीडिताः परायणे तत्परे तदुपपादकमार्तिहरे इति यतप्रार्थितः पीडयार्त्तेरर्थः ११ हं-
सेति हंसयुक्तविमानस्थिते ब्रह्माणीरूपधारिके कुशजलं तस्याघकोशः कमण्डलुः तदंभसः क्षरिके सेचिके १२ त्रिशूलेति माहेश्वरीस्वरूपेणे-
ति पूर्वोक्तेनान्वयि १३ मयूरेति मयूरकुक्कुटवृते वेष्टिते अनघे कुक्कुटः कलुषमपिकृत्रेचरणायुधइति मेदिनी मयूरपिच्छध्वजवतीत्यर्थः ध-
नेनपिच्छविवस्तारणा तु कुक्कुटेन समानुतेति हरिवंशोक्तेः पुनर्देव्यहदिति कुमारशक्ते रिवरूपं संस्थानमवयवसन्निवेशोयस्याः १४ शंखेति
शंखादीनि गृहीतानि परमायुधानि यया १५ नृसिंहेति त्रैलोक्यत्राणेनसम्यक्सहितेन समोमस्स हिते लोपः १६ १७ महावज्रइति महद्वज्रंयस्याः

शरणागतदीनार्तपरित्राणपरायणे सर्वस्यार्तिहरे देवि नारायणि नमोस्तु ते ११ हंसयुक्तविमानस्थे ब्रह्माणीरूपधारिणि कौशां-
भःक्षरिके देवि नारायणि नमोस्तु ते १२ त्रिशूलचन्द्राहिधरे महावृषभवाहिनि माहेश्वरीस्वरूपेण नारायणि नमोस्तु ते १३ मयूर
कुक्कुटवृते महाशक्तिधरेनघे कौमारीरूपसंस्थाने नारायणि नमोस्तु ते १४ शंखचक्रगदाशार्ङ्गगृहीतपरमायुधे प्रसीद वैष्णवी-
रूपे नारायणि नमोस्तु ते १५ गृहीतोग्रमहाचक्रे दंष्ट्रोद्धृतवसुंधरे वराहरूपिणि शिवे नारायणि नमोस्तु ते १६ नृसिंहरूपेणो-
ग्रेण हन्तुं दैत्यान्कृतोद्यमे त्रैलोक्यत्राणसहिते नारायणि नमोस्तु ते १७ किरीटिनि महावज्रे सहस्रनयनोज्वले वृत्रप्राणहरे चैन्द्रि
नारायणि नमोस्तु ते १८ शिवदूतीस्वरूपेण हतदैत्यमहाबले घोररूपे महारावे नारायणि नमोस्तु ते १९ दंष्ट्राकरालवदने शिरो-
मालाविभूषणे चामुण्डे मुण्डमथने नारायणि नमोस्तु ते २० लक्ष्मि लज्जे महाविद्ये श्रद्धे पुष्टि स्वधे ध्रुवे महारात्रि महाविद्ये नारा०
२१ मेधे सरस्वति वरे भूति बाभ्रवि तामसि नियते त्वं प्रसीदेशे नारायणि नमोस्तु ते २२ सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते भ-
येभ्यस्त्राहि नो देवि दुर्गे देवि नमोस्तु ते २३ एतत्ते वदनं सौम्यं लोचनत्रयभूषितम् पातु नः सर्वभूतेभ्यः कात्यायनि नमोस्तु ते २४ ज्वा-
लाकरालमत्युग्रमशेषासुरसूदनम् त्रिशूलं पातु नो भीतेर्भद्रकालि नमोस्तु ते २५ हिनस्ति दैत्यतेजांसि स्वनेनापूर्य या जगत् सा घं-

१८ शिवेति हतो दैत्यानां महाबलंययासा १९ २० देवत्वं महाविद्या उपनिषत् श्रद्धा आस्तिक्यबुद्धिः पुष्टिसहितस्वधे महती अविद्या सर्वाव-
रणसमर्था महामोहस्वरूपे २१ मेधइति मेधाधारणावतीबुद्धिः सरस्वतीवाग्देवता वरे श्रेष्ठे भूतिः सर्वतत्वप्रधाने बाभ्रवेरुत्कृष्टसोगुणाभावः प्र-
नेनसात्विकीत्व वभ्ररजोगुणलघुत्वके तामसि तमोगुणात्मके इदं सकलशास्त्राभिप्रायेण नियतिरदृष्टस्वरूपे ईशे समर्थे २२ सर्वेति दे-
वीमाहात्म्यप्रदिशक्तिः प्रसादेन चारोमाव २३ सर्वभूतेभ्यः सर्वभूतविकारेभ्यः प्राणिभ्यश्च कात्यायनि तदाख्यसंभवे २४ ज्वालेति नोऽस्मान्
भीतेर्भयात् २५ हिनस्तीति यः शीघ्रमात्रात्वाक्षतानि स्वनेनाः स्मान्पापेभ्यः पात्वित्यर्थः प्रनितपचाद्यच २६ ॥ रामायनमः

दु.टी. असुरेति चर्चितो लिप्तः करे हस्ते उज्ज्वलयति कुरैः किरणैः खड्गो वा २७ रोगानिति अभीष्टान् प्रियान् अपहंसि त्वं रुष्टा उच्यते विपत् इष्टवियो
मा. गलक्षणा यतस्त्वामाश्रिता आश्रयतामाश्रयतां प्रयान्ति २८ एतदिति कदनं नाशः धर्मद्विषोऽसुराः अद्य अधुना आत्ममूर्तिमेव अनेकरूपैः बहु
२६ धाम्बिके कालादिलक्षणैः अभेदेन लीला बहुधा बहुप्रकारां अन्या त्वदितरा का न कापीत्यर्थः २९ विद्यास्विति विद्यास्वन्नानेषु उपायभूतानि
यानि शास्त्राणि तेषु मन्वादिकृतेषु विवेकदीपेषु उपनिषत्सु आद्येषु वाक्येषु कर्मकाण्डपरेषु वेदवाक्येषु सत्स्वेव ममत्वगर्ते तदा अंधेमहा
धकारे संसारे एतद्विश्वं त्वदन्या का भ्रमीव विभ्रामयति न कापीत्यर्थः ३० रक्षांसीति नागाः सर्पाः अग्रयथेत्यत्र उच्यते दस्यवः चौराः दावो वा

असुरासृग्वसापंकचर्चितस्ते करोज्ज्वलः शुभाय खड्गो भवतु चंडिके त्वां नता वयम् २७ रोगानशेषानपहंसि तुष्टा रुष्टा तु का
मान्सकलानभीष्टान् त्वामाश्रितानां न विपन्नराणां त्वामाश्रिता ह्याश्रयतां प्रयान्ति २८ एतत्कृतं यत्कदनं त्वयाद्य धर्मद्विषां देवि म
न्या ३ हासुराणाम् रूपैरनेकैर्बहुधात्ममूर्तिं कृत्वाम्बिके तत्प्रकरोति का २९ विद्यासु शास्त्रेषु विवेकदीपेष्वाद्येषु वाक्येषु च का त्वदन्या म
मत्वगर्तेतिमहांधकारे विभ्रामयत्येतदतीव विश्वम् ३० रक्षांसि यत्रोग्रविषाश्च नागा यत्रारयो दस्युबलानि यत्र दावानलो यत्र
तथाब्धिमध्ये तत्र स्थिता त्वं परिपासि विश्वम् ३१ विश्वेश्वरि त्वं परिपासि विश्वं विश्वात्मिका धारयसीति विश्वम् विश्वेशवंद्या भ
वती भवंति विश्वाश्रया ये त्वयि भक्तिनम्राः ३२ देवि प्रसीद परिपालय नोरिभीतेर्नित्यं यथासुरवधादधुनैव सद्यः पापानि स
र्वजगतां प्रशमं नयाशु उत्पातपाकजनितांश्च महोपसर्गान् ३३ प्रणतानां प्रसीद त्वं देवि विश्वार्तिहारिणि त्रैलोक्यवासिनामीड्ये
लोकानां वरदा भव ३४ देव्युवाच वरदाहं सुरगणा वरं यन्मनसेच्छथ तं वृणुध्वं प्रयच्छामि जगतामुपकारकम् ३५ देवा ऊचुः स २८
र्वाबाधाप्रशमनं त्रैलोक्यस्याखिलेश्वरि एवमेव त्वया कार्यमस्मद्वैरिविनाशनम् ३६ देव्युवाच वैवस्वतेन्तरे प्राप्ते अष्टाविंशति
मे युगे शुम्भो निशुम्भश्चैवान्यावुत्पत्स्येते महासुरौ ३७

नेत तथाब्धिमध्ये यत्र वैर्यारयः तत्र त्वमेव व्यापकत्वात्स्थिता विश्वं परिपासीत्यर्थः
यः ३१ यतस्त्वं विश्वेश्वरी अतो विश्वं परिपासि यतस्त्वं विश्वात्मिका अतस्त्वं तत्सारयसि यतो भवती विश्वेशानां ब्रह्मादीनामपि वन्द्या अतः त्वयि
ये भक्तिनम्राः ते विश्वाश्रया भवंति ३२ देवीति हे देवि नोस्मान्सद्यः तत्क्षणमेव शत्रुभीतेः पालय यथाधुनैव असुरवधात् आवां नः पालि
तवत्य नित्यमित्यर्थः सर्वजगतां पापानि आशु शीघ्रं शमनं नय उत्पातानां पाकः फलदानकालस्तेन जनितान्महोपसर्गान्महोपद्रवान् शमन
य ३३ प्रणतानामिति ईड्ये स्तव्ये ३४ देव्युवाच वरदेति यं वरं यन्मनसीच्छथ तं वृणुध्वं प्रार्थयध्वं ३५ देवा ऊचुः सर्वाबाधेति सर्वबाधाना
माबाधेत्यर्थः इदं वैरिविनाशनं सर्वविशेषणं एवमेव शुम्भादिनाशवदेव ३६ देव्युवाच वैवस्वत इति अन्तरे मन्वन्तरे अष्टाविंश २६
तितमे अष्टाविंशतिसंख्याके द्वापरान्तमध्यादसः युगे चतुर्युगे तत्र कलिद्वापरसंधावनयोरुत्पत्तिः ३७ ॥ रामायनमः

नंदेति नंदगोपगृहे एषा मत्सत्वांशभूता नंदा भगवती नाम या भविष्यति नंदजा कनकोत्तमकांतिः सा सुकांतिकनकांबरा कमलांकुश
पाशाब्जैरलंकृतचतुर्भुजा इंदिरा कमला लक्ष्मीः सा श्रीः रुक्मांबुजासनेति रहस्योक्तेः अस्याः शैलशिखरे नवदुर्गा वेषाद्भावः ३८ पुनरपीति इयमपि
द्वापरे तेन वैवस्वत चतुर्युगे कलौ अंते तद्वधः वैप्रचित्तान् विप्रचित्तिवंश्यान् ३९ ४० तत इति एषा रक्तदंतिका कात्यांशभूता यद्वदंते तस्या पलदा
केशायुधमाधवी ... रक्तवस्त्रा रक्तचामुण्डा ... रक्ताधारक ...
चिन्मूर्धजा रक्तदंती ... रक्तदंष्ट्राति भीषणा ... विशाला ... लोक ... ब्रह्म

नंदगोपगृहे जाता यशोदागर्भसंभवा ततस्तौ नाशयिष्यामि विंध्याचलनिवासिनी ३८ पुनरप्यतिरौद्रेण रूपेण पृथिवीतले अ
वतीर्य हनिष्यामि वैप्रचित्तांस्तु दानवान् ३९ भक्षयंत्याश्च तानुग्रान्वैप्रचित्तान्महासुरान् रक्ता दंता भविष्यंति दाडिमीकुसुमोपमाः ४०
ततो मां देवताः स्वर्गे मर्त्यलोके च मानवाः स्तुवंतो व्याहरिष्यंति सततं रक्तदंतिकाम् ४१ भूयश्च शतवार्षिक्यामनावृष्ट्यामनंभसि मु
निभिः संस्तुता भूमौ संभविष्याम्ययोनिजा ४२ ततः शतेन नेत्राणां निरीक्षिष्यामि यन्मुनीन् कीर्तयिष्यंति मनुजाः शताक्षीमिति मां
ततः ४३ ततोऽहमखिलं लोकमात्मदेहसमुद्भवैः भरिष्यामि सुराः शाकैरावृष्टेः प्राणधारकैः ४४ शाकंभरीति विख्यातिं त
दा यास्याम्यहं भुवि तत्रैव च वधिष्यामि दुर्गमाख्यं महासुरं ४५ दुर्गादेवीति विख्यातं तन्मे नाम भविष्यति पुनश्चाहं यदा भीमं रूपं कृत्वा हिमा

कात्यायनीदेहात् भक्तमालिन्यतिष्ठति खड्गं च पानपात्रं च मुसलं लांगलं करैः बिभर्तीति यामलोक्तेः अत्र सर्वत्र रसितिनिर्देशः परस्परमपि
शाकीनाम भेदाभिप्रायेण ४१ भूयश्चेति अनंभसि कूपादिजलशून्यायामपि पृथ्व्यां अयोनिजा ... पार्वती देहात् आविर्भाव एवमेवमत्र
४२ यद्यस्मान्मुनीन्निरीक्षिष्यामि ततस्तस्मात् ४३ वैवस्वतमन्वंतरे एव चतुर्विंशतिमे युगे शताक्षीशाकंभर्यवतारः तस्मिन्नेवांतरे शाकंभर्यवतार
मेघगौर इति लक्ष्मीतंत्रोक्तेः तत्रैव दुर्गनामासुरवधः शाकंभरी नीलवर्णा ... शाकसंपन्न ... अत्र ध्यानं ... तत्रैव ...
नीलोत्पलदलाभा नीलोत्पलविलोचना गंभीरनाभिस्त्रिवलीविभूषिततनूदरी सुककर्कशा ... पीनपयोधरा चतुर्भुजा विशाला
मुष्टिं ... पुष्पपल्लवमूलादि फलशाकसमूहयान् ... शाकंभरीति एषा पार्वत्यंश एव शा
कंभरी शताक्षी सा दुर्गा सैव प्रकीर्तिता उमा गौरी सती चंडी कालिका सा च पार्वती शाकंभरी नीलवर्णेत्याद्युक्तेः दुर्गनामासुरः तत्रैव शाकंभर्यवतारे
व पंचमूलकरी ... फलकांडादि ... शाकं ... दुर्गमासुरवधः पुनश्चाहं ...
... यामले ४५ दु

दु. टी. ना. २७

भक्षयिष्यामीत्यत्र ५० दृष्टविशिष्टं ४७ भीमेति भीमरूपिणी नीलवर्णा चरदंष्ट्रादशनभास्वरा चंद्रहासं च डमरुं शिरः पात्रं च बिभ्रती एकवीरा कालरा
त्रिर्निद्रा तृष्णा दुरत्ययेत्यादिः इयं कालरात्र्येव यदा शाकंभरी च तृतीयैवैव ख्यातमन्वंतरे एव भीमावतार इति लक्ष्मीतंत्रे इयं चैव दुर्गाख्यिनाम्या प्रादु
र्भावो ऽरुणनाम्ना ४८ तदेति भ्रामरं रूपं भ्रमररूपमसंख्येयाः षट्पदा यस्मिन् रूपे तत् ४९ भ्रामरीति तेजोमण्डलदुर्धर्षा भ्रामरी चित्रकां
तिभूषा चित्रभ्रमरपाणिः सा महामारीति गीयते महामाया महाकाली महा ५० इत्थं तत्त्वे इत्यकेरिघमपि कालं शापव सर्वतः सर्वत्र चैवस्व
तंत्र एव बहितमवतु भीमो भ्रामर्यवतार इति लक्ष्मीतंत्रे इत्यमिताग्रकृन्नान्वयि ५० तदेति स्पष्टम् ५१ इति श्रीशिवभट्टसुतसतीगर्भजना
गोजीभट्टकृते सप्तशतीव्याख्याने एकादशोध्यायः ११ देव्युवाच एभिरिति मधुकैटभवधादिलक्षणैरिमैः सकलामेदिकीपारलौकि

रक्षांसि भक्षयिष्यामि मुनीनां त्राणकारणात् तदा मां मुनयः सर्वे स्तोष्यन्त्यानम्रमूर्तयः ४७ भीमादेवीति विख्यातं तन्मे नाम भवि
ष्यति यदारुणाख्यस्त्रैलोक्ये महाबाधां करिष्यति ४८ तदाहं भ्रामरं रूपं कृत्वासंख्येयषट्पदं त्रैलोक्यस्य हितार्थाय वधिष्यामि महा
सुरम् ४९ भ्रामरीति च मां लोकास्तदा स्तोष्यन्ति सर्वतः इत्थं यदा यदा बाधा दानवोत्था भविष्यति तदा तदावतीर्याहं करिष्या
म्यरिसंक्षयम् ५१ इति मार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये नारायणीस्तुतिः ११ देव्युवाच एभिः स्तवैश्च मां नित्यं
स्तोष्यते यः समाहितः तस्याहं सकलां बाधां शमयिष्याम्यसंशयम् १ मधुकैटभनाशं च महिषासुरघातनम् कीर्तयिष्यन्ति ये
तद्वद्वधं शुम्भनिशुम्भयोः २ अष्टम्यां च चतुर्दश्यां नवम्यां चैकचेतसः श्रोष्यन्ति चैव ये भक्त्या मम माहात्म्यमुत्तमम् ३ न तेषां दुष्कृतं कि
चिद्दुष्कृतोत्था न चापदः भविष्यति न दारिद्र्यं न चैवेष्टवियोजनम् ४ शत्रुतो न भयं तस्य दस्युतो वा न राजतः न शस्त्रानलतोयौघा
त्कदाचित्संभविष्यति ५ तस्मान्ममैतन्माहात्म्यं पठितव्यं समाहितैः श्रोतव्यं च सदा भक्त्या परं स्वस्त्ययनं हि तत् ६ उपसर्गानशे
षांस्तु महामारीसमुद्भवान् तथा त्रिविधमुत्पातं माहात्म्यं शमयेन्मम ७

कीच समाहितोनन्यमनाः १ तदेवाह मध्विति २
श्रोष्यंति च ध्यास्यंति अष्टम्यामित्यादि श्लोकत्रयमेककालकथनम् ३ नेति दुष्कृतं पापं दरिद्रशब्दात् ष्यञिति दारिद्र्यम् ४ शत्रुत इति
नृशास्त्रेति संग्रामभिन्नविषयम् ५ तस्मादिति सदा नित्यं हि यतः तन्माहात्म्यं स्वस्तिकल्याणम् तस्यायनं मार्गः ६ उपेति महा
म्यं कर्तृ महामारी भूमधूपशाम्भूता महाजनक्षयंकरी देवता ततः समुद्भवो येषां तान् उपसर्गानुपद्रवान् तथा त्रिविधं व्याधिरा
गद्देशादिरूपम् आध्यात्मिकम् भूतप्रेतादिजभयव्याघ्रादिजमाधिभौतिकम् दैवकृतवज्रपातदारिद्र्याद्याधिदैविकम् तदुपशांत्या २७
तमनिष्टम् दिव्यभौमांतरिक्षं चेति त्रिविधमुत्पातं च ॥ १ ॥ श्रीरामाय परमात्मने नमो नमः ॥

यत्रेति यत्रायतने गृहे मम वृत्तं चरित्रं तत्सम्यक् अर्थावधारणपूर्वकं अस्खलितवर्णादिना ८ बलीति बलिप्रदाने देवमोद्देशेन पश्वा
द्युपहारः पूजा गंधादिनार्चनम् अग्निकार्यं देवीदैवत्यो होमः महोत्सवः उत्सवः जन्मविवाहादि उच्चार्यमिति द्विजविषयं ९ फलमाह जान
तेति जानता विधिज्ञेन अजानता तद्रहितेन बलिसहितां पूजां तथा वेद्यावैद्यप्रकारेण मन्त्रादान्यादीरणादौ सति यथाकथंचिदपि कृता
मेतत्प्रतीच्छिष्यामि अंगीकरिष्यामीत्यर्थः चवर्गमध्यः पाठवर्णे वा कुलकोक्तेः प्रतीच्छधातुर्ग्रहणार्थः १० शरदिति शरत्काले आश्वि
नशुक्लप्रतिपदमारभ्य क्रियमाणा दुर्गोत्सवरूपा याच वार्षिकी वर्षशब्दो वर्षादौ लाक्षणिकः तेनैव शुक्लप्रतिपदमारभ्य क्रियमाणा चे

यत्रैतत्पठ्यते सम्यङ् नित्यमायतने मम सदा न तद्विमोक्ष्यामि सान्निध्यं तत्र मे स्थितम् ८ बलिप्रदाने पूजायामग्निकार्ये महोत्सवे
सर्वं ममैतच्चरितमुच्चार्यं श्राव्यमेव च ९ जानताजानता वापि बलिपूजां तथा कृताम् प्रतीच्छिष्याम्यहं प्रीत्या वह्निहोमं तथा कृ
तम् १० शरत्काले महापूजा क्रियते या च वार्षिकी तस्यां ममैतन्माहात्म्यं श्रुत्वा भक्तिसमन्वितः ११ सर्वबाधाविनिर्मुक्तो धन
धान्यसुतान्वितः मनुष्यो मत्प्रसादेन भविष्यति न संशयः १२ श्रुत्वा ममैतन्माहात्म्यं तथा चोत्पत्तयः शुभाः पराक्रमं च युद्धेषु
जायते निर्भयः पुमान् रिपवः संक्षयं यान्ति कल्याणं चोपपद्यते नंदते च कुलं पुंसां माहात्म्यं मम शृण्वताम् १४ शांतिकर्मणि सर्व
त्र तथा दुःस्वप्नदर्शने ग्रहपीडासु चोग्रासु माहात्म्यं शृणुयान्मम १५ उपसर्गाः शमं यान्ति ग्रहपीडाश्च दारुणाः दुःस्वप्नं च नृ
भिर्दृष्टं सुस्वप्नमुपजायते १६ बालग्रहाभिभूतानां बालानां शान्तिकारकम् संघातभेदे च नृणां मैत्रीकरणमुत्तमम् १७ दुर्वृ
त्तानामशेषाणां बलहानिकरं परम् रक्षोभूतपिशाचानां पठनादेव नाशनम् १८ सर्वं ममैतन्माहात्म्यं मम सन्निधिकारक
म् पशुपुष्पार्घधूपैश्च गंधदीपैस्तथोत्तमैः १९ विप्राणां भोजनैर्होमैः प्रोक्षणीयैरहर्निशम् अन्यैश्च विविधैर्भोगैः प्रदानैर्वत्स

त्यर्थः श्रुत्वेति पठनस्याप्युपलक्षणम् एवमन्यत्रापि ११ सर्वा बाधास्तु बाधा चेत्यर्थः १२ उत्पत्तयः प्रादुर्भावाः द्वितीयार्थे प्रथमा प
राक्रमं चेति एवमन्यत्र युद्धेष्वित्युपलक्षणम् १३ उपपद्यते प्राप्यते कुलं च नंदते वर्धते १४ शांतिकर्म उपसर्गादिनिवर्तकं कर्म तस्मिन् तस्या
नेऽत्यर्थः अन्यग्रहमोविषयार्थं १५ नदेव शृणोति उपसर्गा इति दुःस्वप्नस्वप्नदर्शनोत्तफलेन शुभसकावपि १६ बालग्रहाः पूतनाद्याः
संघातभेदे मैत्रीविग्रहे १७ दुर्वृत्तानां दुष्टानां मारणोच्चाटनादीनाम् १८ पशुः पाद्यादि श्लोकद्वयमेकान्वयि पशुबलिः अर्घोऽष्टांगः आ
पः क्षीरं कुशाग्राणि दध्यक्षततिलानि च यवाः सिद्धार्थकाश्चैव अष्टांगोऽर्घः प्रकीर्तितः १९ विप्राणामिति प्रोक्षणीयैः पंचामृताभिषेका
दिभिः अन्यैर्विविधा भोगाः स्रगादयः प्रदानैः मद्दर्शनविप्रभोजनादीयमानैर्वासोलंकारादिभिः एतैरहर्निशं क्रियमाणैर्या वत्सरेण प्रीतिर्भवति २०

दु. टी.
ना.
२८

सास्मिन्सुचरिते सकृच्छ्रुते इत्यर्थः श्रवणश्रवणतत्परस्यापि श्रवणेऽधिकफलत्वमिति कश्चित् श्रुतमित्याहृत्यान्वयि २१ ममजन्म
नां कीर्तनं श्रुतं सदिति शेषः युद्धेष्विति यान्वयि २२ तस्मिन्निति युष्माभिः स्तुतयो याश्च एतेन नारायणीस्तुतेः नमो देव्या इति च स्तुतौ कृतम्
तथा ब्रह्मणा ब्रह्मर्षिभिः मधु· याश्च युष्माभिः कृता महिषान्तकरी स्तुतिरपि इत्यर्थः यथा तत्तन्नोऽस्माकं वीर्याणामपि कुर्वन्ते तथा प्रागेव निरूपितम् कृ
तास्त्विति च दृष्टा इत्यर्थकम् लक्ष्मीनां एकवाक्यत्वादिप्रयोजनम् एवं चैतानि सर्वाणि लोकत्रयकृतकाम्यनादीनीति बोध्यम् २३ ब्रह्मणेति ब
चादेस्मादिरावितृप्तकरूपा शुभां मोक्षाभ्युदयसाधनीं प्रयच्छन्ति ददति अरण्ये इत्यादि श्लोकचतुष्टयमेकान्वयि प्रान्तरे दूरशून्यमार्गे अर
ण्ये इत्यस्य दावाग्नीत्यादिनान्वयः प्रान्तरे इत्यस्य दस्युभिरित्यादिनान्वयः केवले प्रान्तरे वा दस्युभिर्व्याहतो वा २४ दस्युभिरिति शून्ये निर्जने

प्रीतिर्मे क्रियते सास्मिन्सकृत्सुचरिते श्रुते श्रुतं हरति पापानि तथारोग्यं प्रयच्छति २१ रक्षां करोति भूतेभ्यो जन्मनां कीर्त्तनं म
म युद्धेषु चरितं यन्मे दुष्टदैत्यनिबर्हणम् २२ तस्मिञ्छ्रुते वैरिकृतं भयं पुंसां न जायते युष्माभिः स्तुतयो याश्च याश्च ब्रह्मर्षिभिः कृताः
२३ ब्रह्मणा च कृतास्तास्तु प्रयच्छन्ति शुभां मतिम् अरण्ये प्रान्तरे वापि दावाग्निपरिवारितः २४ दस्युभिर्वा वृतः शून्ये गृहीतो वापि
शत्रुभिः सिंहव्याघ्रानुयातो वा वने वा वनहस्तिभिः २५ राज्ञा क्रुद्धेन चाज्ञप्तो वध्यो बंधगतोपि वा आघूर्णितो वा वातेन स्थि
तः पोते महार्णवे २६ पतत्सु चापि शस्त्रेषु संग्रामे भृशदारुणे सर्वाबाधासु घोरासु वेदनाभ्यर्दितोपि वा २७ स्मरन्ममैतच्च
रितं नरो मुच्येत संकटात् मम प्रभावात्सिंहाद्या दस्यवो वैरिणस्तथा दूरादेव पलायन्ते स्मरतश्चरितं मम २८ ऋषिरुवाच इत्युक्त्वा
सा भगवती चण्डिका चण्डविक्रमा २९ पश्यतामेव देवानां तत्रैवान्तरधीयत तेपि देवा निरातङ्काः स्वाधिकारान्यथा पुरा ३० यज्ञ
भागभुजः सर्वे चक्रुर्विनिहतारयः दैत्याश्च देव्या निहते शुम्भे देवरिपौ युधि ३१ जगद्विध्वंसिनि तस्मिन्महोग्रेतुलविक्रमे नि
शुम्भे च महावीर्ये शेषाः पातालमाययुः ३२ एवं भगवती देवी सा नित्यापि पुनः पुनः संभूय कुरुते भूप जगतः परिपालनम् ३३

ने इत्यस्य तरान्वयि वनहस्तिभिरित्यस्य वृतो वेति शेषः २५ राज्ञेति क्रुद्धेन राज्ञा च वध्य इत्याज्ञप्त इत्यन्वयः सर्वबाधासमुच्चये महा
र्णवे पोते स्थितो वातेनाघूर्णितस्त्वाकुलितश्च २६ पतत्स्विति सर्वासु बाधासु महापीडासु वेदनया दुःखेनाभ्यर्दितश्च २७ स्मरन्निति
मुच्येतेति कर्मकर्त्तरि लङ् संकटम् दुःखम् उत्तरार्द्धमुत्तरान्वयि २८ दूरादेवेति मम चरितं स्मरतः मम प्रभावाद् दूरात्पलायन्त इत्यन्वयः उत्तरार्द्धम
ऋषिरुवाचेत्यादिः चण्डोग्रक्रमः २९ पश्यतामिति अन्तर्दधे निरातङ्का निर्भयाः ३० दैत्याः शेषदैत्याः ३१ आययुः प्राविशन्
३२ उपसंहरति एवमिति संभूय स्वस्वरूपशरीरा प्रादुर्भूय अन्तरधीयतेति कर्मकर्त्तरि लङ् ३३ ॥ विशालं शरणा २८

व्याप्तमिति महतो ब्रह्मादीन् विकल्पयति अधिकारे शस्त्रवर्मयति सा महाकाली तथा महाकाले प्रलये महामारी संहारक्रियातत्स्वरूपया
येतद्व्याप्तमित्यन्वयः ३५ सैवेति काले प्रलये महामारी संहारशक्तिः सृष्टिः सर्गशक्तिः अजा जन्मरहिता काले स्थितिकाले सनातनी नाश
हीना ३६ भवकाले संपत्समये वृद्धिप्रदेति लक्ष्मीविशेषणम् अभावे विपत्काले ३७ पुष्पैः धूपगंधदीपाद्यैः संपूजिता स्तुता ३८ इ
ति श्रीशिवभट्टसुतनागोजीभट्टकृते सप्तशतीव्याख्याने द्वादशोध्यायः १२ ऋषिरुवाच एतदिति एवमुक्तप्रकारेण धार्यते इति स
स्थितिलयपोषणपालनं देवीमाहात्म्यं संबोधनम् १ विद्यातत्त्वज्ञाने तथैवेति सप्रपञ्चये तयादेव्या त्वं सुरथः एष वैश्यः समाधिः ३ तथा ईदृशा
राज्यवि तथैवान्ये अन्ये चेत्यर्थः विवेकिन अधिगतलोकशास्त्रतत्त्वाः २ मोह्यन्त इति मोहो मिथ्याज्ञानं उपेहीति तद्वद्धि क्षांदमी ३ आराधितेति

व्याप्तं तयैतत्सकलं ब्रह्माण्डं मनुजेश्वर महाकाल्या महाकाले महामारीस्वरूपया ३५ सैव काले महामारी सैव सृष्टिर्भवत्यजा
स्थितिं करोति भूतानां सैव काले सनातनी ३६ भवकाले नृणां सैव लक्ष्मीर्वृद्धिप्रदा गृहे सैवाभावे तथालक्ष्मीर्विनाशायोपजा
यते ३७ स्तुता संपूजिता पुष्पैर्धूपगंधादिभिस्तथा ददाति वित्तं पुत्रांश्च मतिं धर्मे तथा शुभाम् ३८ इति मार्कण्डेयपुराणे सावर्णिके
मन्वंतरे देवीमाहात्म्ये फलस्तुतिः १२ ऋषिरुवाच एतत्ते कथितं भूप देवीमाहात्म्यमुत्तमम् एवंप्रभावा सा देवी ययेदं धार्यते
जगत् १ विद्या तथैव क्रियते भगवद्विष्णुमायया तया त्वमेष वैश्यश्च तथैवान्ये विवेकिनः २ मोह्यन्ते मोहिताश्चैव मोहमे
ष्यन्ति चापरे तामुपैहि महाराज शरणं परमेश्वरीम् ३ आराधिता सैव नृणां भोगस्वर्गापवर्गदा मार्कण्डेय उवाच इति तस्य वचः
श्रुत्वा सुरथः स नराधिपः ४ प्रणिपत्य महाभागं तमृषिं संशितव्रतम् निर्विण्णोतिममत्वेन राज्यापहरणेन च ५ जगाम सद्यस्त
पसे स च वैश्यो महामुने ६ संदर्शनार्थमंबाया नदीपुलिनसंस्थितः स च वैश्यस्तपस्तेपे देवीसूक्तं परं जपन् तौ तस्मिन्पुलिने
देव्याः कृत्वा मूर्तिं महीमयीम् ७ अर्हणां चक्रतुस्तस्याः पुष्पधूपाग्नितर्पणैः निराहारौ यताहारौ तन्मनस्कौ समाहितौ ८

सैवेत्यनेन सर्वत्र फलदात्री एषैवेति सूचितम् भोगः ऐहिकः मार्कण्डेय उवाच इतीति ४ प्रणिपत्येति संशितव्रतं तीव्रव्रतं निर्विण्णोऽतः खेदयुक्तः
ममत्वेनातीवताध्यवसायः ५ जगामेति सराजा वैश्यश्चेत्यर्थः एवमग्रेपि ६ देवीसूक्तं ऋग्वेदप्रसिद्धमहं विश्वेभिरित्यादीति केचित् सौरसूक्तमाथर्वण
प्रसिद्धमित्यपरे वस्तुतो देवीसूक्तं नमो देव्यै इत्यादिकं पंचमाध्यायस्थस्तुतिरूपं नच सर्वदेवताकृतस्याद्यामहालक्ष्म्याः स्तोत्रम् शुभादिवधार्थि
भिः सुरादिभिर्देवैर्कृतं सर्वक्लेशपरिहारस्वर्गादिफलकं तत्काम्यं तात्पर्यं तत्र अत्र पदस्फुरत्वात् हि सन्निहितत्वाच्च देवीसूक्तपदेन ग्रहीत
व्यमिति लक्ष्मीतंत्रमतस्वायंभुवमध्येइति प्रायेण निरूपितमित्यपरे आराध्यः संस्थिते वीजयोगवीजेकृतासने विकारविंदुनादाद्यप्रणवादिनमोन्तकम्
वंविकारसिद्धितंत्रेयदेवीसूक्तं परं स्मर्तमिति केचित्सूच्यते ७ अर्हणां पूजां अग्नितर्पणं होमः पुष्पधूपगंधदीपाद्यफलनैवेद्यतांबूलप्रदक्षिणानमस्कारा
दो ततो निराहारौ यताहारौ अनेन तत्र योगः सूचितः तन्मनस्कौ देवीमनस्कौ समाहितौ एकाग्रचित्तौ ८

राजैवेत्यनङ्गीकारे वैश्यस्यापि निजासृक्सिक्तबलिदानाङ्गीकारेऽपि = २

दु.टी.
ना.
२९

सुकृतप्रायश्चित्ता नोपपत्तिर्नातांत्र बलिकर्मनोऽस्म द्रालोचः

तौ बलिं च पशुकूष्माण्डादिरूपं ददतुः एवं समाराधयतोरित्यादिः राजैव निजरुधिरसिक्तं एतेन वैश्यस्य तत्त्वज्ञानैकतया सात्विकत्वेन कथं राजस
पूजायां प्रवृत्तिरित्यपास्तं राजसपूजाधिकारित्वेन तत्र स्वस्य सात्विकफलेऽबाधकाभावाच्च ब्राह्मणस्य सात्विकपूजया राजसफलवत् एवं च स्व
कारः स्पष्टार्थः यतात्मनोर्जितचित्तयोः ननु तयोर्वैश्यस्य वणिक्त्वेनावैदिकत्वशास्त्रकथितेऽतिबलिदाने कथमधिकारः तदुक्तं पा
ञ्चरात्रे पुराणे प्रत्यक्षवेदसिद्धार्थः सग्राह्यः सर्वचेतनैः प्रत्यक्षफलतरर्थे स्मृतिश्रुतिसमः स्मृतः स्मृतयश्च पुराणानि भारतप्रमुखान्यपि क्व
चित्कदाचिन्नशार्थे कृत्स्ने तु पुनीश्वरः अधिकारिविशेषेण नानाप्रवदत्यर्थमात्मिकं ब्राह्मणः क्षत्रियो वैश्यो वाऽनिःशंकतया परिमजेत् वर्णा वैश्यः
श्रमपरिभ्रष्टः प्रायश्चित्तेष्वनन्यकः वेदेतरागमस्तावा पापीनरहसमाचरेत् वेदवादेन नामस्ताव स्तोनरकगतातृप्ति स्वतसंहितायामपि
तथापि ये यो मार्गाणां वेदेन न विरुध्यते सोंऽशः प्रमाणमित्युक्तं केषांचिदधिकारिणाम् अत्यन्तमलिनानां तु प्राणिनां वेदमार्गतः सार्व
विभक्तिकस्तसिः वेदमार्गेणैवाप्यधः हीनानामिति शेषः पांचरात्रादयो मार्गाः कौलैश्चैवोपकारिका इति कौर्मेऽपि ब्राह्मणानां गौतम सर्वथा वेदमूले
मशापेन त्रयीवाह्यत्वे जाते तैः स्तुतो शिवकेशवौ विप्रपकृत्य चकार मोहशास्त्राणि केशवः सशिवस्तदा कापालं नाकुलं वामं भैरवं पूर्वप पि पुराणादौ क्वचि
श्चिमम् पांचरात्रं पाशुपतं तथान्यानि सहस्रशः क्वचित्क्वचित्पुराणादौ वेदमूलेऽपि सर्वथा सन्ति निर्मूलतन्त्राणि शास्त्राणि तान्यग्राह्याणि नैवदिकैरिति भो त्क्वचिन्निर्मूलतन्त्र शास्त्राणीत्यन्वयः

१२

ददतुस्तौ बलिं चैव निजगात्रासृगुक्षितम् एवं समाराधयतोस्त्रिभिर्वर्षैर्यतात्मनोः १२ ॥

इत्यादिवैदिकफलदर्शनेन तत्तन्त्रोक्तपारलौकिकफलेष्वपि विश्वस्य वसिष्ठादिकृपासित्वात्तारिकस्यर्थबोधेषु च विश्वस्य वैदिकमार्गत्याग
नकः जन्मोहजनकत्वात्तन्त्रशास्त्राणां निर्मूलत्वेन वेदामूलकत्वात् पद्मे पार्वतीश्वरसंवादे शृणु देवि प्रवक्ष्यामि तामसानि यथाक्रमम् तेषां श्रवणमा
त्रेण पातित्यं ज्ञानिनामपि प्रथमं हि मयैवोक्तं शैवं पाशुपतादिकम् मच्छक्त्यावेशितैर्विप्रैः संप्रोक्तानि ततः परम् कणादेन तु संप्रोक्तं शास्त्रं
वैशेषिकं महत् गौतमेन तथा न्यायं सांख्यं तु कपिलेन वै द्विजन्मना जैमिनिना पूर्ववेदप्रकाशकम् निरीश्वरेण वादेन कृतं शास्त्रं महत्तरम्
धिषणेन तथा प्रोक्तं चार्वाकमतिगर्हितम् दैत्यानां नाशनार्थाय विष्णुना बुद्धरूपिणा बौद्धशास्त्रमसत्प्रोक्तं मायावादमवैदिकम् मयैव क
थितं देवि जगतां नाशकारणात् इति न्यायवैशेषिकयोः स्वदुःखादिमत्त्वमात्मनः श्रुतिविरुद्धं निरीश्वरता सांख्यमीमांसयोः श्रुतिविरुद्धा
ति नुदेशोतेषां सप्रमाण्यं मायावादो नास्तिकानां वाशिष्ठलोके वेदमार्गं परित्यज्य तत्रमार्गे तु विलक्षणं केशाण्डिल्यप्रति विष्णुवचः धिग्धि
कशाण्डिल्य गुरुदेहसाहसीत्वमतोऽभद्राम् कोऽसौ वर्णाश्रमाचारः श्रोते न मुक्तं त्वया विना शङ्कः पापबलात्पक्रम्नास्तिनेधिक्कृतिः श्रुतौ क्रमा
जैगीषव्यशाण्डिल्यसृतापूजामनत्वया अतः कालेन महता वेदमार्गं गमिष्यसीति अयमपवरोऽपि करिष्यति एवं जन्मत्यायमेव तत्र्यागेन तत्र २९
वैश्यकारणमिति सूचितम् स्पष्टमेव च एषाधिकारित्वं च तेषां सूचितम् न चैवं स्यात्तरे पांचरात्रं भागवतं बौद्धं दिगम्बरं तथा लोकायतं च ।

कापालं सोमं पाशुपतं तथा। लाकुलं भैरवं वामं शाक्तं शांभवयामले। एवंविधानि शास्त्राणि विरुद्धानि महामुने। स्वतः प्रमाणभूतेन वे
देन श्रुतिसत्तम। वैदिकस्तानि शास्त्राणि मनसापि न संस्मरेत् इति। सर्ववेदाविरोधेन प्रमाणं नान्यथा भवेत्। तस्मात्सर्वप्रयत्नेन ब्रह्मन्वे
दि ६ दविदांवर। त्यक्त्वा वेदविरुद्धानि वेदमेकं समाश्रयेदिति च। सर्वस्त्रिपुराणदेशजातिकुलधर्मादिकं ब्रूते। स्वागमैः कल्पितैस्तैस्तु जनान्म
द्विमुखान्कुरु। मां च गोपय येन स्यात्सृष्टिरेषोत्तरोत्तरेति। वाराहे अभावे वेदमंत्राणां पाञ्चरात्रोदितो विधिरिति। सांबपुराणे श्रुतिभ्रष्टः श्रु
तिप्रोक्तप्रायश्चित्ते भयं गतः। क्रमेण श्रुतिसिद्ध्यर्थं ब्राह्मणस्तंत्रमाविशेत्। पाञ्चरात्रं भागवतं मंत्रं वैखानसाभिधम्। वेदभ्रष्टान्समुद्दिश्य कम
लापतिरुक्तवानिति इति चेन्न। श्रौतार्चनेन तु विप्राणां विशेषणं भवेत्सदा। श्रौतानामार्चनेनस्य वैष्णवत्वं कुलं लभमिति। मंत्रराजानुष्ठानविधाने
तन्त्रियवैष्णवयोः मंत्रेण = उक्तलक्षणस्याधिकारात्। श्रौतागमे वैदिकैरेव मंत्रैरागमशास्त्रोक्तन्यासाधारपीठपूजाद्यंगकलापेन यजनं केवलमागमे आगमोक्तमं
त्रेणागमस्थवीजप्रक्षेपयुतवैदिकेन वा मंत्रेणागमोक्तकलापेन यजनम्। यत्र नागमोक्तवीजप्रक्षेपो नापि तत्रत्यन्यासादिरूपमंगं। तत्कुलं श्रौ
तं। न्यासस्तांत्रिकस्तु अपवादपत्रानुपरिशिष्टे संध्याप्रकरणे तदुक्तं। सावित्र्या ऋषिर्विश्वामित्रश्छन्दो देवतमेव वा तस्य तथैव
तोऽष्टकरन्तरङ्गो विभक्तामन्त्रयोनिभिः। षड्भिरंगानि मंत्रैस्तैर्यांगमात्मनि विन्यस्यात्मानं तद्रूपं भावयेत्। यथा तत्सवितुर्हृदयाय नमः इति
हृदये वरेण्यं शिरसे स्वाहा इति शिरसि भर्गो देवस्य शिखायै वषट् इति शिखायाम् धीमहि कवचाय हुं इति कवचमुरसि धियो यो नः
नेत्रत्रयाय वौषट् इति नेत्रत्रये प्रचोदयात् अस्त्राय फट् इति करतले न्यस्य प्राच्यादिदशादिक्ष्वस्त्रं न्यसेदिति योगन्यासः। एवमप्य
केनैकं तिसृष्टिविधिर्वैदिक इति। अयं मंत्रदेवताध्यायेदिति। अनेनैव पीठन्यासातिरेके तांत्रिकमंत्रेष्वपि नैव शपकलतास्तूचिता। ए
केषु त्वब्राह्मणानां त्वर्थः। अनेन तेषां तत्रैवाधिकार उक्तः। स्त्रियस्तु सविधिर्वैदिक इति तेन लक्षितविप्राः। अनेन तत्राणां वेदमूलकत्वं नि
राकृतम्। तत्रियादिविषयकता च स्पष्टमुक्ता। विप्राणां वैदिकमात्रेऽधिकार इति चोक्तं। अन्यथा तत्राधिकारिणः प्रतिन्यासानां सर्वेषां संभ
वतया पृथक् न स्यात्किरसंगतता स्यात्। अत एव प्रपंचसारे एकोनविंशपटले गायत्रीमंत्रविधौ सत्यत्सविस्तरकैकस्मिन्मंत्रैः स सदाशिवैः स सर्वात्मा
कैः। अर्थोदृगन्यासे समाहितं इत्येवं न्यासमुक्त्वा एवं कृत्वा तु सिद्ध्यर्थं गायत्रीं दीक्षितो जपेदित्युक्तं। एवमुक्तप्रकारेण न्यासान्कृत्वा दीक्षि
तः ब्रह्ममातृकलशाभिषेकलक्षणगायत्रीविषयतांत्रिकदीक्षावान् जपेदित्यर्थः। अनेन तादृश्यादीक्षावत एव न्यासपूर्वकजपेऽधिका
र इति स्पष्टं वैदिकस्य तन्न्यासेऽधिकार इति स्पष्टमेवोक्तं। तथा च शारदायां न्यासा उक्ता। तत्तल्लक्षणविधानेन मिताक्षरीविजितेंद्रि
यः। व्याहृतित्रयसंयुक्तां गायत्रीं दीक्षितो जपेदित्युक्तं। अनेनापि न्यासस्मरणमपि तांत्रिकमिति स्पष्टम्। एवं बोधायनादिभिर्येऽप्युक्ता ऋग्विधविषयन्या
सपूर्वकजपहोमादिकथनं तदपि शैवागमाद्युक्ततांत्रिकदीक्षावतामेव नान्येषामिति बोध्यम्। अत एवार्षब्राह्मणे अथ खल्वयमार्षः प्र

घु

(Left margin note:) शूद्रब्राह्मणानां वैदिकैरुक्ता

(Right margin note:) षडङ्गन्यासनवि अन्यन्यासानां कार्यता षडङ्गन्यासादिरित्येतेन सहितविधिर्वैदिक इत्युक्ता =

देशो भवतीत्युपक्रम्य यो ह वा अविदितार्षेयच्छन्दोदैवतब्राह्मणेन मंत्रेण याजयति वाध्यापयति वा स्थाणुं वर्च्छति गर्त्तं वा पद्यते प्रमीयते पापी-
यान् भवति यातयामान्यस्य छंदांसि भवंतीत्यथ ... एकैकस्यार्षं दैवतं छन्दः स्मरन्निति भवतीत्यादि अविदितस्य मंत्रस्तस्य धी-
ग्रहणं वस्तुमात्रं एवं प्रदेशे उपदेशो न त्वधिकारस्यार्थः ब्राह्मणपदेन तदङ्गानां विनियोगा इति तन्न्यासकृतः यातयामत्वं तदुक्तं मानत्वं जी-
र्णत्वं प्रतिषिद्धं च यातयाममिदं द्वयमिति कोशः मंत्राणामियमेव तेषां तत्त्वविकारानध्ययनात् इदं हि न्यासादीनामवैदिकत्वमाह यत्तु भा-
गवते वैदिकस्तांत्रिको मिश्र इति मखो त्रिविधो मखः त्रयाणामीप्सितेनैव विधिना मां समर्चयेदिह के तत्र स्वापूर्वोक्ताधिकारानुसारेण बोध्या
मिश्रं वैदिकप्राधान्येन प्राधान्याभ्यां द्विधा मन्त्ररपि निःश्रेयसकरं कर्म द्विजस्येत्तन्निबोधत वेदाभ्यासस्तपो ज्ञानमिन्द्रियाणां च संय-
मः अहिंसा गुरुसेवा च निःश्रेयसकरं परम् सर्वेषामपि चैतेषामात्मज्ञानं परं स्मृतम् तद्ध्यग्र्यं सर्वविद्यानां प्राप्यते ह्यमृतं ततः सर्वेषाम-
पि चैतेषां शुभानामिह कर्मणाम् किंचिच्छ्रेयस्करतरं कर्मोक्तं पुरुषं प्रति षण्णामेषां तु सर्वेषां कर्मणां प्रेत्य चेह च श्रेयस्करतरं ज्ञेयं सर्वदा
कर्म वैदिकम् इह चामुत्र वा काम्यं प्रवृत्तं कर्म कीर्त्यते निष्कामं ज्ञानपूर्वं तु निवृत्तमुपदिश्यते एतद्द्विजन्मसाफल्यं ब्राह्मणस्य विशेषतः प्राप्य
कृतकृत्यो हि द्विजो भवति नान्यथा या वेदबाह्याः स्मृतयो याश्च काश्च कुदृष्टयः सर्वास्ता निष्फलाः प्रेत्य तमोनिष्ठा हि ताः स्मृताः उत्प-
द्यन्ते च्यवन्ते च यान्यतोऽन्यानि कानिचित् तान्यर्वाक्कालिकतया निष्फलान्यनृतानि च पितृदेवमनुष्याणां वेदश्चक्षुः सनातनम् अशक्यं चाप्र-
मेयं च वेदशास्त्रमिति स्थितिरित्याह अस्यार्थः वेदाभ्यासः उपदेशकशास्त्राभ्यासः तद्बोधितं तपः कृच्छ्रादि ज्ञानमात्मज्ञानं अत्र वेदशब्दो
न मुख्यवेदपरः किं तु तत्तेष्वागमशब्दप्रयोगात् साधारणः सर्वेषामेषां षण्णां वैदिककर्म श्रेयस्करतरमिति वक्ष्यमाणसंगतेः सर्वेषा-
मेषां षण्णामित्यस्यासंगतेश्च आत्मज्ञानस्य परत्वमाह तद्धीति एवं हि तेनाभ्यासतदङ्गन्यासादीनां वैदिकत्वेः साम्ये किमित्याशंक्याह ए-
कृति किंचिदित्यादि सर्वेषां लौकिकवैदिकानां उत्तरयति षण्णामिति श्रेयस्करत्वं दर्शयति एतानि वैदिकत्वात् यथाविहितानि वक्ष्यमाण-
तेष्वेकानि लौकिककर्मजन्यफलानां मध्ये दिकानां तेषां शीघ्रं जायमानानामपि क्रमशः कालक्रमेण किंचिद्विलंबेन वैदिककर्मतो ला-
भे न तावज्ज्ञानं भवति तस्मिन् तस्मिन् तत्तत्फलजनकं ज्ञानं वैज्ञानिकत्वम् अनेन निवृत्तस्य श्रेष्ठत्वमुक्तम् वैदिकं त्वीति एतद्धीति ब्रा-
ह्मणस्य विशेषतः अनेन तस्य पातित्वं विना न्यस्यानधिकारः तत्रियादेस्तत्राप्यत्र वाधिकार इति सूचितम् तदेवाह प्राप्येतीति एतद्धि
कृतार्थं च अत्र द्विजपदं विप्रेतरपरम् ननु किं तदवैदिकं कर्म तत्राह या वेदबाह्या इति वेदामूलाः स्मृतयः कुदृष्टयः वेदविरुद्धा
वौकादिस्मृतयः ऐहिकमात्रफलाः वेदविप्रतिपन्नव्याकृता निष्फलत्वे हेतुमाह उत्पद्यंत इति तत्काल उत्पद्यंते देशादिमोहात् पुनः
सत्ययुगादौ च्यवन्ते विलीयन्ते अतो वेदो हि देवमूलस्तैस्तेष्वप्यन्यान्यनीत्यन्वयः यद्वेतो नात्युत्पत्तिविनाशशालित्वात् पौरुषेयत्वसाधिता

न्न यतोऽनन्तानि अस्मत्परपाणिपारलौकिकफलानि सोमेन वाजादीनि वा नः श्रेयांसि फलानि अतः केवलं वैदिकं कर्मैव हि सैव विधिः तद्विद्या
दिस्थलिङ्गमेवैतेन अनेन तन्त्रपादेरपि तान्त्रिकफलमेवेति सूचितम् एतदेव पद्मीसेन वेदस्तौति पितृदेवेति वेदः सर्वेषां चक्षुः नेत्रतम
प्रमाणानामेवेत्यर्थः सनातनं सर्वकालिकमनाद्यनन्तत्वात् तन्त्रमेव दर्शयति अशक्यं कर्तुमशक्यं सकलतन्त्रदर्शनात् त्वस्य पुरुषे
प्रभावात् वेदलोऽज्ञानपूर्वकमेव हिरण्यगर्भादिकर्तृकसृष्टिप्रवणाच्च बुद्धिपूर्वकृतत्वेनासम्यग्मायमानत्वाच्च यस्य निःश्वसितं वेदाः।
तिश्रुतेश्च अप्रमेयं इयत्तया परिच्छेत्तुमशक्यम् अनन्ता वै वेदा इति श्रुतेः व्याससूत्रानुपि अतः स परमो धर्मो यो वेदादधिगम्यते
अवरः स तु विज्ञेयो यः पुराणादिषु स्थितः आदिनेति शास्त्रादि अशेषवेदितं अनेन तन्त्रादीनामहितत्वं प्रतिपन्नं तेषु व्याकृतत्वं सूचितम् सा
नुदिष्वादाद्येषामततः फलमपि तन्मयं मात्रा तथादितम् इति दिक विप्रस्यापि एवंकृतपापवशाद्वैदिकमार्गपरित्यागपूर्वकं तेष्वमाधिश्रये।
ण प्रकारान्तरेणावाप्रहस्य तेष्वधिकारः एतच्चोक्तं सांबपुराणेष्वपि अत्र सांख्ययोगः पांचरात्रं वेदाः पाशुपतं तथा आत्मप्रमाणा
न्येतानि न हन्तव्यानि हेतुभिरिति भारते निर्योगाः प्रमाणं तद्व्यतिरिक्तांशस्य वेदाविरुद्धस्यापि प्रशुद्धविशेषस्यैव प्रमाणत्वात्
तस्यापि योंऽशो मार्गाणां वेदेन न विरुध्यते सोंऽशः प्रमाणमित्युक्तं केषाञ्चिदधिकारिणामिति तन्त्रसंहितोक्तेः केषाञ्चिदेव प्रमाणत्वं न तु स।
र्वेषामिति तदर्थः आगमानुपक्रम्य अधिकारिविभेदेन प्रवृत्तानि न संशय इति वामनपुराणोक्तेश्च एतेभ्यस्त्वयदन्यत्तद्धर्माभासाभि।
धायकं तद्दर्शनाद्बधेत्यागं मोहनं तस्मादुच्यते अतः धर्माभासः वेदामूलो वेदविरुद्धश्च मोहनाय यो मोहाश्रयेण तु तथा हृष्टा मोहजननात
यत्नप्रयत्नेः न किंस्मात्तो विधमेतत्तेत्याह वेदार्थविभ्रमैः कार्यस्थितिर्यतस्ततो गुरा प्रयत्नेनात्र तिथि च न विधिः हृत्वा वृजेयेदिति स्कन्द
मित्यस्य वेदार्थेनपास्ततामित्यर्थः एतेन वेदमूलत्वं दर्शितं वेदार्थविभ्रमत्वे तथाहि प्रतितेन वेदाविरुद्धांशानुष्ठाने शौचं श्रौतमार्गप्रा[प्ति]।
रिति विशेषः यथा तन्त्रसंतपरिग्रहारप्रभृतिमात्रदितमोदीदास्ववस्थितो तथा वैदिकानां वेद एव प्रमाणं प्रष्ठानान्तरत्राणि अप्रतराणा
शास्त्राभ्यागमाश्च प्रमाणमिति व्यवस्थाबोधा अत्र विशेषोऽपि मिश्रप्रचाराधिकारी तेषामत्र वैदिकेषु न स्याधिकारः किञ्च ब्रह्महत्यादी
नां प्रायश्चित्तकरणकाले संध्यावन्दनादिवत् न तन्निवृत्तेः अश्वमेधे नृपः इति श्रुतिः हलाहलत्वस्यानेकसंशसाध्येश्वमेधेऽधिकार
वच्च तस्य वैदिकेऽप्यधिकारात् वैदिकतान्त्रिकयोः परस्परमस्पृश्यता तन्त्रेषु दीक्षितो मतो वैदिकेन स्पृश्यो सदा वैदिकस्यापि तन्त्रेषु दी
क्षितेन स्पृश्यो न देवतासिद्धिलोपो गोके: न च वैदिकस्याशुचिता तान्त्रिकस्य देवतासात् सिध्यमिति बोध्यम् यत्र तन्त्रेषु तन्त्रमार्गाणां वैदि।
कमार्गादाधिक्यकथनम् तत्र श्रुत्यादि स्पन्दतदधिकारिणः प्ररोचनार्थं मोहनार्थं च तादृशमोहे पूर्वजन्मकृतपापमेव कारणम् पांच।
रात्रे च कापाले पाशुपते च दीक्षितास्ते भविष्यन्ति मत्कृताः पापकर्मिण इत्युक्तेः कश्चित्तन्त्रविरोधेन धर्मे पौराणिकाश्रयाऽपि वदन्ति

सर्वेषां
तान्त्रिकस्य क्षी
तान्त्रिकस्य प्रे =

पु॰टी॰
ना॰
३१

दृश्योऽयमत्र शास्त्रसंग्रहावलंबिनेति परमशैवैः ब्राह्मणेषु क्षत्रियादिषु राजिपूजाप्राधान्यमुक्तं तदनुसारेण तत्र तिथिनिर्णयोऽत्र कलौ तं
नाऽनुसार्यैव शूद्राणां वै देवानामिति शास्त्रं तत्स्मृतिविरोधात् अत एव देवीपुराणे उपवासात्परं भैक्षं भैक्षात्परमयाचितम् अयाचितात्परं
नक्तं तस्मान्नक्तेन वर्त्तयेदिति प्रकृतस्य वामाचारो महादेवीनक्तेनोदरतेन रात्रिनियमं तेन नक्तादिपूजा तद्व्रतादिकरणं च वामाचारांतर्गतमि
ति बोध्यम् इदं चतुर्थ्यादिनक्तविषयं तत्र ब्रह्मस्यापि विप्रस्य वामाचारेनाधिकारः योदाक्षिण्यं विना विशेषमहामायां प्रपूजयेत् स पापः दक्षिणाचारं
स्वर्गलोकाच्च्युतो भवति रोगधृक् विप्रो यः पूजको वामः सोमपाश्चैव वर्जित इति कालिकापुराणात् दक्षिणे दक्षिणमार्गो कथ्यते विप्रा।
पातिमायागते प्रवेशापि मद्यमांसादौ विप्रस्य नाधिकारः स्वगात्ररुधिरं दत्वा स्वात्मवध्यामवाप्नुयात् मद्यं दत्वा ब्राह्मणस्तु ब्राह्मण्यादेवही
यते इति कालिकापुराणात् वामागमोपि विप्रस्तु मद्यं मांसं न भक्षयेत् स्वकीयां परकीयां वा नारीं ग्राह्याक्रम्य ब्राह्मणो यजेदिति श्रीविक्रम
संहितायां च सारादिलिंगिनवचनाच्च आकृष्येत्स्य धनदारादिना वशीकृत्यमर्थः आगोत्रपिशितैरर्कैः सस्याश्च पि सुरेश्वरि वर्णाश्रमाचि
तधर्ममविचार्य यजेतिवे मूलश्रेणापिशाचा सा भवति ब्रह्मराक्षसाः इत्यागमस्य संहितायाम् गौरीप्रति शिववाक्याच्च मद्यस्वीकारस्य स्थाने त
दुग्धं कदाचनेति वचनांतराच्च तद्विशेषेण योरप्यष्टादशविधमद्यदानमेव न तद्दानम् तत्तयोरनधिकारात् एतेन सोमपानादि *सुरा
नोपेन विप्रस्यापि मद्यादिस्वीकारेन दोषस्त्यपास्तं शास्त्रस्य तदधिकारिशूद्रादीन्प्रति सार्थकत्वात् नैवर्णिकस्यैव यत्नेन याजनं नाधिकारा
नस्य बलराग्रहणशास्त्रस्यैव यच्चोन्निपाते प्रतिग्रहणे निग्रहोपाभावकल्पनस्य क्रमम् न हि वामाचारीयमद्यादिविधिः तथा वा[illegible]पालनाया
यां कांचन परिहरेदितिवत् तस्यायमर्थः यां कामपि भोगेच्छया स्वतन्त्रागतो नाऽधर्मेच्छया त्यजेत् किंतु तन्मुद्राक्षु भागीयेष्टतमस्या
मध्या उपभोज्येति तद्बलात्स्वयं प्रवर्तमानीये विनश्यर्थः अतस्तेन स्वाधिना ज्ञात्रा स्त्रीभोगादेर्वा प्राणिप्रतिनिधर्मतवक्तेयोगपत् नद्युपास।
नवदस्यब्राह्मणस्याधिकारिकत्वाभावाच्च वेषस्य स्यात्तिकृष्णस्तस्य यस्य तत्साम्यकम् ब्राह्मणस्य गवां हीरमितस्तेय अग्रादिप्रष्टा
विप्रब्राह्मणपदार्थः पीत्वा पीत्वा पुनः पीत्वा पतितो धरणीतले उत्थाय च पुनः पीत्वा पुनर्जन्म न विद्यते इत्यादितन्त्रस्य परमेव लोका।
प्रवहारे मद्यादि लोकेनिंद्य तस्यापि शूद्रस्य सौत्रामण्यादिव्यापन पूजाकाले तत्स्वीकारो बोध्यः मद्यं अब्राह्मणापक्षे [illegible] ब्राह्मणापक्षे विमोच
नपकारोपि शूद्रस्यैव ते विना तेन दहनेन पूजने शूद्रादीनां सर्वसिद्धिप्रतिबंधात् अत एव देवीपुराणे वेश्याहस्तोपदानाहिषे [illegible] ब्राह्मणा वसे
षु च शूद्रस्त्री विशेषेण बलिं दद्याद्वरेषु च लोकान्तरेण मार्गेण वामाचारेण सिद्धिदेति शूद्रादीनामेव तत्राधिकार उक्तः लोकान्तरेण तस्य
लोकविलक्षणेन तदनंगीकृतेनेत्यर्थः स्त्रीग्राहेनातिश्रेष्ठविप्रादिविषयोपि ब्राह्मणस्य सात्त्विकबलिदानमपि च भवति ब्राह्मणस्य बलि
र्थं तत्राथविहितः क्रमः कृत्वा हुत्वा मध्ये सिंहं नरं व्याघ्रं च भैरवम् अथवा अपविक्रतं यवक्षीरमयं च वा हनयेच्च द्वदशमेनेति कालिकापुराणात् ३१

प्रवचरसिंहस्यान्नाद्युपलक्षणं स्वर्णादिक्षीपफलेनेत्युक्तं इति दोषप्रसक्तेः यत्र अद्वैतज्ञाननिष्ठो योगी सोऽसंसारपारगः सएवयजते।
देवान्ग्राधिकारीवरो भवेदिति सिद्धान्तस्य संहितायाश्च तन्त्र तत्र न यथा प्राकृतेनाद्वैतज्ञानकर्मभावे न धिकारात् तस्मात्तत्सदृशपरम् सार्व
भौमो यथा राजा स्वच्छंदवर्तनेन भवेत्प्रारब्धकर्मणा ज्ञानात्स्वच्छंदवर्तनेनेत्यादिना यथा तस्याचारविचाराद्येष नियमः शास्त्रेण दर्शि।
तस्तथा योगी येषाचारविचारशीली लोकलज्जाहीनः शूद्रादिः सत्यत्वोधिकारीति तदर्थः वस्तुतः सार्वभौमो यथेत्याद्युपेक्षत्व
तिपरं न तत्र तस्य स्वच्छंदाचरणमस्ति ज्ञानिनः प्रक्रम्य प्रारब्धकर्मप्राबल्याद्योगो निषिद्धाभवेद्यदि क्षिप्यते स सदाङ्कः स्वेच्छं विहितं दीनवत्
यथेष्टाचरणं न तस्य रागात्केन विदिष्यते इत्यभियुक्तोक्तेः सनत्कुमारसंहितायामप्युक्तं वाह्यं ज्ञानकर्तव्याकर्तव्या वा ह्यजातिभिः
साच त्वद्रूपद्रावणमेदिकार्थिकसाधनात् न कर्तव्यं तत्त्वविप्रैरिति शेषः तद्वाह्यकर्तव्यं वाह्योति वाह्यानाद् वाह्यज्ञानरताः कौ।
लाः क्षपणाश्च कापालिनः दिगंबराश्चेतिहासा वामकाश्च तेच वादिनः अंतराराधनपरा वैदिका ब्रह्मवादिनः जीवन्मुक्ताश्चरन्तेतेवि।
मुलोकश्च सर्वदेति ऐतिहासादिभिरेव धामलादितेनात्रामाणवादिनः क्षपणाद्यः इतीयागप्रधानाः तंत्रवादिनः श्रीविद्याप्रधान।
ज्योतिर्विद्यादितंत्रप्रामाण्यवादिनः अंतराराधनं देवतानामात्मानुसंधानरूपं यद्वा वाह्यपूजा वा यद्यकर्तव्या पूजा वा ब्रह्मरूपं त्वेष्टे
धा= वलाभात् अंतराराधनं वैदिकमंतरंगमाराधनं जीवन्मुक्ताः इत्यस्य तत्त्वेऽर्थः आपाततस्तत्र प्रक्रम्य मिश्रकं कौलमार्गं च परित्यज्यं हि
शाकतीतीत्यवचनाच्च कौलमार्गो वामाचारप्रधानो मार्गः मिश्रकं यत्र वामदक्षिणोभयमार्गकथनं एतेनान्तराराधनपराः इति
कौलमार्गोक्तान्तर्यागपरमिथ्यपास्तम् तंत्रोक्तमार्गस्य व्यापकत्वं प्रतिसर्वेषामात्मत्वकथनात् वेदे निषेधो पितंत्राणि तांत्रिकोद्भुत
रूपयेत् तंत्रलिङ्गस्तथा वेदान्वैदिकांश्च न दूषयेदित्यपि तत्तदधिकारिणो निंदा न कर्तव्येत्यर्थम् स्वधर्मे निधनं श्रेयः परधर्मो।
भयावह इत्युक्तेः एवं च वामाचारप्रवृत्तो व्राह्मणोऽपि लिंगएव वेदाध्ययनप्रवृत्तस्य शूद्रवत् एवं च चक्षविप्राणां दक्षिणमार्गेऽधिकारः।
त्राधिकारः कुण्डगोलकादीनां संकराणां शूद्रादीनां चेतरत्राप्यधिकारः विप्रादिजातस्तु कुंडगोलकादिः प्रासादएव प्रश्नेयोगिनीतंत्रे सर्वे
वर्णा द्विजातयः निरूत्तयोगिनीतंत्रे सर्वे वर्णाः पृथक्पृथक् इत्यादि वचासि कुंडादीनामपुनर्भवतो नाद्विजातित्वात् तत्र दुर्गा जातस्य
गोलतन्त्रदुर्गाधाच एतदभिप्रायमेव सौत्रामणी न्यायमूलकं सौत्रामण्यां कलाचारविशेषमद्यनतुष्यतीति पठंति प्रायश्चित्तिकाः द्वावि
यवेषाद्योश्च वैदिकतांत्रिकवैदिके चाधिकारस्तत्र निजगणात्पुरीतिनंदलिदानंतयोर्न विरुद्धं तथातत्प्रसदाधारणाद्विप्रशूद्रकुंडगोल
कादीनामेव लिङ्गचक्रादिधारणमुपक्रम्य विप्रसेविना दिगर्हितान्याप्रायश्चित्तमुदीरितम् शूद्रधर्मरतानां हि लिंगचक्रादिधारणमिति यामले।

अद्वैतज्ञानिनः =

यथा सार्वभौमः यथा =

दु.टी.
ना.
३२

त्वैः एतदर्थकक्रूतयत्नपरैः कल्पिता एव ग्रंथ उपलंभात् तथाप्युपलभ्यंते नाशुपिवेदभाष्यकारादिभिस्तथा व्याख्यानात्तत्रार्पिताः विं
शतिधाराणामपि शोभानामविषयत्वाद्वर्णमादितीदितसैवेति स्तनसंदितादौ स्पष्टं भगवान्धार्यं तद्धोमांते वैदिकैरेव तत्र लेशप्रसक्तानुप्रस
क्ता प्रकृतमनुसरामः ९ प्रसन्नमिति क्रियाविशेषणं देव्युवाच यत्प्रार्थ्यते ... कुलनंदनेति वैश्यसंबोधनम् ज्ञानार्थित्वेन प्रशस्त
त्वात् १० मत्त इति प्राप्यतां स्वीक्रियतां तत्प्रार्थ्यमाने मार्कंडेय उवाच ततस्तत्र राज्ञे अविभ्रंशीति चिरस्थायि ११ अत्रैव च अत्रापि

परितुष्टा जगद्धात्री प्रत्यक्षं प्राह चंडिका देव्युवाच यत्प्रार्थ्यते त्वया भूप त्वया च कुलनंदन
१० मत्तस्तत्प्राप्यतां सर्वं परितुष्टा ददामि तत् मार्कंडेय उवाच ततो वव्रे नृपो राज्यमवि(
भ्रंश्यन्यजन्मनि ११ अत्रैव च निजं राज्यं हतशत्रुबलं बलात् सोपि वैश्यस्ततो ज्ञानं वव्रे
निर्विण्णमानसः १२ ममेत्यहमिति प्राज्ञः संगविच्युतिकारकम् देव्युवाच स्वल्पैरहो
भिर्नृपते स्वं राज्यं प्राप्स्यते भवान् १३ हत्वा रिपूनस्खलितं तव तत्र भविष्यति मृतश्च भूयः
संप्राप्य जन्म देवाद्विवस्वतः १४ सावर्णिको मनुर्नाम भवान्भुवि भविष्यति वैश्यवर्य त्व
या यश्च वरोस्मत्तोभिवांछितः १५ तं प्रयच्छामि संसिद्ध्यै तव ज्ञानं भविष्यति मार्कंडेय उ(
वाच इति दत्वा तयोर्देवी यथाभिलषितं वरम् १६ रामायनमोनमः

अस्मिन्नजन्मन्यपि हतशत्रुबलमिति राज्यविशेषणं ज्ञानं तत्त्वज्ञानम् निर्विण्णमानसः संसाराद्विरक्तमानसः १२ ममेत्यहमिति
यः संगस्तद्विच्युतिस्तन्नाशकारकमिति ज्ञानविशेषणम् समासश्छांदसः प्राज्ञस्तं ... याति बुद्धिमत्वात् देव्युवाच स्वल्पैरिति स्वराज्यमित्यत्र
मस्तं १३ हत्वेति तत्र राज्ये तवास्खलनं भविष्यतीति इत्यर्थः ... १४ सावर्णिक इति यहाष्टकं नाम तद्वपलक्षितो मनुर्भवितार्थः वैश्यवर्याय
त्वया वरोस्मत्तो ... १५ तमिति संसिद्ध्यै मोक्षाय तादर्थ्ये चतुर्थी ज्ञानं तत्त्वज्ञानम् मार्कंडेय उवाच इतीति ३२

दु॰ टी॰ मा॰ ३३ बभूवेति देव्याः स्वपादाने पंचमी २७ सूर्यादिति सावर्णिर्भविता मनुः॥ एषस्य पुनरावृत्तिर्वक्ष्यमाणकात्यायनीतंत्रात् श्रुतेम
नुरित्यनेन सावर्णिरित्यारभ्य सावर्णिर्भविता मनुरित्यंतोऽधमरामालामंत्र इति सूचयति तदुक्तं लक्ष्मीतंत्रे सप्तगुह्य दिव्यिता
स्तेयं जन्मकर्मावलिस्तुतिः एतां हि द्विजश्रुत्वा जप्त्वा त्वध्यायानां नरः सदा विधूय निखिलां मायां सम्यक् ज्ञानं समश्नुते

बभूवांतर्हिता सद्यो भक्त्या ताभ्यामभिष्टुता २७
एवं देव्या वरं लब्ध्वा सुरथः क्षत्रियर्षभः १२
सूर्याज्जन्म समासाद्य सावर्णिर्भविता मनुः २८ २९
इति मार्कंडेयपुराणे सावर्णिके मन्वंतरे देवी॰
माहात्म्ये सुरथवैश्यवरप्रदानम् १३ समः

सर्वाः संपद आप्नोति धुनोति सकलापद इति द्विजश्रुत्वा जप्त्वा वेत्यनेनाष्टमांवाचतुर्दशपामित्यादिकीलकोक्तप्रकारेण ज्ञानं॰
सूचितमिति सर्वं शिवं॥ इति कालोपनायकश्रीशिवभट्टसुतसतीगर्भजनागोजीभट्टकृते सप्तशतीव्याख्याने त्रयोदशो
ध्यायः १३ ॥ शुभमस्तु मुन्याब्धिवसुचंद्रेब्दे कलेशरेतिथौ नागोजीकृतटीकेयं जीवनाख्येन चित्रिता शिवमस्तु ३३